(21) At द्वादशाह अहर्गण on one of the days if उद्गता drops the pleat then the programme only be repeated but not the entire अहर्गण. (VI-V-21)

Section VI

(1) राजन्यवसिष्ठादिनाम् नाराशंसा द्वितीया: प्रयाज: तनूनपादन्येषाम्।

By this statement the कल्पभेद of प्रयाज by पुरुषभेद is stated. This has to be taken in दीक्षणीय etc. This does not mean वसिष्ट etc भिन्न कल्पs are अधिकारिन् but at सत्रs तुल्यकल्पाs only have अधिकार. (VI-VI-1)

(2) With reference to कुलाययज्ञ it is stated that एतेन राजपुरोहितौ सायुज्यकामौ यजेयाताम्. Here, it is stated that the अधिकार is for राजा and पुरोहित of भिन्नकल्प. (VI-VI-2)

(3) The statement ऋद्धिकामा: सत्रमासीरन् states सत्रयाग, for this सत्रयाग ब्राह्मणs only should be ऋत्विक्s but not त्रैवर्णिकs. (VI-VI-3)

(4) To perform सत्रयाग there is no अधिकार for all ब्राह्मणs but it is for विश्वामित्रगोत्रब्राह्मणs only. (VI-VI-4)

(5) To perform सत्र अहिताग्निs only are eligible. (VI-VI-5)

(6) सत्र should not be performed by जुहू etc. vessels belonging to some one else but it should be performed by जुहू etc. prepared for this purpose. (VI-VI-6)

(7) For अध्वरकल्प etc. दर्शपूर्णमासविकाराs all त्रैवर्णिकाs are अधिकारीs not only वैश्याs. (VI-VI-7)

Section VII

(1) It is stated that विश्वजिति सर्वस्वम् ददाति. However, सर्वस्व here means only the wealth but not all other objects. (VI-VII-1)

(2) When a king performs विश्वजित्याग he should not give away his entire kingdom. (VI-VII-2)

(3) At विश्वजित्याग the horses with hairs should not be given as gifts. (VI-VII-3)

(4) At विश्वजित्याग the gift of सर्वस्व means only that which यजमान actually has with him. (VI-VII-4)

(5) A शूद्र who is serving यजमान should not be given as gift. (VI-VII-5)

(6) After the decision to perform विश्वजित्याग upto the दक्षिणाकाल whatever is with यजमान only be given as gift.

(7) At प्रकृतियाग of विश्वजित् at the commencement of only यजमान should divide his wealth in three parts; one for his own use; the other for performing the sacrifice and the third for offering as दक्षिणा.

At विकृतिभूतविश्वजित् all the three portions be given. (VI-VII-7)

(8) At the अहर्गण of अष्टरात्र the first day is विश्वजित्. At this according to भाष्यकार सर्वस्वदान has to be made. According to कुमारिलभट्ट द्वादशशतदक्षिणा is to be given. (VI-VII-8)

(9) Only those who have more wealth than द्वादश शत are eligible to perform this याग one who has less has no अधिकार. (VI-VII-9)

(10) At आधान it is stated that एका देया । द्वे देये । षड् देयाः । द्वादश देयाः । चतुर्विंशति देयाः । शतम् देयम् । सहस्रम् देयम् । अपरिमितम् देयम् । These figures are not to be taken as alternates but these only mean pleanty of दक्षिणा has to be given. (VI-VII-10)

(11) At दर्शपूर्णमास, by the statement इतिह स्माह वट् कुर्वाष्णि माषानेव मह्यम् पचत etc. These are statements of the nature of परकृति are पुराकल्प. Here, it should not be understood that माषपाकविधि is only for the persons of वृष्णिगोत्र but this माषपाक is for all persons. (VI-VII-11)

(12) There is a सत्र called विश्वसृजामयनं, गन्धर्वा etc have no अधिकार to perform this, which has to be performed for thousand संवत्सर. Among the मनुष्यs also, those who live for thousand years with the help of रसायन are also not eligible. Here, the word संवत्सर does not mean month or twelve days but it means 'day' only. Therefore, मनुष्यs have to perform it for a thousand days. (VI-VII-12)

Section VIII

(1) A person who is प्रजाकाम should be made to perform by चतुर्होता मन्त्र. चतुर्होतामन्त्र reads as पृथ्वीहोता द्यौ अध्वर्युः ऋद्र अग्नित. The होम stated here has to be performed not by अहिताग्नि but by अनाहिताग्नि. (VI-VIII-1)

(2) The होमs that अङ्गs of उपनयन and that are to be performed by माणवक and आचार्य should be performed in लौकिकाग्नि but not in आहवनीय. (VI-VIII-2)

(3) The स्थपतीष्टि stated by the statement एतया नीषादस्थपतिम् याजयेत् should be performed in लौकिकाग्नि but not in आहवनीय. (VI-VIII-3)

(4) The याग stated by the statement यो ब्रह्मचारी अवकिरेत सः गार्दभम् पशुमालभेत should be performed in लौकिकाग्नि only but not in आहवनीय. (VI-VIII-4)

(5) The संस्कारs such as उपनयन चौल etc should be performed only during पुण्याह such as उद्गयनपूर्वपक्ष. (VI-VIII-5)

(6) श्राद्ध etc. कर्मs should be performed in अपराह्ण time. (VI-VIII-6)

(7) At ज्योतिष्ठोम द्रव्ययांचा and सोमक्रय are stated. These are not for those who have no द्रव्य and सोम but for those who have विद्यमानद्रव्य and सोम. (VI-VIII-7)

(8) पयोव्रतम् ब्राह्मणस्य इति पयोभक्षः अग्निदाग्निविहर इति प्रैषमन्त्रः अहतवासाः परिहत्य इति अहतवाससा आच्छादनम् यत्पशुः मासमक्रीतः इत्यादिमन्त्रेण विहितः सौज्ञप्त होमः यो अस्मान् द्वेष्टि यंच वयम् द्विष्मः इति मन्त्रः. These five should be regularly observed. (VI-VIII-8)

(9) पयोव्रत should be given up if it cannot be digested. (VI-VIII-9)

(10) At ज्योतिष्ठोम it is stated that अग्निषोमीयं पशुमालभेत. The पशु mentioned here is goat but not any other पशु. (VI-VIII-10)

The above brief summary of the contents of chapters IV to VI is intended to help the modern scholars who are not quite familiar with Sanskrit.

My daughter Shashikala Aparangi has assisted me in preparing this summary. I record my appreciation of her help.

Mahāmahopādhyāya, Rāṣtrapati Puraskṛta
Prof. K.T. Pandurangi
Chairman and Hon. Director
Dvaita Vedanta Studies and
Research Foundation, B'lore.

अथ चतुर्थे प्रयोज्यप्रयोजकभावाध्याये प्रधानप्रयुक्तत्वपादः प्रथमः

अधिकरणानि

१. क्रत्वर्थोऽयं पुरुषार्थोऽयमिति विचारः फलाभावान्नारम्भणीय इति न वाच्यम् । साक्षाद्वा परम्परया वा प्रयुक्तिनिर्णयोपयुक्तस्य सर्वस्य चिन्तनीयत्वादारभ्य एवायं विचारः । अथ वा शिष्यमनःसमाधानाय वक्ष्यमाणप्रतिज्ञामात्रमिदम् ।

२. पुरुषार्थलक्षणोक्तिः । केवललक्षणोक्तिमात्रपरत्वेऽस्य सूत्रस्य मीमांसाशास्त्रानन्तर्भावापत्त्या वर्णकचतुष्टयपरत्वेनेदं सूत्रं योजयन्ति ।

२. प्रथमं वर्णकम्, क्रत्वर्थपुरुषार्थयोर्भेदकं लक्षणं न निरूपणार्हमिति न मन्तव्यम् । किन्तु निरूपणार्हमेव ।

२. **द्वितीयं वर्णकम्,** ''स्वर्गकामो यजेत'' इत्यादौ करणेतिकर्तव्यत्वांशयोरिव फलांशस्यापि विधेयत्वमिति न मन्तव्यम् । स्वरससुन्दरे रागादेव प्रवृत्तिसम्भवान्न फलांशे विधिरिति **भट्टः** ।

२. फलाविधेयताया ''फलश्चाकर्मसन्निधौ'' इत्यत्रैव सिद्धान्तितत्वान्नेदं युक्तमित्यन्यथा **वर्णकद्वयमाह भाष्यकारः** । ''चमसेनापः प्रणयेद्गोदोहनेन पशुकामस्य'' इत्यत्र गोदोहनकलशाभिधगोदोहनानुष्ठानं क्रतुफलोभयार्थमिति न मन्तव्यम् । किन्तु फलार्थमेवेति **तदीयं प्रथमं वर्णकम् ।**

२. ब्राह्मणादीनां द्रव्यार्जने नियमः क्रत्वर्थ इति न मन्तव्यम् । किन्तु पुरुषार्थ एवेति **भाष्यकारीयं द्वितीयं वर्णकम् ।**

३. ''नेक्षेतोद्यन्तमादित्यं नास्तं यन्तं कदाचन'' इत्यत्रोक्त उदयास्तमयवदादित्यदर्शननिषेधः क्रत्वर्थ इति न मन्तव्यम् । किन्तु पुरुषार्थ एव ।

४. दर्शपूर्णमासयोः ''स्फ्यश्च कपालानि च'' इत्युपक्रम्य श्रुतानि दशयज्ञायुधानि हविष्वेन पुरोडाशादिना विकल्पेन समुच्चयेन वा विधीयन्त इति न वाच्यम् । किन्तूद्धननवाक्यप्राप्तयज्ञसाधनानुवाद एवायम् ।

५. ''अग्नीषोमीयं पशुमालभेत'' इत्यादौ विभक्त्यभिहितैकत्वादिसङ्ख्या न विवक्षितेति न मन्तव्यम् । किन्तु विवक्षितैव ।

६. ''पशुना'' इत्यत्र पुल्लिङ्गमविवक्षितमिति न मन्तव्यम् । किन्तु विवक्षितमेव ।

७. परकीयद्रव्यं देवतामुभयं वा संस्कुर्वन्तः स्विष्टकृदुत्तमप्रयाजपशुपुरोडाशाः पदार्थाः क्रियार्था एवेति न मन्तव्यम् । किन्तु क्रियार्था अपूर्वार्थाश्च ।

८. अतीतेष्वधिकरणेषु प्रयोजकत्वाप्रयोजकत्वफलकतया क्रतुशेषत्वं पुरुषशेषत्वं वेति चिन्तितम् । इतः परं साक्षात्प्रयोजकाप्रयोजकचिन्ता आरभ्यते । इदञ्च सूत्रं वृत्तवर्तिष्यमाण-विवेकोक्ति-मात्रपरम् ।

९. चातुर्मास्येषु वैश्वदेवपर्वणि ''तप्ते पयसि दध्यानयति'' इति श्रुतं दध्यानयनमामिक्षा-वाजिनोभयप्रयुक्तमिति न मन्तव्यम् । किन्त्वामिक्षायागप्रयुक्तमेव ।

१०. ज्योतिष्टोमे ''एकहायन्या सोमं क्रीणाति'' इति सोमक्रयं प्रकृत्य ''षट्पदान्यनुनिष्क्रामति । सप्तमं पदमञ्जलिना गृह्णाति'' इति ''यर्हि हविर्धाने प्राचीं प्रवर्तयेयुस्तर्हि तेनाक्षमुपाञ्ज्यात्'' इति श्रुतं गोर्नयनं क्रयेण अक्षाभ्यञ्जनेन च प्रयुज्यत इत्युभयार्थमिति न मन्तव्यम् । किन्तु क्रयेणैव प्रयुज्यत इति क्रयार्थमेव ।

११. दर्शपूर्णमासयोः ''कपालेषु श्रपयति'' इति पुरोडाशस्य कपालेषु श्रपणं श्रुतम् । तथा ''पुरोडाशकपालेषु तुषानुपवपति'' इति कपाले तुषधारणञ्च श्रुतम् । तत्र कपालः पुरोडाश-श्रपणतुषोपवापाभ्यां द्वाभ्यामपि प्रयुज्यत इति न मन्तव्यम् । किन्तु पुरोडाशश्रपणेनैव प्रयुज्यते ।

१२. ''अग्नीषोमीयं पशुमालभेत'' इति प्रकृत्य ''हृदयस्याग्रेऽवद्यति'' इत्यादिना श्रुतं हृदयादिकं शकृल्लोहितञ्च पश्वालम्भस्य प्रयोजकमिति न मन्तव्यम् । किन्तु हृदयादिरेव प्रयोजको न शकृदादिः ।

१३. दर्शपूर्णमासयोः ''उत्तरार्धात्स्विष्टकृते समवद्यति'' इति श्रुतः स्विष्टकृद्यागोऽपूर्वपुरोडशो-त्तरार्धयोर्द्वयोरपि प्रयोजक इति न मन्तव्यम् । किन्तु प्रकृतपुरोडाशस्य प्रयोजकः ।

१४. प्रकृतावग्नीषोमीयपशौ ''प्रयाजशेषेण हवींष्यभिघारयति'' इति श्रुतम् । तदेतत्प्रयाजशेषेण हविरभिघारणं वाजपेयपशुषु विकृतिभूतेषु प्राप्तम् । क्रतुपशवः प्राजापत्यपशवश्च प्रातःसवने सहैवोपक्रम्यन्ते । तत्रैव सर्वेषामर्थे प्रयाजा अनुष्ठीयन्ते । तत्रैव क्रतुपशव आलभ्यन्ते । प्राजापत्यास्तु पशवो माध्यन्दिने सवने आलभ्यन्ते । तत्र प्रातःसवने अनुष्ठितानां प्रयाजशेषो

माध्यन्दिनकालीनप्राजापत्यवपाभिघारणाय धारयितव्यः । तदर्थं पात्रान्तरं सम्पाद्यमिति न मन्तव्यम् । किन्तु प्रयाजशेषधारणस्यानपेक्षितत्वात्तदर्थं पात्रान्तरं न सम्पाद्यम् ।

१५. दर्शपूर्णमासयोराज्यग्रहणं प्रकृत्य ''अतिहायेडो बर्हिः प्रति समानयति जुह्वामौपभृतम्'' इत्यनेन श्रुतं जुह्वामौपभृताज्यस्यानयनमुपभृत्याज्यग्रहणस्य न प्रयोजकमिति न मन्तव्यम् । किन्तु प्रयोजकमेव ।

१६. जुह्वादित्रयगतान्याज्यानि सर्वकर्मार्थानीति न मन्तव्यम् । केवलप्रयाजार्थं जौहवमनुयाजमानार्थ-मौपभृतमाज्यमित्यपि न मन्तव्यम् । किन्त्वौपभृतं प्रयाजानुयाजार्थम् ।

१७. ''अष्टावुपभृति गृह्णाति'' इत्यत्र श्रुतमष्टसङ्ख्याकग्रहणमेकमेवेति न मन्तव्यम् । किन्तु चतुर्ग्रहणद्वयम् ।

अथ चतुर्थे प्रयोज्यप्रयोजकभावाध्याये अप्रधानप्रयुक्तत्वपादो द्वितीयः

१. अग्नीषोमीयपशोः ''यूपस्य स्वरुं करोति । स्वरुणा पशुमनक्ति'' इत्यत्र श्रुतः स्वरुश्छेदनादियूप धर्माणां खदिरादिवृक्षस्य प्रयोजक इति न वक्तव्यम् । किन्तु यूपानुनिष्पाद्यः स्वरुर्न यूपधर्मादेः प्रयोजकः ।

२. दर्शपूर्णमासयोः ''यत्पर्णशाखया वत्सानपाकरोति'' इति पलाशशाखां प्रकृत्य ''यत्प्राची-माहरेद्देवलोकमभिजयेत्'' इति श्रुतम् । तत्र प्राचीशब्दोदिक्पर इति न वक्तव्यम् । किन्तु पूर्वदिग्गतशाखापरः ।

३. दर्शपूर्णमासयोः ''शाखामाच्छिनत्ति'' ''शाखामाहरति'' ''मूलतः शाखां परिवास्योपवेषं करोति'' ''शाखया वत्सानपाकरोति'' ''उपवेषेण कपालान्युपदधाति'' इत्यत्र श्रुते वत्सा-पाकरणोपधाने द्वे अपि शाखाच्छागहरणपरिवासनानां प्रयोजके इति न मन्तव्यम् । किन्तु वत्सापाकरणोपयुक्तायाः शाखायाः प्रतिपत्तिरेव ।

४. दर्शपूर्णमासयोः श्रुते ''सह शाखया प्रस्तरं प्रहरति'' इत्यत्र शाखाप्रहरणं शाखायाः प्रयोजकमिति न मन्तव्यम् । किन्तु वत्सापाकरणोपयुक्तायाः शाखायाः प्रतिपत्तिरेव ।

५. दर्शपूर्णमासयोः ''अपः प्रणयति'' इति श्रुतानामपां ''प्रणीताभिर्हवींषि संयौति'' इति ''अन्तर्वेदि प्रणीता निनयति'' इति च श्रुते संयवननिनयने अपां प्रणयनस्य प्रयोजके इति न मन्तव्यम् । किन्तु संयवनमेव प्रयोजकम् । निनयनन्तु संयवनोपयुक्तशेषस्य प्रतिपत्तिरेव ।

६. ज्योतिष्टोमे ''दण्डेन दीक्षयति'' इति दण्डधारणं विधाय ''क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति'' इति श्रुतं मैत्रावरुणाय दण्डप्रदानं प्रतिपत्तिकर्मेति न मन्तव्यम् । किन्तु दण्डस्य प्रयोजकमेव ।

७. ''ज्योतिष्ठोमे ''कृष्णविषाणया कण्डूयते'' इति कृष्णविषाणां विधाय ''नीतासु दक्षिणासु चात्वाले कृष्णविषाणां प्रास्यति'' इति वाक्येन श्रुतं चात्वाले प्रासनमर्थकर्मभूतं सत्कृष्ण-विषाणायाः प्रयोजकमिति न मन्तव्यम् । किन्तु प्रतिपत्तिकर्मैव ।

८. ''ज्योतिष्टोमे वारुणेनैककपालेनावभृथं यन्ति'' इत्यवभृथेष्टिं विधाय ''चतुर्गृहीतं वा एतद्यज्ञस्य यद्दजीषम्'' इत्यादिनोक्तमृजीषग्रावादिकमवभृथसाधनमिति न मन्तव्यम् । किन्तु प्रतिपत्ति-कर्मैव ।

९. ''पशुवन्धस्य यज्ञक्रतोः षड्ऋत्विजः'' इत्यादिना क्रतूनां कर्तारः श्रुताः । ''समे दर्शपूर्ण-मासाभ्यां यजेत'' इत्यादिना देशः श्रुतः । पौर्णमास्यां पौर्णमास्या यजेत'' इत्यादिना कालः श्रुतः । ''व्रीहिभिर्यजेत'' इत्यादिना द्रव्यं श्रुतम् । एतानि कर्तृदेशकालद्रव्याणि न विधीयन्ते । किन्त्वनूद्यन्त एवेति न मन्तव्यम् । किन्तु सम एव यजेतेत्यादिरूपेण नियमविधिरेवायम् ।

१०. ''वायव्यं श्वेतमालभेत भूतिकामः'' इत्यादौ श्वैत्यशौक्ल्यादिगुणस्यानुवाद इति न मन्तव्यम् । किन्तु श्वेतमेवालभेतेत्यादिरूपेण नियमविधिरेवायम् ।

११. दर्शपूर्णमासयोः ''व्रीहीनवहन्ति'' ''तण्डुलान् पिनष्टि'' इत्यत्र श्रुतयोरवघातपेषणयो-स्तण्डुलाक्षिप्तपाक्षिकक्रिययोरनुवाद एवेति न मन्तव्यम् । किन्तु अवघातादिनियमविधिरेवायम् ।

१२. यागहोमयोर्लक्षणोक्तिरिति **भाष्यकारः ।**

१२. **प्रथमं वर्णकम्,** यागाद्यनुष्ठानप्रकारोक्तिरिति **भट्टः ।**

१२. **द्वितीयं वर्णकम्,** यागाद्यनुवादेन देशादयो नियम्यन्त इति पूर्वोक्तमयुक्तम् । आग्नेयाद्युत्पत्ति-वाक्येषु यजेरश्रवणादिति न मन्तव्यम् । किन्तु यागाविनाभूतयोर्द्रव्यदेवतयोरुक्त्या यागस्यार्थ-सिद्धत्वादिति **भट्टः ।**

१३. ''यदातिथ्यायां बर्हिस्तदुपसदां तदग्नीषोमीयस्य'' इत्यत्राऽतिथ्येष्टौ विहितं बर्हिस्तत्रोपयोग-मकृत्वैवोपसदादिषु विधीयत इति न मन्तव्यम् । नाप्यतिथ्येष्टावुपयुक्तस्य निरिष्टिकनाम्नो बर्हिष

उपसदादिषु नयनमिति मन्तव्यम् । नाप्यातिथ्यावर्हिर्धर्मातिदेश इति मन्तव्यम् । किन्तु आतिथ्यावर्हिष उपसदग्नीषोमीयसाधारण्यविधिरेवायम् ।

अथ चतुर्थे प्रयोज्यप्रयोजकभावाध्याये क्रतुफलप्रयुक्तत्वचिन्तापादस्तृतीयः

१. "यस्य पर्णमयी जुहूर्भवति" इत्यादिना जुह्वाः पर्णमयत्व अञ्जनरूपचक्षुःसंस्कारः प्रयाजानुयाजरूपं वर्म च श्रुतम् । एतानि च त्रीणि पुरुषार्थतया वा क्रतुपुरुषोभयार्थतया वा विहितानीति न मन्तव्यम् । किन्तु सर्वोऽप्यर्थवाद एव ।

२. दर्शपूर्णमासयोः "अपः प्रणयति" इति प्रकृत्य " मृण्मयेन प्रतिष्ठाकामस्य प्रणयेत्" इति श्रूयते । तथा ज्योतिष्टोमे "वार्हद्गिरं ब्राह्मणस्य ब्रह्मसाम कुर्यात्" इति च श्रूयते । तत्र काम्यं मृण्मयं नैमित्तिकं वार्हद्गिरञ्च नित्यार्थमपीति न मन्तव्यम् । किन्तु नित्यप्रणयनाद्यर्थं पात्रान्तरं सम्पाद्यम् ।

३. अग्निहोत्रे "दध्नेन्द्रियकामस्य जुहुयात्" इति श्रुतं काम्यार्थं दधिं न क्रत्वर्थम् । क्रत्वर्थन्त्वन्यदेव दधि सम्पाद्यमिति न मन्तव्यम् । एकस्यापि दध्न उभयार्थत्वाविरोधः ।

४. ज्योतिष्टोमे "पयो व्रतं ब्राह्मणस्य" इत्यादिनोक्तं व्रतं पुरुषार्थमिति न मन्तव्यम् । किन्तु क्रत्वर्थमेव ।

५. "विश्वजिता अतिरात्रेण सर्वपृष्ठेन सर्वस्तोमेन सर्ववेतसदक्षिणेन यजेत" इत्यत्र विश्वजिदादिचोदनासु फलाश्रवणादपुमर्थतैवेति न मन्तव्यम् । किन्तु फलाध्याहारेण पुमर्थतैव ।

६. विश्वजिदादिकं सर्वफलार्थमिति न मन्तव्यम् । किन्त्वेकफलार्थमव ।

७. तदेकं फलमपि नानियतम् । किन्तु स्वर्ग एव ।

८. सत्रकाण्डे रात्रिसत्राख्यं सत्रं प्रकृत्य "प्रतितिष्ठन्ति ह वा एते य एता रात्रीरुपयन्ति" इत्यादिनोक्तं फलं स्वर्ग एवेति न मन्तव्यम् । किन्त्वार्थवादिकफलं प्रतिष्ठैव ।

९. "सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः" इत्यादीनि श्रुतफलान्तराणि कर्माणि श्रुतफलस्वर्गोभयफलकानीति न मन्तव्यम् । किन्तु श्रुतफलकान्येव ।

१०. "एकस्मै वा अन्या इष्टयः कामायाह्रियन्ते । सर्वेभ्यो दर्शपूर्णमासौ" इत्यत्र स्वर्गरूपश्रुतफलविरोधान्न फलान्तरकल्पनं युक्तमिति न मन्तव्यम् । किन्त्वप्राप्ता सर्वकामार्थता विधीयते ।

११. स न्यायो दर्शपूर्णमासयोः सर्वकामार्थत्वे सिद्धे सति एकस्मिन् प्रयोगे सर्वे कामा भवन्तीति न मन्तव्यम् । किन्तु प्रतिफलं प्रयोगभेदेनैव ।

१२. ''चित्रया यजेत पशुकामः'' इत्यादावुक्तपश्वादीनि फलान्यामुष्मिकाण्येवेति न मन्तव्यम् । किन्त्वत्र वा जन्मान्तरे वेत्यनियम एव ।

१३. वाजपेये ''वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत'' इति श्रुतम् । तत्र वाजपेययागानन्तरं बृहस्पतिसवः कार्य इति कालार्थः सम्बन्ध इति न मन्तव्यम् । किन्तु वाजपेयबृहस्पति-सवयोरङ्गाङ्गिभावरूपसम्बन्धो वाजपेयानन्तरं बृहस्पतिसवः कार्य इति ।

१४. दर्शपूर्णमासप्रकरणे ''संस्थाप्य पौर्णमासीं वैधृतेनानुनिर्वपति'' इति श्रुतम् । तत्र पौर्णमासीं समाप्य तत्काले वैमृधेष्टिः कार्येति कालार्थसम्बन्ध इति न मन्तव्यम् । किन्तु दर्शादि-साधारणाङ्गयुक्तां पौर्णमासीं समाप्येदमपरं वैमृधाख्यमङ्गं कर्तव्यमित्यङ्गाङ्गिभावार्थ एव सम्बन्धः ।

१५. ज्योतिष्टोमे ''अग्निमारुतादूर्ध्वमनुयाजैश्चरन्ति'' इति श्रुतम् । तत्र ''देव बर्हिर्मा त्वा'' इत्यादिभिः पाशुकहौत्रकाण्डपठितैरेकादशमन्त्रैः साध्या अनुयाजनामका एकादशहोमा अग्निमारुताख्यशस्त्राङ्गमिति न मन्तव्यम् । किन्तु कालार्थं एव सम्बन्धः ।

१६. ज्योतिष्टोमे ''दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत'' इति श्रुतम् । तत्र दर्शपूर्णमासकर्म-ज्योतिष्टोमकर्मणोरङ्गाङ्गिभावार्थोऽयं सम्बन्ध इति न मन्तव्यम् । किन्तु कालार्थ एव सम्बन्धः ।

१७. काम्येष्टिकाण्डे ''वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते'' इति प्रकृत्य श्रूयते ''यस्मिन् जात एतामिष्टिं निर्वपति स पूत एव तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवति'' इति । तत्र पूतत्वादिकं फलमिति स्थिते तत्फलं पितुरेवेति न मन्तव्यम् । किन्तु पुत्रस्यैव ।

१८. पुत्रफलार्थेयमिष्टिरिति स्थिते जननानन्तरमेवेयमिष्टिः कार्येति न मन्तव्यम् । किन्तु जातकर्मा-नन्तरमेव ।

१८. **वर्णकान्तरम्** सेयमिष्टिर्जातकर्मानन्तरमेव कार्येति न मन्तव्यम् । किन्तु आशौचापगमे मुख्ये पौर्णमास्यादिकाल एव कर्तव्या ।

१९. ''वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत'' इत्यत्र बृहस्पतिसवसमानधर्मकं कर्मान्तरं

वाजपेयाङ्गमिति प्रागुक्तम्। बृहस्पतिसवोऽङ्गिना सह तत्काल एव कर्तव्य इति न मन्तव्यम्। किन्तु वसन्तरूपस्वकाल एव।

अथ चतुर्थे प्रयोज्यप्रयोजकभावाध्याये जघन्याङ्गानां प्रधानफलप्रयुक्तत्वपादश्चतुर्थः

१. ''अनुमत्यै पुरोडाशमष्टाकपालं निर्वपति'' इत्यादौ सोमयागा इष्टयो दर्वीहोमाः पशुयागा अयागा विदेवनादयश्च श्रुताः। तान् प्रकृत्य ''राजा राजसूयेन स्वाराज्यकामो यजेत'' इति श्रूयते। तत्र यागा अयागाश्च समप्रधानाः सन्तः स्वाराज्यफलेनैव प्रयुज्यन्त इति न मन्तव्यम्। किन्तु यागानामेव फलसाधनत्वेन फलप्रयोज्यत्वम्। अयागानान्तु यागसाधनत्वेन फलप्रयोज्यत्वाभाव एव।

२. अयागानां यागाङ्गत्वे सिद्धे विदेवनादयोऽभिषेचनीयाङ्गभूता एवेति न मन्तव्यम्। किन्तु राजसूयशब्दितसर्वयागाङ्गभूता एव।

३. राजसूये आम्नातेषु दशसु हविष्षु मध्ये अष्टमनवमदशमहविषां सौम्यत्वाष्ट्रवैष्णवानां त्रयाणां विषये इदं श्रूयते ''पुरस्तादुपसदां सौम्येन प्रचरन्ति'' इत्यादि। तत्र सौम्यादीन्युपसदङ्गानि ताभिः प्रयुज्यन्त इति न मन्तव्यम्। किन्तु फलार्थान्येव।

४. काम्येष्टिकाण्डे ''वैश्वदेवीं साङ्ग्रहिणीं निर्वपेद्ग्रामकामः'' इति श्रुतां काम्येष्टिं प्रकृत्य श्रूयते ''आमनस्यामनस्य देवा इति तिस्र आहुतीर्जुहोति'' इति। तत्र ग्रामकामपदानुषङ्गेण फलार्था एव होमा इति न मन्तव्यम्। किन्तु साङ्ग्रहिणीष्टयङ्गमेवामनहोमाः।

५. ज्योतिष्टोमे श्रूयते ''यां वै काश्चिदध्वर्युश्च यजमानश्च देवतामन्तरितस्तस्या आवृश्च्येते यत्प्राजापत्यं दधिग्रहं गृह्णीयाच्छमयत्येवैनाम्'' इति। तत्र क्षोभशान्तिरूपफलप्रयोजनको देवतान्तरायनिमित्तको दधिग्रहो नैमित्तिक एवेति न मन्तव्यम्। ज्येष्ठत्वश्रवणान्नित्योपीति न मन्तव्यम्। किन्तु नित्य एव।

६. ''य एव विद्वानग्निं चिनुते'' इत्युक्ताग्निचयने ''यो वै संवत्सरमुख्यमभृत्वाऽग्निं श्चिनुते यथा सामिगर्भो विपद्यते तादृगेव तदाऽऽर्तिमार्च्छेत्। वैश्वानरं द्वादशकपालं पुरस्तान्निर्वपेत्'' इति श्रुता वैश्वानरेष्टिर्नित्येति न मन्तव्यम्। किन्तु नैमित्तिक्येव।

७. ''य एवं विद्वानग्निं चिनुते'' इत्युक्ताग्नौ ''संवत्सरो वा एनं प्रतिष्ठायै नुदते योऽग्निं चित्वा

प्रतितिष्ठति। पञ्च पूर्वाश्रितयो भवन्ति। अथ षष्ठीं चितिं तनुते'' इति श्रुता षष्ठी चितिरपि नित्येति न मन्तव्यम्। किन्तु नैमित्तिक्येव।

८. ''अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्ति'' इति श्रुतोऽनारभ्याधीतः पिण्डपितृयज्ञो दर्शाङ्गं सत्तेन प्रयुज्यत इति न मन्तव्यम्। किन्तु फलकल्पनया पुरुषार्थ एव।

९. ज्योतिष्टोमे ''त्रिवृता यूपं परिवीयाऽग्नेयं पशुमुपाकरोति'' इति श्रुता रशना पश्वङ्गं सती पशुना प्रयुज्यत इति न मन्तव्यम्। किन्तु यूपाङ्गं सती यूपेन प्रयुज्यते।

१०. अग्नीषोमीयपशौ श्रूयते ''यूपस्य स्वरुं करोति'' इति ''स्वरुणा पशुमनक्ति'' इति च। तत्र श्रुतः स्वरुर्यूपार्थः। तस्य पश्वञ्जनं प्रतिपत्तिरिति न मन्तव्यम्। किन्त्वञ्जनद्वारा पश्वङ्गमेव।

११. दर्शपूर्णमासयोः कालसंयोगरहिता आघारादयस्तत्सहिता आग्नेयादयश्च पठिताः। तेषां सर्वेषां फलसम्वन्धेन प्राधान्यमिति न मन्तव्यम्। किन्तु कालसम्वन्धयोगिनामाग्नेयादीनां षण्णामेव।

१२. ''ज्योतिष्टोमेन स्वर्गकामो यजेत'' इत्यस्य प्रकरणे श्रुतानामिष्टिपशुसोमानां सर्वेषां फलसम्वन्धेन प्राधान्यमिति न मन्तव्यम्। किन्तु सोमयागस्यैव।

अथ पञ्चमे प्रयोज्यकर्मक्रमाध्याये श्रुत्याद्यवगतक्रमपादः प्रथमः

१. वेदे पदार्थानां यः क्रमो विहितः स एव क्रम आश्रयणीय इति न नियम इति न मन्तव्यम्। किन्तु स एव क्रम आश्रयणीयः।

१. **द्वितीयं वर्णकम्** क्रमो न विधेय इति न वक्तव्यम्। किन्तु विधेय एव।

१. **तृतीयं वर्णकम्** द्वादशाहे सत्रे ''अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति। तत उद्गातारम्, ततो होतारम्'' इति। श्रुतः क्रमः पाठप्रमाणक इति न मन्तव्यम्। किन्तु श्रुतिप्रमाणक एव।

२. ''अग्निहोत्रं जुहोति'' ''यवागूं पचति'' इत्यत्र होमयवागूपाकयोः क्रमोऽनियत इति न मन्तव्यम्। किन्तु यवाग्वा होमद्रव्यत्वाद्यवागूपाकानन्तरमेव होम इति क्रमोऽर्थप्राप्तो नियत एव।

३. दर्शपूर्णमासप्रकरणे यजमानकाण्डे पञ्चप्रयाजानामनुमन्त्रणमन्त्रा ''वसन्तमृतूनां प्रीणामि'' इत्यादयः पठिताः। शाखान्तरे च ''एको ममैका तस्य'' इत्यादिर्मन्त्रः पठितः। तत्र तैत्तिरीयगतेन ''वसन्तमृतूनाम्'' इत्यनेन समिन्नामा प्रथमप्रयाजः प्रथमं येन यजमानेनाभि-

मन्त्रितस्तेन यजमानेन तैत्तिरीयगतेनैव ''ग्रीष्ममृतूनां प्रीणामि'' इत्यनेन द्वितीयः प्रयाजः प्रथममभिमन्त्रणीयः। पश्चाच्छाखान्तरगतेन ''द्वौ मम'' इत्यनेनाभिमन्त्रणीय इति नियम इति न मन्तव्यम्। किन्तु नियामकाभावादनियम एव।

४. ''समिधो यजति'' इत्यादिना क्रमेण पठितानां पञ्चप्रयाजानामनियतक्रमेणानुष्ठानमिति न मन्तव्यम्। किन्तु पाठक्रमादेवानुष्ठानक्रमो नियत एव।

५. वाजपेये ''सप्तदश प्राजापत्यान् पशूनालभते'' इति श्रुतम्। ते च पशवः ''वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्ति'' इत्यनेनैककालकर्तव्यतया चोदिताः। तेषु च पशुषूपाकरणादयः प्रतिपश्वावर्तनीयाः। तेषामुपाकरणादीनामावृत्तिरेकस्मिन् पशौ कात्स्न्र्येन कृत्वाऽन्यस्यापि तथैव कार्यमिति न भवति। किन्तूपाकरणादयः क्रमेणैव सर्वेषु पशुषु कार्याः। तत्रोपाकरणं येन क्रमेण कृतं तेनैव क्रमेण नियोजनादिकमपि कर्तव्यमिति नियम एव। न त्वनियमः।

६. ज्योतिष्टोमप्रकृतिके चोदकप्राप्तत्रिपशुके साद्यस्के ''सह पशूनालभते'' इत्यनेन पशुत्रयं सहालभ्यते। सहकरणञ्च सवनीयस्थान एवेति स्थितम्। तत्र प्रतिपशु कर्तव्यतया प्राप्तानामुपाकरणादीनां क्रमोऽनियत इति वा अग्नीषोमीयपशावादावुपाकरणादिरिति वा न मन्तव्यम्। किन्तु सवनीयस्यैवोपाकरणादि प्रथमं स्थानान्निर्णीयते।

७. चित्रायागे सप्तानां हविषां मध्ये चतुर्थपञ्चमे समाम्नायेते ''सारस्वतौ भवतः। एतद्वै मिथुनं यत्सरस्वती सरस्वांश्च'' इति। तत्र निर्वापोऽनियमेन कर्तव्य इति न वाच्यम्। स्त्रीदैवत्ययागस्यैव प्रथमं निर्वापः।

८. क्रमप्रमाणेषु बलाबलचिन्ता प्रस्तूयते। दर्शपूर्णमासप्रकरणे उपांशुयाज आज्यहविष्कः पुरोडाशद्रव्यकोऽग्नीषोमीययागश्च क्रमेणाम्नातः। आज्यधर्मा उत्पवनादयः पुरोडाशधर्मा अवघातादयश्च क्रमेणाम्नाताः। तत्र मुख्यक्रमेणाऽऽज्यधर्माणां प्रथममनुष्ठानमिति न मन्तव्यम्। पाठक्रमेण पुरोडाशधर्माणामेव।

९. अग्नीषोमीययागस्तैत्तिरीये द्वितीयकाण्डे पञ्चमप्रपाठके द्वितीयानुवाके पठितः। आग्नेययागस्तु षष्ठे प्रपाठके तृतीयानुवाके पठितः। अयञ्च वेदभागो ब्राह्मणमित्युच्यते। होतृकाण्डे आग्नेययाज्यानुवाक्ये प्रथमं पठिते। अग्नीषोमीययाज्यानुवाक्ये अनन्तरं पठिते। तत्र ब्राह्मणवाक्यक्रमादग्नीषोमीयस्य प्राथम्यं प्रकल्प्य तदनुरोधेनैव याज्यानुवाक्यानां क्रमः कल्पनीय इति न वाच्यम्। किन्तु याज्यानुवाक्यापाठक्रमेणैवनुष्ठानम्।

१०. अध्वरकल्पाख्येष्टौ त्रीणि हवींषि श्रूयन्ते । तत्राऽऽज्यधर्माणामेव प्रथममनुष्ठानमिति न मन्तव्यम् । किन्तु चरुधर्माणामेव ।

११. चातुर्मास्येषु साकमेधाख्ये पर्वणि ''अग्नयेऽनीकवते प्रातरष्टाकपालं निर्वपेत्'' इत्यादिना तिस्र इष्टयो दर्शपूर्णमासविकृतयश्चोदिताः । ताश्चेष्टयः प्रकृतिवद्व्यहकालाः स्युरिति न मन्तव्यम् । किन्त्वेकाहा एव ।

१२. अग्नीषोमीयपशौ प्रयाजानामपकर्षः ''तिष्ठन्तं पशुं प्रयजन्ति'' इत्यनेन श्रुतः । तथा सवनीयपशौ ''अग्निमारुतादूर्ध्वमनुयाजैश्चरन्ति'' इत्यनेनानुयाजानामुत्कर्षः श्रुतः । तत्रोत्कर्षापकर्षावनुयाज प्रयाजमात्रयोरेवेति न मन्तव्यम् । किन्तु प्रयाजान्तस्यानुयाजाद्यस्याङ्गकलापस्यैवापकर्षोत्कर्षौ ।

१३. सोमे प्रातरनुवाकः प्रचरणीयहोमादयः केचन सौमिकाः पदार्थाः सवनीयपुरोडाशाश्च क्रमेण पठिताः । ते च चोदकप्राप्तनिर्वापादिसर्वाङ्गयुक्ताः कार्याः । तेषु ये निर्वापालङ्करणमध्यवर्तिनः प्रोक्षाणादयस्ते प्रतिप्रस्थात्रा निर्वापे कृते अध्वर्युणा तदैव कार्या इत्यत्र नियामकाभावा-दलङ्करणप्रैषात्पूर्वं वा निर्वापानन्तरं वा कार्या इत्यनियम इति न वक्तव्यम् । किन्तु निर्वापानन्तरमेव कार्याः ।

१४. ज्योतिष्टोमे अग्नेराग्नीध्रीये सोमस्य हविर्धाने प्रणयनादूर्ध्वं सुत्यादिनात्पूर्वमौपसथ्ये दिने आम्नातो यूपच्छेदः ''दीक्षासु यूपं छिनत्ति'' इत्यनेन दीक्षाकाले अपकृष्टः । तत्र यूपापकर्षे तत्पूर्व-भाविनामग्नीषोमीयप्रणयनादीनामप्यपकर्ष इति न वाच्यम् । किन्तु यूपच्छेदनमात्रस्य ।

१५. सवनीयपशुर्हि सवनत्रयव्यापी । सवनीयपुरोडाशे पिष्टलेपफलीकरणहोमौ चोदकेन प्राप्तौ । तौ च प्रकृताविवहानुयाजोत्तरभाविनौ । अनुयाजानामुत्कर्षे तयोरप्युत्कर्ष इति न मन्तव्यम् । किन्तु तयोः स्वस्थान एवानुष्ठानम् ।

१६. दर्शपूर्णमासयोः पुरोडाशस्य कपालेषु श्रपितस्य भस्मानाऽऽच्छादनमाम्नातम् । ततो वेदिराम्नाता । तथैव पौर्णमासीयागे प्रतिपद्यनुष्ठानं कृतम् । दर्शयागे न वेदेरपकर्ष आम्नायते । सा च वेदिरपकृष्यमाणा अभिवासनान्तान् पूर्वपदार्थानपकर्षत्येवेति न वाच्यम् । किन्तु नापकर्षः पूर्वपदार्थानाम् ।

१७. चातुर्मास्येषु साकमेधाख्ये तृतीये सान्तपनेष्टिः श्रूयते । ताञ्चेष्टिं समाप्य सायङ्काले अग्निहोत्रमनुष्ठीयते । सा चेष्टिर्यदि दैवान्मानुषाद्वा प्रतिवन्धादुत्कृष्टा तदा अग्निहोत्रमप्युत्कृष्यत इति न वाच्यम् । किन्तु नोत्कृष्यते ।

१८. ज्योतिष्टोमे तृतीयसवने सूर्यास्तमयात्प्रागेवोक्थ्यग्रहास्त्रयो गृह्यन्ते। तेभ्यः परस्ताच्छोडशिग्रहो गृह्यते। उक्थ्यग्रहाणामुत्कर्षे षोडशिग्रहस्यानुत्कर्ष इति न वाच्यम्। किन्तूत्कर्ष एव।

अथ पञ्चमे प्रयोज्यकर्मक्रमाध्याये क्रमविशेषचिन्तापादो द्वितीयः

१. वाजपेये श्रुतानां सप्तदशपशूनामेककालकर्तव्यानामग्नीषोमीयतश्चोदकतः प्राप्ता उपाकरणादयः पशुसंस्काररूपा धर्माः प्रतिपशु भेदेन कर्तव्याः। ते चैकस्य पशोः कात्स्न्र्येन कृत्वा ततोऽपरस्य कर्तव्या इत्येवं काण्डानुसमय इति न वाच्यम्। किन्तु सर्वेषां पशूनां क्रमेणोपाकरणं कृत्वा ततो नियोजनादीनि कार्याणीति पदार्थानुसमय एव।

२. दर्शपूर्णमासप्रकरणे आग्नेयाग्नीषोमीयपुरोडाशाङ्गतया ''चतुरो मुष्टीर्निर्वपति'' इति निर्वापौ श्रुतौ। तत्रैकैकमुष्टिना निर्वाप इत्येकैकेन पदार्थेनानुसमयः। एवं ''कपालान्युपदधाति'' ''द्विर्हविषोवद्यति'' ''त्रिरंक्ते'' ''त्रिरभ्यंक्ते'' क्षुरेण त्रिर्वपति। ''एकविंशत्या पावयति'' ''इत्यायादावपि पदार्थानुसमय एवेति न मन्तव्यम्। विशिष्टपदार्थेनानुसमय एव।

३. निर्वापयोर्द्वित्वविशिष्टयोरवदानस्यैकपदार्थत्वे स्थिते आग्नेयस्य द्विरवदानं कृत्वा तद्धोमात्प्रागेवाग्नीषोमीयस्य द्विरवदानमिति न मन्तव्यम्। किन्तु द्विरवदानमात्रं नैकः पदार्थः। होमपर्यन्तमेकः पदार्थ इति होमान्तेनानुसमय एव।

४. ज्योतिष्टोमे अग्नीषोमीयपशौ श्रुता यूपस्य घृतेनाञ्जनमित्यादयः पदार्थाः यूपगणे चोदकप्राप्ता एकैकेनाञ्जनादिनाऽनुसमेतव्या इति न वक्तव्यम्। किन्तु संस्कारसङ्घेनैवानुसमेतव्याः।

५. अग्नीषोमीयपशौ प्रधानदेवतार्थानि स्विष्टकृदर्थानि इडाभक्षणार्थानीति त्रीण्यवदानानि प्रकृतौ क्रमेणानुष्ठीयन्ते। तानि च प्रजापतिरूपैकदेवताके सप्तदशपशूनां गणे चोदकप्राप्तानि। तत्रैकस्मिन् पशौ त्रीण्यपि कृत्वा पश्वन्तरे त्रीण्यपि कार्याणीति काण्डानुसमय एवेति न मन्तव्यम्। किन्तु पदार्थानुसमय एव।

६. राजसूये नानावीजप्रकृतिकहविष्केष्टिराम्नाता। तत्र नानावीजानामवघातायाजिनास्तरणादयः पदार्थाश्चोदकतः प्राप्ताः। तेषां पदार्थानुसमय इति न मन्तव्यम्। किन्तु काण्डानुसमय एव।

७. प्रकृतौ दर्शपूर्णमासयागे चतुर्गृहीतद्वयमुपभृति युगपद्ग्राह्यम्। तथैव विकृतावग्नीषोमीयपशौ प्राप्तम्। तत्र चानुयाजानां पृषदाज्यं श्रूयते। प्रयाजाज्यं त्वविकृतमेव वर्तते। तयोरसंकराय

प्रयाजहोमानन्तरं रिक्तायामुपभृति पृषदाज्यग्रहणेनानुयाजहोम इति पात्रैक्यमेवेति न मन्तव्यम्। किन्तु पात्रभेद एव।

८. अग्न्यादिदेवताककृत्तिकादिनक्षत्राणामिष्टयस्तदुपहोमाश्च श्रुताः। प्रकृतौ प्रधानानन्तरं नारिष्टहोमाः श्रुताः। ते इष्टिषु चोदकप्राप्ताः तत्र प्रधानहोमानन्तरमुपहोमान् विधाय पश्चान्नारिष्टहोमाः कार्या इति न मन्तव्यम्। किन्तु नारिष्टहोमानन्तरमेवोपहोमाः कार्याः।

९. राजसूये अभिषेचनीयाख्यसोमयागानन्तरं क्रमेण विदेवनराजन्यजयशौनःशेफाख्यानाभिषेका आम्नाताः। तत्राभिषेकोऽभिषेचनीयाख्यसोमयागे चोदकप्राप्ताङ्गमध्येऽपकृष्टः। स चापकृष्यमाणः प्राश्चि विदेवनादीनि नापकर्षतीति न मन्तव्यम्। किन्तु तान्यप्यपकर्षति।

१०. ''य एवं विद्वानग्निं चिनुते'' इत्युक्ताग्निचयनप्रकरणे सावित्रहोममुक्त्वा उखासम्भरणाद्य-पूर्वपदार्थानभिधाय दीक्षणीयादयः प्राकृताः श्रुताः। तत्र पश्चादुक्तानामपि दीक्षणीयादीनां प्रागनुष्ठानमिति न मन्तव्यम्। किन्तु सावित्रहोमस्यैव प्रागनुष्ठानम्।

११. अग्निचयन एव दीक्षणीयादेरूर्ध्वं रुग्मधारणं श्रुतम्। प्रकृतौ दीक्षणीयानन्तरं वपनादिसंस्कारा आम्नाताः। ते च संस्कारा रुग्मधारणानन्तरं कार्या इति न मन्तव्यम्। किन्तु रग्मधारणा-त्पूर्वमेव।

अथ पञ्चमे प्रयोज्यकर्मक्रमाध्याये प्राकृतपदार्थविवृद्ध्यादिपादस्तृतीयः

१. अग्नीषोमीयपशौ चोदकप्राप्तेषु पञ्चप्रयाजेषु ''एकादश प्रयाजान् यजते'' इति सङ्ख्याविवृद्धिः श्रूयते। सा चैकादशत्वसङ्ख्या प्रत्येकं प्रयाजानामिति न मन्तव्यम्। किन्तु चरमस्य प्रयाजस्य त्रित्वमवशिष्टानां चतुर्णां द्वित्वमित्यावृत्त्यैकादशत्वं सम्पादनीयम्।

३. दर्शपूर्णमासयोः सामिधेनीषु ''एकविंशतिमनुब्रूयात् प्रतिष्ठाकामस्य'' इति सङ्ख्याविवृद्धिः श्रुता। तत्र पठिताः सामिधेन्य एकादशैव। ''त्रिः प्रथमामन्वाह। त्रिरुत्तमाम्'' इति विधानात्पाञ्चदश्यं सम्पाद्यते। अवशिष्टानां षण्णां दाशतयीगतानामागमनेनैकविंशतित्वं पूरणीयम्। तत्रागन्तूनां षण्णामृचामन्ते निवेश इति न मन्तव्यम्। समिध्यमानवती-समिद्धवतीनामकर्चोर्मध्ये निवेश इत्यपि न मन्तव्यम्। किन्तु धाय्याशब्दितयोर्द्वयोरेव मध्ये निवेशः। अन्यासां चतसृणामन्ते।

४. ज्योतिष्टोमे प्रकृतौ वहिष्पवमानस्तोत्रे स्तोत्रीयेत्यादयस्त्यृचा भवन्ति । तेषु त्यृचेषु गानेन त्रिवृत्स्तोमोपि भवति । स च वहिष्पवमानो विकृतावतिरात्रे चोदकेन प्राप्तः । तत्र प्राकृतं त्रिवृत्स्तोमं वाधितुमेकविंशादिस्तोमा विहिताः । तत्र स्तोमसङ्ख्यापूरणाय त्यृचा आनेयाः । तत्रागन्तूनां त्यृचानां पर्यासाख्यप्राकृतोत्तमत्यृचात्प्रागेव निवेश इति न वक्तव्यम् । किन्त्वन्ते निवेशः ।

५. अतिरात्रे माध्यन्दिनपवमानार्भवपवमानयोश्चोदकप्राप्तौ पञ्चदशसप्तदशस्तोमौ बाधितुमेकविंशादिविवृद्धस्तोमोऽनुष्ठीयते । तत्र सामागमनेन सङ्ख्यापूरणम् । तत्रागन्तूनां साम्नामन्ते निवेश इति न मन्तव्यम् । किन्तु माध्यन्दिनार्भवपवमानयोर्यथाक्रमं ''उच्चा ते जातमन्धसः'' इति ''स्वादिष्ठया'' इति श्रुतयोर्गायत्रीछन्दस्कयोरेव गानमिति ।

६. अश्वदाभ्यग्रहौ सवनस्य, वज्रिण्यादीष्टकानि चितेश्च शेषाणीति न मन्तव्यम् । किन्तु ग्रहाः क्रत्वङ्गम् । इष्टकाश्चाग्न्यङ्गम् ।

७. चित्रिण्यादीनामिष्टकानामनारभ्याधीतानामन्ते निवेश इति न मन्तव्यम् । किन्तु मध्यमायामेव चितौ निवेशः ।

८. लोकम्पृणायाः प्रकरणपठितासु चरमाया इष्टकाया ऊर्ध्वं चित्रिण्यादीनामुपधानमिति न मन्तव्यम् । किन्तु पूर्वमेव निवेशः ।

९. अग्न्याधानप्रकरणे पठितानामग्निसंस्कारार्थानां पवमानेष्टीनामाधानादूर्ध्वं द्वादशसु दिनेषूत्कर्षः श्रूयते । तेषु दिनेष्वग्निहोत्रादिकं कार्यमिति न मन्तव्यम् । किन्त्वनन्तरमेव ।

१०. ''अग्निचिद्वर्षति धावेत्'' ''न स्त्रियमुपेयात्'' इत्यादीन्यग्निचितः श्रुतानि व्रतानि चयनानन्तरमेव कार्याणीति न मन्तव्यम् । किन्तु क्रत्वन्त एव कार्याणि ।

११. दीक्षासिद्धिर्दण्डेष्ट्यादिभिः समुच्चितैरेवेति न मन्तव्यम् । किन्त्विष्टचैव ।

१२. काम्ययागा ''ऐन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकामः'' इत्यादिनोक्ताः । तस्मिन् काण्डे नैमित्तिकयागा ''अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेद्यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वाऽतिपातयेत्'' इत्यादिनोक्ताः । ते यथापाठमनुष्ठेया इति न वक्तव्यम् । किन्तु कामोत्पत्तौ काम्यस्य निमित्तोत्पत्तौ नैमित्तिकस्य चानुष्ठानम् ।

१३. ज्योतिष्टोमे ''एष वा व प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमो, एतेनानिष्ट्वाऽथान्येन यजेत गर्ते पतितमेव तज्जीर्यते प्र वा मीयते'' इति श्रुतम् । तत्र एतेनेत्यनेन सप्तसंस्थाको ज्योतिष्टोमो निर्दिश्यत इति न मन्तव्यम् । किन्त्वग्निष्टोमसंस्थैव ।

१४. तत्रैव वाक्ये अन्येनेत्यनेनाग्निष्टोमान्यषट्संस्था एव निर्दिश्यन्त इति न वक्तव्यम् । किन्तु क्रत्वन्तराण्यपि ।

१५. स एवान्यशब्द एकस्तोममात्रपर इति न मन्तव्यम् । किन्तु सर्वक्रतुपर एव ।

अथ पञ्चमे प्रयोज्यकर्मक्रमाध्याये क्रमप्रमाणबलाबलचिन्तापादश्चतुर्थः ।

१. श्रुत्यर्थाभ्यां पाठस्य विरोधे बलाबलचिन्ता । ज्योतिष्टोमे आश्विनग्रहस्तृतीयस्थाने पठितः । ''आश्विनो दशमो गृह्यते'' इति वाचकश्रुत्या च तस्य दशमस्थानत्वं प्राप्यते । तथा ''अग्निहोत्रं जुहोति'' ''यवागूं पचति'' इति पाठक्रमः । अर्थशब्दितप्रयोजनवशाद्यवागूपाकानन्तरमग्निहोत्रं प्राप्यते । तत्र श्रुतेरर्थाच्च पाठक्रमस्य दौर्बल्याच्छ्रुत्यर्थलब्धः क्रम एवादर्तव्यः । न तु पाठलब्धः ।

२. प्रवृत्तिक्रममुख्यक्रमयोर्बलाबलचिन्ता । दर्शपूर्णमासयोः सान्नाय्यधर्मा वत्सापाकरणादयः प्रथममाम्नाताः । पश्चादाग्नेयधर्माः पुरोडाशनिर्वापादय आम्नाताः । तेनैव पाठक्रमेण धर्मानुष्ठानं प्रवृत्तम् । प्रदानन्त्वाग्नेयस्य याज्यावाक्यानुक्रमात्प्रथमं सान्नाय्यस्य पश्चादित्युक्तम् । तथाऽवदानादिप्रक्षेपान्त एकः पदार्थ इत्यप्युक्तम् । तत्र स्विष्टकृदवदानं प्रयाजशेषाभिघारणं वेद्यामासादनञ्चानियमेन वा प्रवृत्तिक्रमानुसारेण सान्नाय्य एव वा कर्तव्यमिति न मन्तव्यम् । किन्तु मुख्यक्रमेणाग्नेय एव ।

३. ''दर्शपूर्णमासाविष्ट्वा सोमेन यजेत'' इति श्रुतं सोमस्येष्टिपूर्वकत्वमेवेति न मन्तव्यम् । किन्तु सोमेष्ट्योरनियतं पौर्वापर्यम् ।

४. सोमस्येष्टिपूर्वकत्वमिष्टेः सोमपूर्वकत्वमिति कल्पद्वये ब्राह्मणकर्तृकेष्टौ क्षत्रवैश्ययोरिव कल्पद्वयमपीति न मन्तव्यम् । किन्तु दर्शपूर्णमासयोः सोमपूर्वकत्वं नियतमिति द्वितीयपूर्वपक्षे स्थिते,

५. तृतीयपूर्वपक्षं सिद्धान्तं वाऽकृत्वा मध्ये चिन्तान्तरमारभते सूत्रकारः । ''सोमेन यक्ष्यमाणोऽग्नीनादधीत । नर्तून् सूर्क्षेन्न नक्षत्रम्'' इत्यत्रोक्तो ऋतुनक्षत्रप्रतीक्षाभाव आधानस्येति न मन्तव्यम् । किन्तु सोमस्यैव । सोमस्य दर्शपूर्णमासानन्तर्यपक्षे आधानस्य क्रतुनक्षत्रप्रतीक्षाभावः ।

"आग्नेयो वै ब्राह्मणः" इति वचने पौर्णमासत्रिकस्यैव श्रवणात्तन्मात्रस्य सोमपूर्वकत्वं नियतम्। दर्शे तु विकल्प एव। अतो द्वितीयः पक्षो न युक्त इति तृतीयः पक्षः। अयमपि पक्षो न युक्तः। किन्त्वग्नीषोमीयहविर्मात्रस्य ब्राह्मणस्य सोमपूर्वकत्वं नियतमिति सिद्धान्तः।

६. अग्नीषोमीयस्योत्कर्ष इति प्रागुक्तम्। तत्रोपांशुयाजाज्यस्याप्यग्नीषोमदैवत्यत्वात्तस्याप्युत्कर्ष इति न मन्तव्यम्। किन्तु नाज्यस्योत्कर्षः।

७. ऐन्द्राग्नसौर्यादयो विकृतयो द्व्यहकाला इति न मन्तव्यम्। किन्तु सद्यस्काला एव।

८. आमिक्षादिसान्नाय्यविकारोऽग्नीषोमीयादिपुरोडाशविकारश्च सोमात्प्रागूर्ध्वश्चेत्यनियम इति न वाच्यम्। किन्तु सोमादूर्ध्वमेवेति नियम एव।

९. गवादिनामकाः सोमविकारा एकाहा दर्शपूर्णमासाभ्यां प्रागूर्ध्वश्च भवन्तीति न मन्तव्यम्। किन्तु दर्शपूर्णमासेष्टित ऊर्ध्वमेव सोमविकारा भवेयुः।

अथ षष्ठेऽधिकाराध्याये अधिकारिपादः प्रथमः

१. कर्तृत्ववतः फलाभावात्फलभोक्तृत्वरूपाधिकाराभावान्नारम्भणीयमधिकारलक्षणमिति न वाच्यम्। फलसत्त्वादस्त्येवाधिकार इत्यारम्भणीयमेव।

२. समस्ताङ्गोपसंहाराशक्तानामन्धादीनामप्यस्त्यधिकार इति न मन्तव्यम्। मनुष्याणां तत्रापि शक्तानामेवाधिकारः।

३. पुरुषाणामेवाधिकारो न स्त्रीणामिति न मन्तव्यम्। स्त्रीणामप्यस्त्यधिकारः।

४. दम्पत्योः प्रत्येकयोरप्यधिकार इति न मन्तव्यम्। किन्तु मिलितयोरेव।

५. आधानं प्रकृत्य श्रूयते "जायापती अग्निमादधीयाताम्" इत्यादि। तत्र द्वयोः सपत्नीकयोः सहितयोः पुरुषयोराधानाधिकार इति न मन्तव्यम्। किन्त्वेकस्यैव सपत्नीकस्य।

६. सूर्योपस्थानानुमन्त्रणादिकं दम्पतिकर्तृकमिति न मन्तव्यम्। किन्तु पुरुषद्वयकर्तृकम्।

७. अग्निहोत्रादिकर्मसु चतुर्णामपि वर्णानामधिकार इति न मन्तव्यम्। किन्तु शूद्रभिन्नानामेव।

८. अद्रव्यस्य यागे नाधिकार इति न मन्तव्यम्। याञ्चया सम्पादितद्रव्यस्याप्यस्त्यधिकारः।

९. अक्षिरोगादिना अङ्गवैकल्यं प्राप्तस्य नाधिकार इति न मन्तव्यम् । ओषधादिना समाधेयाङ्गहानेः पुरुषस्यास्त्यधिकारः ।

१०. असमाधेयाङ्गहानेः पुरुषस्य नास्ति सर्वत्राधिकार इति न मन्तव्यम् । काम्यकर्मण्यधिकाराभावेपि नित्यकर्मण्यस्त्येवाधिकारः ।

११. दर्शपूर्णमासयोः आङ्गिरसवार्हस्पत्यभारद्वाजगोत्रोहमित्यादिरूपेण ऋषित्रयसम्बन्धविषयमेवोच्चारणं कर्तव्यम् । अतस्त्र्यार्षेयाणामेवाधिकारः । न न्यूनार्षेयाणाम् । नाप्यधिकार्षेयाणाम् ।

१२. वर्षर्तौ चतुर्वर्णातिरिक्तस्य रथकारस्याप्यस्त्याधानाधिकारः ।

१३. रौद्रयागे त्रैवर्णिकभिन्नस्य निषादस्यैवाधिकारः ।

अथ षष्ठे अधिकाराध्याये अधिकारिधर्मपादो द्वितीयः

१. ''ऋद्धिकामाः सत्रमासीरन्'' इति श्रुते सत्रयागे ''सप्तदशावराः सत्रमासीरन्'' इत्यनेन वहवः कर्तारः श्रुताः । तत्र कर्तृत्वस्य समुदायगतत्वात्फलं कृत्स्नं प्रत्येककर्तृगतं नेति न वक्तव्यम् । किन्त्वेकैक एव दर्शपूर्णमासादिकर्ता ।

३. काम्यकर्मणि वैदिके प्रक्रान्ते फलप्राप्त्या निमित्तान्तरेण वा फलेच्छायां निवृत्तायामपि तत्कर्म समापनीयमेव ।

४. वैदिककर्मवत्स्वगृहनिर्माणादिकर्मणो लौकिकस्य प्रक्रान्तस्य न समापननिर्वन्धः ।

५. ''न कलञ्जं भक्षयेल्लशुनं गृञ्जनम्'' इत्यादावनारभ्य श्रुतो भक्षणाभावसङ्कल्पः स्वर्गकामिन एव नान्यस्येति न मन्तव्यम् । किन्तु रागप्राप्तभक्षणस्यैव निषेधः प्रत्यवायपरिहाराय विधीयते ।

६. ''प्राङ्मुखो भुञ्जीत'' ''उदङ्मुखो मूत्रपुरीषं कुर्यात्'' इति स्मार्तनियमोप्युपनीतानुपनीतसर्वाधिकारिक इति न मन्तव्यम् । किन्तूपनीताधिकारिक एव ।

७. ''यावज्जीवमग्निहोत्रं जुहोति'' इत्यादौ श्रुतमग्निहोत्रादिकं न सन्ततमनुष्ठेयम् । किन्तु स्वस्वकाल एव ।

८. अग्निहोत्रादि प्रागुक्तकर्म नावर्तनीयमिति न वक्तव्यम् । किन्त्वावर्तनीयमेव ।

९. दर्शपूर्णमासयोः ''भिन्ने जुहोति'' ''स्कन्ने जुहोति'' इत्यत्र श्रुतो नैमित्तिको होमो भेदादेर्निमित्तस्यावृत्तावावर्तते।

१०. ''गुरुरनुगन्तव्योऽनुवाद्यश्च'' इत्यादौ गुर्वनुगमनादीनामाचारप्रमाणकानां गुरुगमनादिनिमित्तकानां सकृदसकृद्धा तत्प्रीत्यनुसारेण स्वेच्छया कर्तव्यतेति न वक्तव्यम्। किन्तु निमित्तावृत्तावावर्तनीयान्येव।

अथ षष्ठे अधिकाराध्याये प्रतिनिधिसदसद्भावपादस्तृतीयः

१. ''यावज्जीवमग्निहोत्रं जुहोति'' इत्यादौ श्रुते नित्ये नैमित्तिके च कर्मणि सर्वाङ्गोपसंहाराशक्तस्य नाधिकार इति न मन्तव्यम्। किन्तु यथाशक्त्यङ्गानुष्ठानेनाप्यस्त्यधिकारः।

२. काम्ये कर्मणि सर्वाङ्गोपसंहाराशक्तस्य नाधिकारः।

३. दर्शपूर्णमासादिषु श्रुतव्रीह्यादिद्रव्यापचारे नीवारादिद्रव्यान्तरमुपादीयमानं तेषां कर्मान्तरत्वमापादयतीति न वाच्यम्। किन्तु क्रियैक्यमेव।

४. नित्यकाम्यकर्मणोः श्रुतद्रव्यालाभे द्रव्यान्तरं प्रतिनिधाय न प्रयोक्तव्यमिति न मन्तव्यम्। किन्तु प्रयोक्तव्यमेव प्रतिनिधाय।

५. देवताग्निमन्त्रक्रियाणां विस्मरणादिना अपचारे देवतादीनां न प्रतिनिधिरस्ति।

६. ''मौद्गं चरुं निर्वपेच्छ्रीकामः'' इत्यत्र मुद्गाभावे माषाद्या ''अयज्ञिया वै माषाश्चणकाः कोद्रवाः'' इति निषिद्धा न प्रतिनिधेयाः।

७. यजमाने प्रोषिते कार्यान्तरव्यापृते मृते वा तत्कार्यकरणाय नान्यः प्रतिनिधेयः।

८. ''सप्तदशावराः सत्रमासीरन्'' इति सत्रे श्रुतेषु सप्तदशसु प्रवृत्तेष्वेकस्मिन् मृते तत्स्थाने अन्यः प्रतिनिधेय एव।

९. सत्रे आनीतः प्रतिनिधिर्न स्वामी। किन्तु फलकामनारहितस्यैव ऋत्विग्वत्प्रवृत्तिः।

१०. सत्रे आनीतस्यापि प्रतिनिधेर्वपनब्रह्मचर्यव्रतादयः फलसंस्काराः कार्या एव।

११. श्रुतव्रीह्यादिद्रव्यापचारे तत्सदृशस्यैव नीवारादेः प्रतिनिधित्वेनोपादानम्।

१२. वैकल्पिकेषु व्रीहियवादिषु व्रीहिभिः प्रक्रान्ते प्रयोगे तेषामपचारे व्रीहिसदृशमेवोपादेयम्।

१३. ''यदि सोमं न विन्देत्पूतिकानभिषुणुयात्'' इत्यत्र सोमस्येव तदभावे पूतीकस्यापि यागसाधनत्वेन विधानमिति न मन्तव्यम्। किन्तु प्रतिनिधिनियम एवायम्।

१४. प्रतिनिधिनोपक्रान्ते तस्यापचारे प्रतिनिधिसदृशमेवोपादेयमिति न मन्तव्यम्। किन्तु मुख्य-सदृशमेव।

१५. श्रुतेन पूतीकेन प्रकान्ते तस्मिन्नपचरिते तत्सदृशमेवोपादेयमिति न मन्तव्यम्। तत्रापि सोमसदृशमेवोपादेयम्।

१६. मुख्यं व्रीह्याद्यलभ्यं मत्वा प्रतिनिधिना नीवारादिना प्रक्रान्ते प्रयोगे यदि मध्ये मुख्यं लब्धं तदा मुख्यमादायैव समापनं कार्यम्।

१७. खदिरमलब्ध्वा तत्प्रतिनिधौ कदरे तक्षणादिना संस्कृते सति पश्चान्मुख्यः खदिरो यदि पशुनियोजनात्प्राग्लभ्यते तदा मुख्ये खदिरे तक्षणादिभिः संस्कृते पशुर्नियोज्यः।

१८. संस्कृते कदरे पशुनियोजनानन्तरं मुख्ये खदिरे लब्धे स न ग्राह्यः।

१९. तनुत्वात्तक्षणादिसंस्कारायोग्यः पशुनियोजनयोग्यश्च खदिरो लब्धः कदरश्च महांस्तदा संस्कार-हीनोपि खदिर एव ग्राह्यः।

२०. यदा तनुत्वात्तक्षणादिसंस्कारपशुनियोजनयोरयोग्यः खदिरो लब्धस्तदा कदर एव पशुनियोजन-योग्यः सर्वसंस्कारोपेतो ग्राह्यः।

२१. दर्शपूर्णमासयोर्यदा अश्वशफपरिमाणाय स्विष्टकृदादिशेषकार्यार्थश्चापर्याप्ताः पुरोडाशजातिमात्र-व्यक्तिसमर्था अल्पव्रीहयो लब्धास्तदा शेषकार्यपरिलोपेनापि व्रीहिभिरेव पुरोडाशाः कार्याः।

अथ षष्ठे अधिकाराध्याये द्रव्यापचारनिमित्तकप्रायश्चित्तपादश्चतुर्थः

१. दर्शपूर्णमासयोः पुरोडाशावदने ''मध्यादवद्यति'' ''पूर्वार्धादवद्यति'' इति श्रूयते। यदा तस्यावत्तस्य नाशदोषापहारादि भवति तदा अवशिष्टपुरोडाशादेव पुनरवदायाधिक्रियत इति न युक्तम्। किन्तु ''यस्य सर्वाणि हवींषि नश्येयुर्दुष्येयुरपहरेयुर्वा आज्येनैता देवता विपरिसङ्ख्याय यजेत'' इति वचनविहिताज्येनैवाधिक्रियते।

२. स्विष्टकृदिडाभक्षणाद्यर्थमवत्तस्य नाशे अवशिष्टात्पुनरवदाय स्विष्टकृदादिसंस्कारः कार्य इति न मन्तव्यम्। किन्तु नावशिष्टादवदेयम्।

३. दर्शपूर्णमासयोश्चत्वार ऋत्विजः। तत्र श्रुता भक्षा ऋत्विग्भ्योऽन्यैः प्रकरणस्थैः कार्या इति न मन्तव्यम्। किन्तु यजमानसहितानामृत्विजामेव भक्षणम्।

४. दर्शपूर्णमासयोः कपालं प्रकृत्य श्रूयते ''भिन्ने जुहोति'' इति। तत्र कृत्स्नकपालभङ्गमात्रे वा कपालैकदेशभेदमात्रे वा होमोयमिति न मन्तव्यम्। किन्तु कृत्स्नभेदे एकदेशभेदे चायं होमः।

५. दर्शपूर्णमासयोः ''यस्य पुरोडाशौ क्षायतस्तं यज्ञं वरुणो गृह्णाति'' इत्यादिनोक्तस्तस्यैव यागस्य पुनःप्रयोगः पुरोडाशैकदेशसर्वांशदाहयोरुभयोरपि भवतीति न मन्तव्यम्। किन्तु सर्वदाह एव।

६. दर्शपूर्णमासयोः ''यस्य सायं दुग्धमार्तिमार्छेत्'' इत्यादिना दोहार्तिं प्रकृत्य श्रूयते ''यस्योभयं हविरार्तिमार्छेदैन्द्रं पञ्चशरावमोदनं निर्वपेत्'' इति। तत्रोभयहविरार्तविवेदं प्रायश्चित्तमिति न मन्तव्यम्। किन्त्वन्यतरहविरार्तावुभयहविरार्तौ वेदं प्रायश्चित्तम्।

७. ''हविर्धाने ग्रावभिरभिषुत्याऽऽहवनीये हुत्वा प्रत्यञ्चः संहताः परेत्य सदसि भक्षान् भक्षयन्ति'' इत्यत्राभिषवहोमयोः प्रत्येकमेव भक्षनिमित्तत्वमिति न मन्तव्यम्। किन्तु होमाभिषवकर्तुर्भक्षणं प्रत्यङ्गत्वविधिरेव।

८. ''यस्योभावग्नी अनुगतावभिनिम्लोचेदभ्युदियाद्वा पुनराधेयं तस्य प्रायश्चित्तिः'' इत्यत्रान्यतरानुगमेऽपि प्रायश्चित्तमिति न वक्तव्यम्। किन्तूभयानुगम एव।

९. योयं पञ्चशराव ओदनः पूर्वमुदाहृतः स दर्श एव प्रतिनिधिरूपसाधनान्तरद्रव्यं विधीयत इति न मन्तव्यम्। किन्तु द्रव्यदेवताविशिष्टकर्मान्तरमेव विधीयते।

१०. तच्च कर्मान्तरं दर्शयागप्रतिनिधिरिति न मन्तव्यम्। किन्तु दर्शाङ्गमेव।

११. ''यस्सत्रायाऽऽगुरते स विश्वजिता यजेत'' इत्यत्र सत्रे प्रवृत्ताप्रवृत्तयोर्द्वयोरपि विश्वजिदिति वा सत्रे प्रवृत्तस्यैव विश्वजिदिति वा न युक्तम्। किन्तु संकल्प्य सत्रकरणाप्रवृत्तस्यैवेदं प्रायश्चित्तम्।

१२. ''बर्हिषा पूर्णमासे व्रतमुपैति। वत्सैरमावास्यायाम्'' इत्यत्र वत्सविशिष्टव्रतशब्दितभोजनविधिर्वा व्रतानुवादेन वत्सविधिर्वा न युक्तः। किन्तु वत्सापाकरणकाले व्रतमुपेयादित्येव तदर्थः।

१३. पूर्वत्र कालोपलक्षणे स्थिते स कालः सान्नाय्ययाजिनो व्रतस्याङ्गमिति न मन्तव्यम् । किन्त्वसान्नाय्ययाजिनोपि व्रतस्याङ्गम् ।

१४. दर्शपूर्णमासयोः ''सह शाखया प्रस्तरं प्रहरति'' इत्यत्र शाखासहभावः प्रस्तरप्रहरणाङ्गमिति न मन्तव्यम् । किन्तु प्रस्तरप्रहरणकाले शाखां प्रहरेदित्येव तदर्थः ।

अथ षष्ठे अधिकाराध्याये कालाद्यपराधपादः पञ्चमः

१. दर्शपूर्णमासयोः श्रूयते ''यस्य हविरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति । त्रेधा तण्डुलान्विभजेत् । ये मध्यमास्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्यात् । ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुम् । येऽणिष्ठास्तान् विष्णवेशिपिविष्टाय शृते चरुम्'' इति । अत्राकाले प्रक्रान्तदर्शप्रायश्चित्ति-रूपाभ्युदयेष्टिः कर्मान्तरमिति न वाच्यम् । किन्तु तस्मिन्नेव प्रकृते कर्मणि निरुप्तस्य हविषः पूर्वदेवताभ्यो दर्शसम्बन्धिनीभ्योऽग्न्यादिभ्योऽपनयनेन देवतान्तरसंयोगो मध्यमादिश्रवणै-र्विधीयते ।

३. उपांशुयाजाज्यहाविषः पूर्वदेवताभ्योऽपनयो देवतान्तरसंयोगाश्रवणान्न युक्त इति न वक्तव्यम् । किन्तु ''यस्य हविर्निरुप्तम्'' इति पूर्वोदाहृतवाक्ये तण्डुलशब्दस्य प्राकृतहविर्मात्रोपलक्षकत्वेन तेनैवाज्यस्यापि पूर्वदेवताभ्योऽपनयनस्य लाभ एव ।

४. सा चेष्टिर्निर्वापोत्तरं तण्डुलावस्थे हविषि कार्या । निर्वापश्च प्राकृतीभ्यो देवताभ्य एवेति न मन्तव्यम् । किन्तु निर्वापात्प्रागभ्युदये ज्ञाते तन्निमित्तकदेवताभ्य एव निर्वापः ।

५. प्राकृतदेवतार्थमेकस्य द्वयोर्वा मुष्ट्योर्निर्वापे कृते सति यदा चन्द्रोदयो ज्ञातस्तदा शिष्टोपि निर्वापः प्राकृतदेवताभ्य एवेति न मन्तव्यम् । किन्तु शेषस्य तूष्णीमेव निर्वापः ।

६. सेयमिष्टिः सन्नयदसन्नयदुभयाधिकारिका । न केवलं सन्नयन्मात्राधिकारिका ।

७. ''यदि सत्राय दीक्षितानां साम्युत्तिष्ठत्सेत्सोमं विभज्य विश्वजिता यजेत'' इत्यत्र विश्वजिति अक्रीतमस्यैवाधिकार इति न मन्तव्यम् । किन्तु क्रीतसोमस्याप्यस्त्यधिकारः ।

८. ज्योतिष्टोमे दीक्षापक्षाः श्रुताः । तान् कल्पसूत्रकृदुदाहरत् । तत्रैकादिदीक्षाणां सर्वासामपि ज्योतिष्टोमे विकल्पेन निवेश इति न मन्तव्यम् । किन्तु द्वादशाहपरिमाणैव दीक्षा । एकादिपक्षाणां तु श्रुतकल्पान्तरासु विकृतिषु निवेश इति **भाष्यकारः** ।

९. भाष्यकारीयं सिद्धान्तमेव पूर्वपक्षीकृत्य पूर्वपक्षमेव सिद्धान्तितवान् **भट्टः** । तन्मते सूत्रद्वय-मधिकरणद्वयम् । पूर्वपक्षौ तूत्सूत्रौ । सिद्धान्तसूत्रे एव द्वे । इदञ्च तन्मते **प्रथमाधिकरणम् ।**

९. ज्योतिष्टोमविकृतिभूते द्वादशाहे ज्योतिष्टोम इव दीक्षाणां विकल्प इति न वक्तव्यम् । द्वादशाहे द्वादशैव दीक्षाः । इदं **भाट्टं द्वितीयमधिकरणम् ।**

१०. गवामयनाख्ये सत्रे श्रूयते ''चतुरहे पुरस्तात्पौर्णमास्या दीक्षेरन् । तेषामेकाष्टकायां क्रयः सम्पद्यते'' इति । तत्र पौर्णमासी या काचिन्न भवति । नापि चैत्री । किन्तु माघ्येव ।

११. ज्योतिष्टोमे सुत्यादिने त्रिषु सवनेष्वनुष्ठितेष्ववभृथः कार्यः । तस्मिन् कृते दीक्षानियमा निवर्तन्ते । तत्र केनचित्कारणेनावभृथोत्कर्षे ततः पूर्वदिनेषु दीक्षितधर्मा अग्निहोत्राकरणादयोऽनुवर्तन्त एव ।

१२. तर्हि अग्निहोत्राकरणनिमित्तः प्रतिहोमोपि न कार्यः ।

१३. अवभृथानन्तरं विहितोदवसानीयेष्टिरवभृथे कृते पश्चाद्दैवात्केनचित्कारणेनोत्कृष्टा तदा ततः प्रागग्निहोत्रं न कर्तव्यमेव ।

१४. कृत्वाचिन्तयेदमधिकरणम् । अवभृथेष्ट्युदवसानीयेष्टयोरुत्कृष्टयोः सतोः पूर्वमतिपन्नानां वहूनां युगपत्प्राप्तानां होमानां क्रमोस्त्येव ।

१५. दर्शपूर्णमासयोः ''भिन्ने जुहोति'' इत्यादिना पात्रभेदनस्कन्दननिमित्तो होमः श्रूयते । स च होमः प्राकरणिकपात्रभेदादिनिमित्तक एव ।

१६. यदार्याणामभोज्यं केशकीटादिदूषितं तदेव व्यापन्नमित्युच्यते ।

१७. ज्योतिष्टोमे प्रातः सवने वहिष्पवमानेन स्तोष्यमाणा ऋत्विजः स्वस्य पुरतो गन्तुः पुच्छं गृहीत्वा पिपीलिकापङ्क्त्याकारेण शालाया बहिः प्रसर्पन्ति । तत्र यदि पुरोगन्तुः कच्छं पृष्ठतो प्रमादान्मुञ्चेत्तदा प्रायश्चित्तं श्रूयते ''प्रतिहर्ताऽपच्छिन्द्यात्सर्ववेतसं दद्यात् । यद्युद्गाताऽपच्छि-न्याददक्षिणं तं यज्ञमिष्ट्वा तेन पुनर्यजेत । तत्र तद्दद्याद्यत्पूर्वस्मिन् दास्यन् स्यात्'' इति । तत्र यदोद्गातृप्रतिहर्त्रोर्युगपदपच्छेदस्तदा प्रायश्चित्तं न कार्यमिति न मन्तव्यम् । किन्तु कर्तव्यमेव ।

१८. अदक्षिणतया प्रक्रान्तप्रयोगसमाप्तिपूर्वकं पूर्वक्लृप्तदक्षिणायुक्तपुनःप्रयोगरूपं सर्वस्वदानरूपञ्च यत्प्रायश्चित्तद्वयमुद्गातृप्रतिहर्त्रपच्छेदरूपनिमित्तद्वयेन श्रुतं तन्निमित्तयौगपद्यस्थले समुच्चीयत इति न मन्तव्यम् । किन्तु विकल्प्यत एव ।

१९. उद्गातृप्रतिहर्त्रोरानुपूर्व्येणापच्छेदे उद्गात्रपच्छेदनिमित्तं वा विकल्पेन प्रायश्चित्तद्वयं वा न कार्यम्। किन्तु प्रतिहर्त्रपच्छेदनिमित्तमेव प्रायश्चित्तं कार्यम्।

२०. यद्युद्गात्रपच्छेदः पश्चात्तनस्तदा ''तत्र तद्द्याद्यत्पूर्वस्मिन् दास्यन् स्यात्'' इति श्रुतौ यदेव क्रतुस्वभावतो देयं तदेव गवां द्वादशाधिकशतं प्रतीयत इति तदेव पुनः प्रयोगे देयमिति वा सर्ववेतसदानद्वादशशताधिकगोदानयोर्विकल्प इति वा न मन्तव्यम् । किन्तु पुनःप्रयोगे सर्ववेतसमेव दद्यात् ।

२१. द्वादशाहाद्यहर्गणे यदि कस्मिंश्चिदहन्युद्गाताऽपच्छिन्द्यात्तदा अहर्गणस्यैव पूर्वप्रयोगमदक्षिणं समाप्य पुनःप्रयोगः प्राक्सङ्कल्पितदक्षिणायुक्तः कार्य इति न मन्तव्यम्। किन्तु यस्मिन्नहन्यपच्छेदस्तस्यैवावृत्तिर्न गणस्य ।

अथ षष्ठेऽधिकाराध्याये सत्राधिकारपादः षष्ठः

१. ''राजन्यवसिष्ठादीनां नाराशंसो द्वितीयः प्रयाजः । तनूनपादन्येषाम्'' इति पुरुषभेदेन प्रयाजेषु कल्पभेदः श्रुतः । स दीक्षणीयादिष्वतिदिष्टः ''सप्तदशावताराः सत्रमासीरन्'' इत्यनेककर्तृकतया श्रुतसत्राङ्गदीक्षणीयादिषु चोदकतः प्राप्तः । तत्र वसिष्ठादितदन्यरूपा भिन्नकल्पा अधिकारिण इति न मन्तव्यम्। किन्तु तुल्यकल्पानामेव सत्रेष्वधिकारः ।

२. कुलाययज्ञं प्रकृत्य श्रूयते ''एतेन राजपुरोहितौ सायुज्यकामौ यजेयाताम्'' इति। तत्र राजद्वयसम्बन्धिपुरोहितद्वयस्य वा एकराजसम्बन्धिनोस्तुल्यकल्पयोः पुरोहितयोर्वा राजात्मकपुरोहितयोर्वा नाधिकारः । किन्तु राज्ञः पुरोहितस्य चेति द्वयोर्भिन्नकल्पयोरप्यधिकारः ।

३. ''ऋद्धिकामाः सत्रमासीरन्'' इति श्रुतसत्रे त्रैवर्णिका एव ऋत्विजोपीति न मन्तव्यम्। किन्तु ब्राह्मणा एव ऋत्विजः ।

४. पूर्वोक्ते सत्रे सर्वविप्राणां वा वासिष्ठानां तत्तुल्यकल्पानां वा नाधिकारः। किन्तु वैश्वामित्राणां तत्तुल्यकल्पनाञ्चाधिकारः ।

५. सत्रे येन केनचिदाहिताग्निना संहतानामनाहिताग्नीनां नाधिकारः । किन्त्वाहिताग्नीनामेव ।

६. यस्य कस्यचिज्जुह्वादिपात्रैः सत्रं न प्रयोज्यम्। किन्तु साधारणैरुत्पादितैरेव ।

७. अध्वरकल्पादीष्टिषु दर्शपूर्णमासविकृतिषु ''सप्तदश सामिधेनीरनुब्रूयात्'' इति श्रूयते । तत्र वैश्यस्यैवाधिकार इति न मन्तव्यम् । किन्तु त्रैवर्णिकानामपि ।

अथ षष्ठे अधिकाराध्याये अधिकारापवादपादः सप्तमः

१. ''विश्वजिति सर्वस्वं ददाति'' इति श्रूयते । तत्र सर्वेषां स्वशब्दवाच्यानामात्मात्मीयादीनां दानमिति न मन्तव्यम् । किन्तु धनस्यैव ।

२. यदा सार्वभौमो राजा विश्वजिति सर्वस्वं ददाति तदा सर्वापि पृथिवी न देया ।

३. केसरिणोऽश्वादयो विश्वजिति विकल्पेन देया इति न मन्तव्यम् । किन्तु न देया एव ।

४. पुरुषस्य यद्यदुपभोग्यं तत्सर्वस्वं स्वस्याविद्यमानमपि सम्पाद्य देयमिति न मन्तव्यम् । किन्तु विद्यमानस्यैव सर्वस्वस्य दानम् ।

५. यस्तु शूद्रो विहितं स्वधर्मं ज्ञातुं यजमानं सेवते स न देयः ।

६. ''विश्वजिद्यागो मया कार्यः'' इति निश्चयादूर्ध्वं दक्षिणाकालात्पूर्वं यत्स्वेन भोग्यत्वेन स्थितं तद्भूतम् । यच्च दक्षिणाकालादूर्ध्वं भोगार्हतया भविष्यत्त्वेन निर्णीतं तद्भावि । तदुभयमपि भूतभाविधनं भोगेऽनुपयुज्य सर्वस्वदाने देयमिति न मन्तव्यम् । किन्तु दक्षिणाकालीनस्यैव सर्वस्वस्य दानम् ।

७. प्रकृतौ कर्मारम्भ एव यजमानेनाऽऽत्मीयं धनं त्रेधा व्यवस्थापितम् । इदं मे भुक्त्यर्थम्, इदं कर्मार्थम्, इदं दक्षिणार्थम् इति । तत्र यद्दक्षिणार्थं तन्मध्ये द्वादशशतं दत्तम् । विकृतिभूत-विश्वजिति तु त्रिविधमपि देयम् । कर्मशेषस्तु द्रव्याभावात्त्याज्य इति वा क्रतुशेषोपयुक्त-मात्रमवशेष्यान्यत्सर्वं देयमिति वा न मन्तव्यम् । किन्तु यद्दक्षिणार्थं निर्दिष्टं तदेव देयम् ।

८. ''अथैतस्यैवाष्टरात्रस्य विश्वजिदभिजितावेकाहावभितः । उभयतोज्योतिर्मध्ये षडहः । पशुकामो ह्येतेन यजेत'' इति श्रूयते । तत्राष्टरात्रात्मकेऽहर्गणे विश्वजिन्नामकं यत्प्रथममहस्तत्र द्वादश-शतदक्षिणेति न मन्तव्यम् । किन्तु सर्वस्वदानमेवेति **भाष्यकारः** । द्वादशशतदक्षिणैवेति **भट्टः** ।

९. विश्वजिति द्वादशशतान्न्यूनाधिकधनवतोर्द्वयोरप्यधिकार इति न मन्तव्यम् । किन्त्वधिकधनवत एव ।

१०. आधाने श्रूयते ''एका देया। द्वे देये। षड्देयाः। द्वादश देयाः। चतुर्विंशतिर्देयाः। शतं देयम्। सहस्रं देयम्। अपरिमितं देयम्'' इति अत्रैकादिगोविकल्प इति न मन्तव्यम्। किन्तु बाहुल्यरूपसङ्ख्यान्तरविशिष्टं देयम्।

११. दर्शपूर्णमासयोः श्रूयते ''इति ह स्माह वट्कुर्वार्ष्णिर्माषानेव मह्यं पचते। न वा एतेषां हविर्गृह्णन्ति'' इति ''उल्मुकैः स्म पूर्वे समाजग्मुः। तान् हासुरा रक्षांसि निजघ्नुः'' इत्येकानेककर्तृकचरितानुवादरूपं परकृतिपुराकल्पाख्यवाक्यद्वयम्। तत्र माषपाकविधिर्वृष्णिगोत्रोत्पन्नानामेवेति न मन्तव्यम्। किन्तु सर्वमनुष्यधर्मोयं माषपाकः।

१२. ''पञ्चपञ्चाशतस्त्रिवृतः संवत्सराः। पञ्चपञ्चाशतः पञ्चदशाः। पञ्चपञ्चाशतः सप्तदशाः। पञ्चपञ्चाशत एकविंशाः। विश्वसृजामयनं सहस्रसंवत्सरम्'' इति श्रूयते। अत्र विश्वसृजामयनाख्ये सत्रे गन्धर्वादीनां नाधिकारः। मनुष्येष्वपि रसायनादिसिद्धसहस्रायुषां वा कुलकल्पानां वा सत्रारम्भवललब्धतावदायुष्काणां वा पञ्चाशदुत्तरद्विशतपुंसां वा नाधिकारः। अत्रत्यः संवत्सरशब्दो मासपरो वा द्वादशरात्रिपरो वा न भवति। किन्तु दिनपर एव। अतो मानुषाणां सहस्रदिनेषु कर्तव्यमेवेदं विश्वसृजामयनाख्यं सत्रम्।

अथ षष्ठेऽधिकाराध्याये क्रत्वङ्गकर्माधिकारपादोऽष्टमः

१. ''प्रजाकामं चतुर्होत्रा याजयेत्'' इति श्रूयते। ''पृथिवी होता, द्यौरध्वर्युः, रुद्रोऽग्नीत्'' इत्यादिर्मन्त्रश्चतुर्होता। अत्रोक्तो होम आहिताग्न्यधिकारः सन्नाहवनीये कार्य इति वा अनाहिताग्नेरप्यधिकार इति वा न मन्तव्यम्। किन्त्वनाहिताग्नेरेवाधिकारः।

२. उपनयनाङ्गभूता माणवककर्तृका आचार्यकर्तृकाश्च होमा लौकिकेऽग्नावेव। न त्वाहवनीये आधानेन सम्पादिते।

३. ''एतया निषादस्थपतिं याजयेत्'' इति श्रुता स्थपतीष्टिराहवनीय इति न मन्तव्यम्। किन्तु लौकिकेऽग्नावेव।

४. ''यो ब्रह्मचार्यवकिरेत्स गर्दभं पशुमालभेत'' इति श्रुतो याग आहवनीय एवेति न मन्तव्यम्। किन्तु लौकिकेऽग्नावेव।

५. उपनयनचौलादीनि दैवकर्माणि चोदगयनपूर्वपक्षाहः पुण्याहेष्वेव भवेयुः।

६. श्राद्धादीनि कर्माण्यपरपक्षेऽपराह्णादौ कार्याणि ।

७. ज्योतिष्टोमे द्रव्ययाच्ञा सोमक्रयश्च श्रूयते ''द्वादशारात्रीर्भृतिं वन्वीत'' इति याच्ञा । ''अरुणया पिङ्गाक्ष्या'' इति क्रयः । तौ याच्ञाक्रयौ अविद्यमानद्रव्यसोमस्येति न मन्तव्यम् । किन्तु विद्यमानद्रव्यसोमस्यापि ।

८. ''पयो व्रतं ब्राह्मणस्य'' इति पयोभक्षः ''अग्नीदग्नीन् विहर'' इति प्रैषमन्त्रः ''अहतं वासः परिधत्ते'' इत्यहवाससाऽऽच्छादनम् ''यत्पशुर्मायुमकृत'' इत्यादिमन्त्रेण विहितः सञ्ज्ञप्तहोमः ''योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मः'' इति मन्त्र इत्येतत्पञ्चकं नियमादृष्टाश्च नित्यमनुष्ठेयम् । न तु सति गत्यन्तरे परित्याज्यम् ।

९. पयोव्रतं जरणाभावे परित्याज्यमेव ।

१०. ज्योतिष्टोमे ''अग्नीषोमीयं पशुमालभेत'' इति श्रुतः पशुः ''छागस्य वपायाः'' इति मन्त्रोक्त-छाग एव । न तु पशुसामान्यम् ।

भाट्टसङ्ग्रहे उदाहृतग्रन्थनामानि

१.	मञ्जरी	४.	छन्दोगोपनिषत्
२.	शास्त्रदीपिका	५.	तन्त्ररत्नम्
३.	न्यायरत्नमाला	६.	वृत्तिः

भाट्टसङ्ग्रहे व्याख्यातपदानामकारादिक्रमेण सूचीपत्रम्

अग्निहोत्रहवणी-निर्वापसाधनकाष्ठपात्रम्

अदाभ्यः–ग्रहविशेषः

अध्वर्युः–यजुर्वेदोक्तकर्मकर्ता

अनुवषट्कारः–सोमशेषद्रव्यकप्रतिपत्तियागः

अयाशया–भूमिष्ठमयोनिर्मितं वा वह्निशरीरम्

अवगोरणम्–अवज्ञा

आगुरते–सङ्कल्पयति

आग्नीध्रः–मण्टपविशेषः

आतिथ्या–क्रीतं सोमं शकटेऽवस्थाप्य प्राचीनवंशं प्रत्यानयने यामभिमुखो निर्वपति सेष्टिः ।

आमिक्षा–दध्यतिरिक्तोऽतिपक्वपयसो विकारः

ईषा–शकटगतो लाङ्गलवद्दीर्घः काष्ठविशेषः

उख्यः–उखायां स्थापितोऽग्निः

उग्रं वचः–अशनायापिपासे

उद्गाता–उद्गानकर्ता

उपधानम्–स्थलविशेषे स्थापनम्

उपरवः–गर्तविशेषः

उपवीतम्–शीतवातातपपीडानिवृत्त्यर्थं वासोविन्यासविशेषः

उपवीतम्–सव्यतयोत्तरीयधारणम्

उपवेषः–वृक्षादानीतायाः पलाशशाखयाः पुनश्छिन्नाया मूलभागः

उपसदः–दीक्षादिनादूर्ध्वं सोमाभिषवात्पूर्वं कर्तव्या होमाः

उपाकरणम्– ''प्रजापतेर्जायमानाः'' ''इमं पशुं'' इत्याभ्यामृग्भ्यां पशोरुपस्पर्शनम् ।
उपोप्तम्–सिकतापरिष्कृतं स्थलम्
उलपः–तृणविशेषः
ऊ–स्तोभाक्षरम्
ऊर्क्– -''-
ऊहः–'' अग्नये जुष्टं निर्वपामि'' इत्यत्र सौर्यचरौ ''अग्नये'' इत्यस्य स्थाने ''सूर्याय'' इति पदान्तरप्रक्षेपः । अनया रीत्या अन्यत्रापि ।
ऋजीषम्–निष्पादितस्य सोमस्य नीरसो भागः
ऐन्द्री–ऋग्विशेषः
अंशुः–ग्रहविशेषः
करणमन्त्रः–मन्त्रविशेषः
काण्डानुसमयः–काण्डेन गुणकाण्डेन अनुसमयः सम्बन्धः
कुण्डपायिनामयनम्–सत्रविशेषः
क्रियमाणानुवादिमन्त्रः–मन्त्रविशेषः
ग्रावस्तुत्–होतृष्वेकः
चतुर्होता–मन्त्रविशेषः
चितिः–लाङ्गलाकृष्टायां भूमौ नानाविधाभिरिष्टकाभिः पक्ष्याद्याकारेण निष्पादितं स्थलम् ।
चित्रिणी–इष्टकाविशेषः
चात्वालः–गर्तः
जञ्भ्यमानः–गात्रविनामेन विदारितमुखः पुरुषः
जाघनी–पशोर्जघनप्रदेशभवो मांसखण्डविशेषः
जामिः–आलस्यहेतुः
जुहूः–अरत्निप्रमाणदण्डो हंसमुखदळविलः पलाशदारुविकृतिविशेषः
तरसमयाः–मांसमयाः
त्रिवृत्–त्रिरज्जुका रशना
त्रैविदाः–वेदत्रयाध्यायिनः
दशापवित्रम्–कम्बळखण्डम् । वासः खण्डमित्यपरे
दीर्घसोमः–विकृतियागविशेषः

दृतिनवनीतम्–चर्मभस्त्रिकायां चिरं स्थापितेन नवनीतेन सिद्धमाज्यम्
धाय्या–पृथुपाजशब्दयुते सामिधेन्यावृचौ
नामधेयम्–सुब्रह्मण्यायामुको यजते इत्यादि
निगदः–परसम्बोधनपरवाक्यानि
निधनम्–प्रस्तावादिभक्तिभिर्युक्तस्य साम्नोऽन्त्यभक्तिः
निनयनम्–चतुर्दिक्षु सेचनम्
निरिष्टिकं बर्हिः–अन्यत्रोपयुक्तं बर्हिः
निवित्–इध्मसिद्धाग्निसम्बोधनरूपा ऋक्
निवीतम्–उत्तरीयस्य मध्ये बन्धनम्
परकृतिः–एककर्तृकचरितानुवादः
पदार्थानुसमयः–प्रत्येकगुणानां क्रमेण सम्बन्धः
पर्यग्निकरणम्–ज्वालया त्रिःप्रदक्षिणीकरणम्
पुराकल्पः–अनेककर्तृकचरितानुवादः
पृश्निः–अल्पतनुः
प्रउगम्–शस्त्रविशेषस्य नाम
प्रवरः–त्र्यार्षेयादिः
प्रष्ठौही–त्रिवर्षा
प्राचीनवंशः–प्रागग्रवंशनिर्मितमण्टपः
प्राचीनावीतम्–उपसव्यतया वासोधारणम्
प्रस्तरः–स्रुग्धारणाद्युपयुक्तदर्भमुष्टिः
प्राणभृतः–प्राणशब्दयुक्ता ''अयं पुरो भुवः'' इत्यनुवाकस्था मन्त्राः
ब्रह्मा–वेदत्रयोक्तस्य प्रत्यवेक्षणकर्ता
भक्तिः–स्तोभाक्षररूपसामैकदेशः
मलवद्वासाः–रजस्वला
मह्ला–गलस्तनयुता
रजाशया–अन्तरिक्षस्थं रजतनिर्मितं वाऽग्निशरीरम्
रुग्मप्रतिमोचनम्–रुग्मधारणम्
लोकम्पृणा–इष्टकाविशेषः

वसन्तोत्सवः–फाल्गुनकृष्णप्रतिपदि क्रियमाणमन्योन्यजलसेचनम् ।
वाजम्–सुराद्रव्यम्
वाजिनम्–आमिक्षातो निस्सृतं जलम्
वारणः–दारुपात्रविशेषः
वार्त्रघ्नी–ऋग्विशेषः
विधृतिः–वेद्यामुदगग्रतया स्थाप्यौ कुशौ
वृधन्वती–ऋग्विशेषः
वेदः–सम्मार्जनहेतुदर्भमुष्टिः
वेदिः–आहवनीयगार्हपत्यमध्यवर्तिनी चतुरङ्गुलखाता भूमिः
वैकङ्कतः–दारुपात्रविशेषः
व्रतम्–भोजनम्
शम्या–शूलाकारकाष्ठम्
शर्कराः–मृत्तिकामिश्राः क्षुद्रपाषाणाः
शस्त्रम्–अप्रगीतमन्त्रसाध्या स्तुतिः
शाक्यानामयनम्–षट्त्रिंशत्सु वत्सरेषु क्रियमाणं सत्रम्
संयवनम्–पुरोडाशार्थं पेषणम्
स्फ्यः–खङ्गाकारकाष्ठम्
स्वरुः–यूपार्थं खदिरादिवृक्षच्छेदे यः प्राथमिकः शकलः पतितः सः
सामिधेनी–ऋग्विशेषः
सूक्तवाकः–मन्त्रविशेषः
सोमः–सोमरससाधनको यागः
सौभरम्–सामविशेषः
स्तिभिन्यः–वटमुकुलानीत्येके । वटफलानीत्यन्ये
स्तोत्रम्–प्रगीतमन्त्रसाध्या गुणगुणिसम्बन्धकीर्तनरूपा स्तुतिः
हराशया–द्युलोकस्थं हिरण्यनिर्मितं वाऽग्निशरीरम् ।
हविष्कृत्–यजमानपत्नी
हारियोजनः–ग्रहविशेषः
हीष्–स्तोभाक्षरम्
होता–शंसनकर्ता

विषयानुक्रमणिका

अथ चतुर्थाध्यायस्य प्रथमः पादः

अथ प्रथमं प्रतिज्ञाधिकरणम्

ॐ ॥ पूर्वाध्यायोक्तं कर्मणां शेषशेषिभावमुपजीव्येहाध्याये शेषिणः शेषं प्रत्यनुष्ठापकत्वशब्दितं प्रयोजकत्वं शेषस्यानुष्ठेयत्वशब्दितं प्रयुक्तत्वं निरूप्यत इत्यध्याययोरर्थभेदो हेतुहेतुमद्भावरूपेण पौर्वापर्यञ्च ध्येयम् । यद्यपि न सर्वः शेषी शेषस्यानुष्ठापकः "पुरोडाशकपालेन तुषानुपवपति" इत्यादौ तुषोपवापादेः कपालादिप्रयोजकत्वाभावात् । तथापि "शेष्येव शेषस्यानुष्ठापकः" इत्यस्ति नियम इति । तदाह सूत्रकारः।

अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा ॥ १ ॥ इति

अत्र क्रत्वर्थपुरुषार्थशब्दावप्रयोजकप्रयोजकलक्षकौ । अथ शेषशेषिभावोक्त्यनन्तरं अतः शेषिण एव प्रयोजकत्वाद्धेतोः अनुष्ठापकानुष्ठेयशब्दितप्रयोजकप्रयोज्यविचार आरप्स्यत इति ।

यद्वा क्रत्वर्थत्वादिप्रकारेण प्रयुक्तत्वस्य विचार्यत्वात् प्रकारप्रतिज्ञाऽपि प्रकारिप्रतिज्ञा-पर्यन्तैवेति वा, अर्थे समवैषम्यमित्यष्टमाधिकरणमारभ्य साक्षात्प्रयोजकप्रयोज्यचिन्ता करिष्यते । ततः प्राक् तादर्थ्येन क्रत्वर्थादिचिन्तनमिति वा, यथाश्रुतौ क्रत्वर्थपुरुषार्थशब्दौ । एतच्च शिष्यमनःसमाधानाय वक्ष्यमाणप्रतिज्ञामात्रसूत्रम् । अत्रैके "क्रत्वर्थोऽयम् पुरुषार्थोऽयम्" इति विचारः कार्य उत नेति सन्देहे, फलाभावादेवंरूपो विचारो नारभ्य इति प्राप्ते,

क्रत्वर्थत्वादिरूपेण प्रयुक्तत्वस्य सुज्ञानत्वात्साक्षाद्वा परम्परया वा प्रयुक्तिनिर्णयोपयुक्तस्य सर्वस्येह चिन्तनीयत्वादारभ्य एवायं विचार पूर्वोत्तरपक्षौ वर्णयन्ति ।

इति प्रथमं प्रतिज्ञाधिकरणम्

अथ द्वितीयं क्रत्वर्थपुरुषार्थलक्षणाधिकरणम्

यस्मिन् प्रीतिः पुरुषस्य लिप्साऽर्थलक्षणाऽविभक्तत्वात् ॥ २ ॥

एतदपि सूत्रं वक्ष्यमाणयोः क्रत्वर्थपुरुषार्थयोर्लक्षणोक्तिपरम् । **तस्यार्थः, यस्मिन्** भावनाख्यव्यापारे निर्वृत्ते **पुरुषस्य प्रीतिर्भवति तस्य** व्यापारस्य **लिप्सा** आकांक्षा **अर्थलक्षणा** फलकरणविषयिणी । भावनायाः फलकरणाभ्याम**विभक्तत्वादिति** ।

अत्र पुरुषार्थलक्षणमात्रोक्तावप्युपलक्षणतया प्रधानभावना कथं भावाकांक्षापूरणक्षमतया विधीयमानं क्रत्वर्थमिति ध्येयम् । क्रत्वर्थान्यत्वे सति भावनाकर्तृकाकांक्षाविषयत्वं पुरुषार्थत्वमिति पुरुषार्थलक्षणं ध्येयम् । केवललक्षणोक्तिमात्रपरत्वेऽस्य सूत्रस्य मीमांसाशास्त्रानन्तर्भावापत्त्या वर्णकचतुष्टयपरत्वेनेदं सूत्रं योजयन्ति ।

प्रथमं वर्णकम्

तथा हि, क्रत्वर्थपुरुषार्थयोर्भेदकं लक्षणं निरूपणार्हमुत नेति **सन्देहे,** नेति प्राप्तम् । क्रतावनुष्ठेयः क्रत्वर्थः पुरुषेणार्थ्यमानः पुरुषार्थ इत्युक्ते, पुरुषार्थे ''गोदोहनेनापः प्रणयेत्पशुकामः'' इत्युक्तगोदोहनादावाद्यस्य प्रयाजादौ क्रत्वर्थे अनुष्ठेयतया पुरुषेणार्थ्यमानेऽन्त्यस्यातिव्याप्तेरिति।

सिद्धान्तस्तु, क्रतुस्वरूपपौष्कल्याय यो विधीयते स क्रत्वर्थः । यथा प्रयाजादिः । न हि प्रयाजादिभिः पुरुषस्य काचित्प्रीतिर्भवति, येनायं पुरुषार्थो भवेत् । दर्शपूर्णमासादिक्रतुस्तु तैः प्रयाजादिभिः फलजननसामर्थ्यलक्षणं पौष्कल्यं प्राप्त इति क्रत्वर्थः । पुरुषप्रीतये विधीयमानः पुरुषार्थः । यथा दर्शपूर्णमासयोः श्रुतगोदोहनादिः । न हि गोदोहनं क्रत्वर्थम् । तदभावेऽपि'' चमसेनापः प्रणयेत्'' इत्युक्तचमसेन क्रतुपौष्कल्यसिद्धेः । अनयोः प्रागुक्तलक्षणाभ्यामनर्थान्तरत्वादिति । फलन्तु, लक्ष्यस्वरूपावगतिः ।

द्वितीयं वर्णकम्

द्वितीयं वर्णकन्तु, ''स्वर्गकामो यजेत'' इत्यादौ श्रुतस्वर्गादिफलंशे विधिः प्रयोजको न वेति सन्देहे फलस्यांशत्रयोपेतविधेयभावनाविशेषणत्वात् करणांशस्येवेतिकर्तव्यतांशस्येव च फलांशस्यापि विधेयत्वमिति प्राप्ते सिद्धान्तः, अप्रवृत्तप्रवर्तनात्मा हि विधिः। स्वरसतः सुन्दरे फले रागादेव प्रवर्तमानं पुरुषं प्रति कथं प्रवर्तयितुं फलं विदध्यात्। अतो न फलांशे विधिः प्रयोजक इति। फलन्तु, पूर्वपक्षे श्येनविधिना वैरिवधस्यापि विधानम्। ''न हिंस्यात्'' इति निषेधाविषयतया अग्नीषोमीयपशुहिंसायामिवारिवधनिमित्तकदुरितनिवृत्त्यर्थकप्रायश्चित्ताननुष्ठानम्। **सिद्धान्ते** तु निषेधविषयत्वादनुष्ठानमिति।

भाष्यकारीयम् प्रथमं वर्णकम्

ननु **''फलश्चाकर्मसन्निधौ''** इति द्वितीयाध्यायतृतीयपादीयाधिकरण एव फलाविधेयतायाः सिद्धान्तितत्वान्नैवं विचारो युक्तः। अत एव नैवं **भाष्यकारो**ऽवादीदिति चेत्तर्ह्यस्तु भाष्योक्तमेव **वर्णकद्वयम्**। तथा हि, दर्शपूर्णमासयोः श्रूयते ''चमसेनापः प्रणयेद् गोदोहनेन पशुकामस्य'' इति। गोदोहनकलशस्य **गोदोहनेति** नाम।

तत्र **सन्देहः**, गोदोहनं क्रत्वर्थं पुरुषार्थश्चोत पुरुषार्थमेवेति। पशुकामस्येति षष्ठीश्रुत्या पशुफलहेतुताश्रवणेन पुरुषार्थत्वस्य, अपां प्रणयनेन क्रतूपकारकतया क्रत्वर्थत्वस्य च भानेनोभयार्थम्। तथा चोभयप्रयुक्तं तदनुष्ठानमिति **प्राप्ते**,

सिद्धान्तः, किमुपकारकत्वमेव शेषत्वं मत्वा तेन हेतुना क्रत्वर्थत्वं ब्रूषे। अथानङ्गस्य क्रतूपकारकत्वायोगात्तदन्यथानुपपत्त्या वा। **नाद्यः**। **द्रव्यगुणसंस्कारेषु बादरिः, शेषः परार्थत्वादिति** पूर्वाध्यायादिभाग एवोपकारकत्वरूपशेषत्वस्य निरासात्। **नान्त्यः**, अग्न्यर्थस्याप्याधानस्य क्रतूपकारकत्ववदन्यार्थस्यापि गोदोहनस्यापां प्रणयनद्वारा क्रतूपकारकत्वोपपत्तेः षष्ठीश्रुत्या पुरुषार्थमेव गोदोहनमिति फलप्रयुक्तमेव तदनुष्ठानम्। न तु क्रतुप्रयुक्तम्। क्रतुप्रकरणस्य श्रुत्या बाधादिति।

अत्र पक्षे सूत्रार्थस्तु, **यस्मिन्** गोदोहनादावुपादीयमाने **पुरुषस्य प्रीतिरुपदिश्यते तस्य** गोदोहनादेः **लिप्साऽनुष्ठितिरर्थलक्षणा** पुरुषार्थप्रयुक्ता । न तु क्रतुप्रयुक्ता । तस्य पुरुषार्थाविभक्तत्वादिति ।

फलन्तु, गोदोहनस्याक्रत्वर्थत्वाद्विकृतिष्वनतिदेशः । क्रतूपकारकत्वमात्रेण क्रत्वर्थत्वशङ्का निर्दलेति मत्वा **भाष्ये, एवं वेति** द्रव्यार्जनमुदाहृत्य वर्णकान्तरमुक्तम् ।

भाष्यकारीयं वर्णकान्तरम् ।

ब्राह्मणस्य प्रतिग्रहयाजनाध्यापनैः , राजन्यस्य जयादिना, वैश्यस्य कृष्यादिनेत्येवं श्रुतो द्रव्यार्जने नियमः । किमेवं नियमैः सम्पादिता द्रव्यप्राप्तिः क्रत्वर्थोत पुरुषार्थेति **सन्देहे,**

पूर्वपक्षस्तु, द्रव्यार्जनोद्देशेन ब्राह्मणादीनां विधीयमानस्तदुपायनियमस्तदङ्गं तावद्भवति । अङ्गञ्च तत्स्वरूपे तत्कार्ये वोपयोगीति वाच्यम् । न चात्रोपायनियमो द्रव्यप्राप्तावुपयुज्यते । तेन विना वार्तादिनापि तत्सम्भवात् । अतो द्रव्यार्जनेन जायमानकार्योपयोगितया तदङ्गत्वमुपायनियमस्य निर्वाह्यम् । तद्यदि क्षुत्प्रतिघातादिरूपं दृष्टमेव प्रयोजनं द्रव्यार्जनकार्यं स्यात्तदाप्युपायनियमविधिर्व्यर्थ एव । उपायान्तरार्जितवित्तेनापि दृष्टप्रयोजनोपपत्तेः । तस्मादुपायनियमविधिबलात् क्रत्वर्था द्रव्यप्राप्तिरिति कल्प्यते । एवं हि सति क्रत्वपूर्वस्यादृष्टत्वान्नियमेनैवार्जनं निष्पादयतीति नानर्थक्यं नियमविधेरिति ।

सिद्धान्तस्तु, द्रव्यार्जनं रागप्राप्तम् । न शास्त्रीयम् । रागतस्तदुपार्जितश्च पुरुषप्रीतिकरं प्रत्यक्षतोऽवगम्यमानं न नियमविध्यन्यथानुपपत्तिबलादनुमीयमानक्रत्वर्थत्वेन बाधितुं शक्यमिति पुरुषार्थमेव । क्रतुरप्यामुष्मिकप्रीतिकारितया पुरुषकार्याणामन्यतम इति भोजनादिकार्यान्तर इव क्रतावप्युपयुज्यते । न तु क्रतोरेवाङ्गम् । तथा सति जीवनलोपात्क्रतुरेव न सिद्ध्येत् । उपायनियमविधिस्तूपायान्तरेणार्जने प्रत्यवायविवक्षयोपपद्यते । तस्माद्द्रव्यार्जनं पुरुषार्थम् । **स्मृतिश्च,**

षण्णान्तु कर्मणामस्य त्रीणि कर्माणि जीविका।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ।। इति

अस्मिन् पक्षे **सूत्रार्थस्तु, यस्मिन् द्रव्ये पुरुषस्य प्रीतिर्भवति तस्य लिप्सा** आर्जनं **अर्थलक्षणा** पुरुषार्थभूता । तस्य **प्रीत्यविभक्तत्वादिति** ।

फलन्तु, ''अग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेत्, यस्याऽहिताग्नेः सतोऽग्निर्गृहान् दहेत्'' इति द्रव्योपघाते चोद्यमाना क्षामवतीष्टिरपि द्रव्यार्जनस्य क्रत्वर्थत्वपूर्वपक्षे क्रत्वर्था भवतीति न तस्याः पृथक्फलकल्पनम् ।

सिद्धान्ते तूपार्जितवित्तस्य पुमर्थत्वे तदुपघाते चोद्यमाना क्षामवतीष्टिरपि पुरुषार्थेति पृथक्फलकल्पनमिति ध्येयम् ।

इति द्वितीयं क्रत्वर्थपुरुषार्थयोर्लक्षणाधिकरणम्

अथ तृतीयं प्रजापतिव्रतानां पुरुषार्थताधिकरणम् (सूत्राणि ३-६)

तदुत्सर्गे कर्माणि पुरुषार्थाय शास्त्रस्याऽनतिशंक्यत्वान्न च द्रव्यं चिकीर्ष्यते तेनार्थेनाभिसम्बन्धात् क्रियायां पुरुषश्रुतिः ।। ३ ।।

(अविशेषात्तु शास्त्रस्य यथाश्रुति फलानि स्युः ।। ४ ।। अपि वा कारणाग्रहणे तदर्थमर्थस्यानभिसम्बन्धात् ।। ५ ।। तथा च लोकभूतेषु ।। ६ ।।)

अत्र पूर्ववैषम्येण शङ्कनात्सङ्गतिः । अनारभ्य श्रूयते ''नेक्षेतोद्यन्तमादित्यं नास्तं यन्तं कदाचन'' इति । तत्र उदयास्तमयवदादित्यक्षेणनिषेधः किं क्रत्वर्थ उत पुरुषार्थ इति **सन्देहः** ।

पूर्वपक्षस्तु, अत्रोद्यतोऽस्तं यतश्चादित्यस्येक्षणकर्तव्यत्वं नञा वचनवृत्त्यैव निषिद्ध्यते । निषेधश्च प्राप्तिपूर्वकः । प्राप्तिश्च वैदिकनिषेधस्य वैदिक्येव वाच्या । प्रत्यासन्नत्वात् । एवञ्च यत्र क्रतावादित्येक्षणं विहितं तत्रायं प्रतिषेधः स्यात् । न चैवमष्टदोषदुष्टविकल्पापत्तिः ।

विधेरादित्येक्षणमात्र-विषयतया निषेधस्य उद्यदाद्यादित्यविषयतया विधिप्रतिषेधयोर्भिन्नविषयत्वात्। एवञ्च गोदोहनवत्कामपदाश्रुतेः द्रव्यार्जनवत्प्रत्यक्षतः पुरुषार्थत्वाप्रतीतेश्च निषेधस्य प्रतिषेध्यवैदिकेक्षणद्वारा क्रत्वर्थत्वे न पृथक्फलकल्पनादोष इति क्रत्वर्थोऽयं निषेधः। न च नञः पर्युदासार्थत्वे ईक्षणभिन्नक्रिया कार्येत्यर्थलाभान्न क्रत्वर्थतासिद्धिरिति शंक्यम्। नञीक्षतिपदाभ्यां क्रियान्तरलक्षणाप्रसङ्गात् फलान्तरकल्पनाप्रसङ्गाच्चेति।

सिद्धान्तस्तु ''तस्य व्रतम्'' इत्युपक्रम्य ''नेक्षेत'' इति वाक्यस्य पाठादनीक्षणरूपं किञ्चित्कर्मानुष्ठेयं भाति। तच्च नञः पर्युदासार्थत्वे स्यात्। नान्यथा। तच्च कर्म ''उद्यन्तमस्तं यन्तश्चादित्यं नेक्षिष्ये'' इति सङ्कल्प रूपम्। न चास्य सङ्कल्परूपव्रतस्य क्रत्वङ्गत्वे श्रुतिलिङ्गादिरूपप्रमाणमस्ति। पुरुषार्थत्वपक्षे तु ''एतावता हैनसा युक्तो भवति'' इति वाक्यशेषेणेक्षितुः पुरुषस्य पापसम्बन्धोपन्यासबलेन पापनिवारणफलकत्वस्यानीक्षणव्रतस्य अकल्पनाल्लक्षणया पर्युदासलब्धेक्षणभिन्नसङ्कल्परूपं व्रतं पुरुषार्थमिति।

तदाह **सूत्रे,** तदुत्सर्गे तस्य साक्षात्पुरुषापेक्षितस्यैवोत्सर्गतः फलत्वे **कर्माणि** नेक्षेतेत्यादीनि **पुरुषार्थायैवोपदिश्यन्ते**। न चैवं फलकल्पनागौरवम्। **शास्त्रस्यानतिशंक्यत्वात्** पित्रादिवचनादपि प्रमाणत्वात्। न चेह शास्त्रं क्रत्वर्थसाधारणमिति वाच्यम्। **न च द्रव्यं चिकीर्ष्यते** न हि तेन कर्मणा प्रोक्षणादिनेव यागीयद्रव्यं संस्क्रियते येन तद्बलात् क्रत्वर्थता स्यात्। **तेनार्थेन** फले **नाभिसम्बन्धात् क्रियायां** एवंजातीयकायां पुरुषश्रुतिः पुरुष एव कर्तृत्वेन श्रूयत इति।

फलन्तु, उद्यदादित्यादीक्षणभिन्नसङ्कल्परूपं व्रतं प्रत्यवायनिवृत्त्यर्थं पुरुषेण कार्यमिति।

इति तृतीयं प्रजापतिव्रतानां पुरुषार्थताधिकरणम् (सूत्राणि ३-६)

अथ चतुर्थम् यज्ञायुधानामनुवाद्यताधिकरणम् (सूत्राणि ७-१०)

द्रव्याणि त्वविशेषेणाऽनर्थक्यात्प्रदीयेरन् ॥ ७ ॥

(स्वेन त्वर्थेन सम्बन्धो द्रव्याणां पृथगर्थत्वात्तस्मादयथाश्रुति स्युः ॥ ८ ॥ चोद्यन्ते चार्थकर्मसु ॥ ९ ॥ लिङ्गदर्शनाच्च ॥ १० ॥)

अत्रापि पूर्ववैषम्येण शङ्कनात्सङ्गतिः। दर्शपूर्णमासयोः ''स्फ्यश्च कपालानि च'' इत्युपक्रम्य श्रुतम् ''एतानि वै दश यज्ञायुधानि'' इति। तानि किमनेन वाक्येन प्रधानयागहविष्ट्वेन विधीयन्ते, किं वा ''स्फ्येनोद्धन्ति'' इत्यादिवाक्यप्राप्तानुवाद इति **सन्देहः**।

पूर्वपक्षस्तु, विध्यश्रवणेऽपि विधिप्रतिबन्धकवैपदश्रवणेऽपि ''उपरि हि देवेभ्यो धारयति'' इत्यादाविवाप्राप्तत्वात्, प्रवृत्तिविशेषकरत्वेन प्रयोजनवत्त्वात् प्रधानयागे हविष्ट्वेन विधीयन्ते। यज्ञशब्दस्य सामान्यतया सकलयज्ञवाचित्वेऽपि प्रकरणवशादाग्नेयादिषड्यागमात्रपरतया यज्ञस्याऽऽग्नेयादेरिति वा यज्ञश्रुतिप्राबल्येन सर्वयज्ञस्येति वा साधनानीत्यायुधपदस्य साधनलक्षणया प्रदेयद्रव्यार्थकत्वसम्भवात्। अनुवादत्वे आनर्थक्यं स्यात्। यज्ञशब्दस्य यज्ञसाधनोद्धननादिसाधनानीत्यर्थपरत्वेन लाक्षणिकत्वापत्तेश्च। पूर्वत्र ''तस्य व्रतम्'' इत्युपक्रमविरोधात् ''नेक्षेत'' इत्यस्य लक्षणाश्रयणेऽपि नेह सा युक्ता। आयुधपदेन साधनलक्षणा सिद्धान्तेऽपि तुल्या। तस्माद्धविष्ट्वेन पुरोडाशादिना विकल्पेन समुच्चयेन वा विधानमिति।

तदाह **सूत्रे, द्रव्याणि** स्फ्यादीनि प्रकृतेभ्योऽग्न्यादिदेवेभ्यः **प्रदीयेरन्**। न चाऽऽग्नेयादियागानामुत्पत्तिशिष्टपुरोडाशाद्यवरुद्धत्वात्कथं तेषु स्फ्यादेर्निवेश इति वाच्यम्। अनुवादत्वे आनर्थक्यात् उत्पन्नशिष्टानामप्युत्पत्तिशिष्टाविशेषादिति।

सिद्धान्तस्तु, प्रत्यक्षविधेरश्रवणात्, यज्ञायुधानीत्यत्र समासान्तर्गतायाः षष्ठ्याः ''वाजपेयस्य यूपः'' इत्यत्रेव परम्परासम्बन्धेऽपि मुख्यत्वात्, ''आग्नेयोऽष्टाकपालः'' इत्युत्पत्तिशिष्टपुरोडाशादिना पश्चाच्छिष्टानां स्फ्यादीनां विकल्पसमुच्चययोरयोगात् ''यज्ञायुधानि सम्भवन्ति'' इत्यासादनविधानोपयोगितयाऽनुवादस्य सार्थक्येनार्थक्याभावात्, उद्धननवाक्यप्राप्तयज्ञसाधनानुवाद एवायम्। न हविष्ट्वेन विधानमिति।

फलन्तु, स्फ्यादीनां हविष्ट्वेनाननुष्ठानम्। द्रव्यश्चोत्पत्तिसंयोगादिति पूर्वाध्यायाद्यपादीयनयेनसपौनरुक्त्यं त्विह प्रदेयत्वे निराकृते तृतीये उद्धननादिकं स्फ्यादिभिः सर्वैर्यथासामर्थ्यं कार्यमुत, यथायोग्यमिति चिन्तितमिति तन्त्ररत्नोक्तदिशा ध्येयम्।

इति चतुर्थं यज्ञायुधानामनुवाद्यताधिकरणम् (सूत्राणि ७-१०)

अथ पञ्चमं पश्वेकत्वादेर्विवक्षाधिकरणम् (सूत्राणि ११-१३)

तत्रैकत्वमयज्ञाङ्गमर्थस्य गुणभूतत्वात् ॥ ११ ॥

(एकश्रुतित्वाच ॥ १२ ॥ प्रतीयत इति चेत् ॥ १३ ॥ नाशब्दं तत्प्रमाणत्वात्पूर्ववत् ॥ १४ ॥ शब्दवत्तूपलभ्यते, तदागमे हि तद्दृश्यते, तस्य ज्ञानं हि यथाऽन्येषाम् ॥ १५ ॥ तद्वच लिङ्गदर्शनम् ॥ १६ ॥)

पूर्वन्यायेन शङ्कनात्सङ्गतिः। ''अग्नीषोमीयं पशुमालभेत'' इति , तथा ''अनड्वाहौ युनक्ति'' इति , तथा अश्वमेधे ''वसन्ताय कपिञ्जलानालभेत'' इत्यादौ विभक्त्यभिहितैकत्वद्वित्वादिसंख्या विवक्षितोत नेति **सन्देहे**, नेति **प्राप्तम्**। कुतः ? यज्ञाङ्गत्वे हि विवक्षिता भवेत्। न ह्येषा संख्या यज्ञाङ्गम्। पशुमित्येकपदश्रुत्या ''पशुरेकः'' इति पश्वङ्गत्वावगमात्। आलभेतेति पदान्तरोपात्तालम्भनशब्दितयज्ञाङ्गत्वं पदान्तरसमभिव्याहाररूपवाक्यादवसेयम्। वाक्यञ्च श्रुतितो दुर्बलम्। अत उत्पत्तिशिष्टगुणविरोधात् स्फ्यादीनामिवैकपदश्रुत्यवगतपश्वङ्गत्वविरोधेन क्रत्वनङ्गत्वात्, एकत्वादिसंख्याया अविवक्षितत्वेऽपि क्रतोरवैगुण्यात् न विवक्षिता।

तदाह **सूत्रे**, **तत्र** ''पशुना यजेत'' इत्यादौ **एकत्वादिसंख्या न यज्ञाङ्गम्। अर्थस्य** पशो**र्गुणभूतत्वात्** संख्याया इति।

सिद्धान्तस्तु, पशुनेत्यत्र **नाशब्द**रूपतृतीयाविभक्तिश्रुत्या करणकारकमेकत्वसंख्या चोच्येते। तत्रैकत्वं प्रातिपदिकसमभिव्याहाररूपपदश्रुतितो बलवद्विभक्तिश्रुत्यवगतसन्निहित-

कारकेणावरुद्धं सत् कारकेण सह शीघ्रमालम्भनरूपक्रियया पदान्तरोपात्तयाऽप्यङ्गतया अन्वेतीत्येकत्वमपि यज्ञाङ्गं सत् अमूर्ततया न साक्षात्क्रियानिष्पादकमित्या-रुण्यादिवत्पशुरूपद्रव्यपरिच्छेदद्वारा तन्निष्पादकं स्यादिति यज्ञाङ्गतया विवक्षितैव संख्या। अन्यथा क्रतुवैगुण्यापत्तेः। एवं अनड्वाहावित्यादावपि द्वित्वबहुत्वयोर्विवक्षा ध्येया।

फलन्तु, पशुनेत्यत्रैकत्वस्याविवक्षायामप्येकस्यैव लाघवात्प्रयोगसिद्ध्या तत्र फलभेदाभावेऽपि द्वित्वादिश्रवणस्थले द्वयोर्बहूनां वाऽनुष्ठानसिद्धिरिति ज्ञेयम्।

इति पञ्चमं पश्वेकत्वादेर्विवक्षाधिकरणम् (सूत्रामि ११-१६)

अथ षष्ठं लिङ्गस्य विवक्षितत्वाधिकरणम्

तथा लिंगम्॥ १७॥

अत्राऽतिदेशिकी **सङ्गतिः**। ''पशुना'' इत्यत्र श्रुतं पुल्लिङ्गं विवक्षितं न वेति **सन्देहे**, शब्दार्थविचारे तदनुष्ठानविचारे च लिङ्गस्योपयोगादर्शनात्, लिङ्गहीनेऽपि पुल्लिङ्गवृक्षादिशब्दस्य पुंव्यक्तिरूपमक्षिकादौ स्त्रीलिङ्गमक्षिकादिशब्दस्य प्रयोगेण लिङ्गस्याशब्दार्थत्वादविवक्षितं लिङ्गमिति **प्राप्ते**,

सिद्धान्तः, यथा पशुत्वजातिरेकत्वञ्च विवक्षितं तथा लिङ्गञ्च विवक्षितम्। वृद्धव्यवहारेऽनन्यथासिद्धान्वयव्यतिरेकाभ्यां सिंहः, सिंही, इत्यादौ लिङ्गस्यापि शब्दार्थत्वा-वगमात्। वृक्षमक्षिकादिसशब्दानान्तु शब्दसाधुत्वमात्रताङ्गीकारादिति। तदाह सूत्रे, तथा लिङ्गमति। विवक्षितमिति शेषः। **फलन्तु**, पुम्पशोरनुष्ठानम्।

इति षष्ठं लिङ्गस्य विवक्षितत्वाधिकरणम्

अथ सप्तममाश्रयिणामदृष्टार्थताधिकरणम् (सूत्राणि १८-२०)

आश्रयिष्वविशेषेण भावार्थः प्रतीयेत॥ १८॥

(चोदनायान्त्वनारम्भो विभक्तत्वान्न ह्यन्येन विधीयते ॥ १९ ॥ स्याद्वा द्रव्यचिकीर्षायां भावोऽर्थे च गुणभूतताऽऽश्रयाद्धि गुणीभावः ॥ २० ॥)

पूर्वन्यायेन शङ्कनात्सङ्गतिः । अत्रैकदेशेन परकीयद्रव्यं देवतामुभयं वा संस्कुर्वन्तः पदार्थाः स्विष्टकृदुत्तमप्रयाजपशुपुरोडाशा उदाहरणम् । स्विष्टकृद्याग इष्टदेवता मन्त्रांशेन, प्रक्षेपांशेन त्विष्टिशिष्टद्रव्यञ्च संस्करोति । उत्तमप्रयाजपशुपुरोडाशयागौ च यक्ष्यमाणदेवताः संस्कुरुतः । तत्र **सन्देहः** , ते किं द्रव्यदेवतयोः संस्कारमात्रार्था उतापूर्वार्था अपीति ।

पूर्वपक्षस्तु, देवताप्रकाशनद्रव्यप्रक्षेपरूपदृष्टप्रयोजनवत्त्वेऽवश्यंभाविनि तावतैव स्विष्टकृदादियागः कृतार्थो नापूर्वप्रयोजनकोऽपि भवितुमर्हति । एकस्य कर्मण एकप्रयोजनकत्वस्यैव युक्तत्वात् । पूर्वत्र लिङ्गसंख्ययोर्दृष्टेन द्रव्यावच्छेदेन क्रियार्थतेव स्विष्टकृदादेर्दृष्टद्रव्यादि-संस्कारद्वारेणैव क्रियार्थत्वसम्भवान्नापूर्वार्थतेति ।

सिद्धान्तस्तु कर्मण एकत्वेप्यंशभेदेन प्रयोजनभेदो न विरुद्ध्यते । मन्त्रपाठो द्रव्यप्रक्षेपो देवतोद्देशेन त्यागश्चेति त्रयोंऽशाः । तत्र मन्त्रप्रक्षेपांशाभ्यां देवतास्मरणद्रव्यप्रतिपत्तिरूपदृष्ट-प्रयोजनवत्त्वेऽपि त्यागांशस्य तु न किञ्चिद्दृष्टमस्तीत्यदृष्टमेव प्रयोजनं कल्प्यमित्युभयार्थाः स्विष्टकृदादय इति ।

तदाह **सूत्रे,** एकदेशेन परकीयद्रव्यं देवतामुभयं वाऽऽश्रयन्ति संस्कुर्वन्ति एते आश्रयिणस्तेषु **आश्रयिषु भावार्थः** अपूर्वरूपोऽर्थः **प्रतीयेत** । कुतः ? **अविशेषेण** ''समिधो यजति'' इत्याद्याख्याताविशेषेणेति।

फलन्तु, द्रव्यनाशे स्विष्टकृतो लोपः पूर्वपक्षे । **सिद्धान्ते** त्वाज्येन समापनम् ।

इति सप्तममाश्रयिणामदृष्टार्थताधिकरणम् (सूत्राणि १८-२०)

अथाष्टमं प्रयुक्तिविचारप्रतिज्ञाधिकरणम्

अर्थे समवैषम्यमतो द्रव्यकर्मणाम् ॥ २१ ॥

अतीतेष्वधिकरणेषु प्रयोजकत्वाप्रयोजकत्वफलकतया क्रतुशेषत्वं वा पुरुषशेषत्वं वेति चिन्तितम्। इतः परं साक्षात्प्रयोजकाप्रयोजकचिता **आरभ्यते। द्रव्याणां तु क्रियार्थानां** इत्यादौ तृतीयपादे पयोव्रतादेः क्रतुशेषत्वादिचिन्तापि प्रयुक्तिहेतुत्वेनेति ज्ञेयम्। एतच्च सूत्रं वृत्तवर्तिष्यमाणविवेकोक्तिमात्रार्थम्। भाष्ये संशयादेरनुक्तेः। सूत्रार्थस्तु, अतः प्रभृति द्रव्यकर्मणां मैत्रावरुणदण्डादिद्रव्यदध्यानयनादिकर्मणां अर्थे प्रयुक्तौ समवैषम्यं वक्ष्यते। दण्डरूपद्रव्यस्य प्रयुक्तौ दीक्षितसंस्कारो मैत्रावरुणदानश्चेत्युभयमपि समम्। दध्यानयनप्रयुक्तौ आमिक्षावाजिनयागयोर्वैषम्यमित्युच्यत इति।

इत्यष्टमं प्रयुक्तिविचारप्रतिज्ञाधिकरणम्

अथ नवमं तप्ते पयसि दध्यानयनस्याऽमिक्षाप्रयुक्तताधिकरणम् (सूत्राणि २२-२४)

एकनिष्पत्तेः सर्वं समं स्यात्॥ २२॥

(संसर्गरसनिष्पत्तेरामिक्षा वा प्रधानं स्यात्॥ २३॥ मुख्यशब्दाभिसंस्तवाच्च॥ २४॥)

आश्रयिणामुभयार्थतावद्दध्यानयनस्याप्युभयार्थतेति शङ्कनात्**सङ्गतिः**। चातुर्मास्येषु वैश्वदेवपर्वणि श्रूयते ''तप्ते पयसि दध्यानयति, सा वैश्वदेव्यामिक्षा, वाजिभ्यो वाजिनम्'' इति। तत्र किमामिक्षायागेनैव दध्यानयनं प्रयुज्यते उत वाजिनयागेनापीति **सन्देहः**।

पूर्वपक्षस्तु, आमिक्षा हि वैश्वदेवयागस्य हविः। सा च क्षीराद्रूपरसाऽकृतिभेदादर्थान्तरम्। एवञ्च दधिसंसृष्टेन पयसा यथा आमिक्षाख्यं वस्त्वन्तरमुत्पद्यते तथा वाजिनमपीति दध्यानयनमुभयार्थं सदुभयप्रयुक्तं स्यादिति।

तदाह **सूत्रे, एकस्मादेव** दध्यानयनादामिक्षावाजिनयोर्द्वयोरपि **निष्पत्तेः सर्वमामिक्षा** वाजिनञ्च दध्यानयनप्रयुक्तौ सममिति।

सिद्धान्तस्तु, पयोरसस्य माधुर्यस्याऽमिक्षायामनुवृत्तेर्घनीभूतं पय एवाऽमिक्षा। न द्रव्यान्तरम्। ''यस्मिन् पयसि दधिप्रक्षेपः साऽऽमिक्षा'' इति तच्छब्देन पय एव परामृश्य

तस्याऽमिक्षात्वोक्तेः। आमिक्षायागपुरोनुवाक्यामन्त्रे ''जुषन्तां युज्यं पयः'' इति पयस एवोक्तेश्च। पयसो घनीभावार्थं पयःसंस्कारतया विहितं दध्यानयनं पयोर्थमेवेत्यामिक्षायागप्रयुक्तमेव दध्यानयनम्। न वाजिनप्रयुक्तमिति।

फलन्तु, पूर्वपक्षे दधिधर्मातिदेश आमिक्षायां। सिद्धान्ते तु पयोधर्मतेति।

इति नवमं तप्ते पयसि दध्यानयनस्याऽमिक्षाप्रयुक्तताधिकरणम् (सूत्राणि २२-२४)

अथ दशमं गवानयनस्य पदकर्माप्रयुक्तताधिकरणम्

पदकर्माप्रयोजकं नयनस्य परार्थत्वात्॥ २४॥

पूर्ववैषम्येणात्र शङ्कनात्**सङ्गतिः**। ज्योतिष्टोमे ''एकहायन्या सोमं क्रीणाति'' इति सोमक्रयं प्रकृत्य श्रूयते ''षट्पदान्यनुनिष्कामति, सप्तमं पदमञ्जलिना गृह्णाति'' इति, ''यर्हि हविर्धाने प्राचीं प्रवर्तयेयुस्तर्हि तेनाक्षमुपाञ्ज्यात्'' इति च। सोमं क्रेतुमेकहायनी गौर्यदा नीयते तदाऽध्वर्यु स्तस्याः पृष्ठतोऽनुगच्छति। ततः सप्तमे पदे हिरण्यं निधाय, आज्येन हुत्वा, तत्पदगतरजो गृह्णाति। तद्रजः संगृह्य हविर्धानयोः शकटयोः प्राङ्मुखतया प्रवर्तमानयोरक्षे तेन रजसा युक्तमञ्जनं प्रतिक्षिपेदिति **तदर्थः**। तत्र **सन्देहः**, यदेतदक्षाभ्यञ्जनं सप्तमपदसाध्यं तदर्थमप्येकहायनीनयनं, तेनापि प्रयुज्यते, उत क्रयार्थमेव नयनं, तेनैव प्रयुज्यत इति।

पूर्वपक्षस्तु, पूर्वत्र दध्यानयनस्य ''तप्ते पयसि'' इत्यादिवाक्येनाऽमिक्षामात्रार्थत्वेऽपि, एकहायनीनयनस्य वाक्येन क्रयार्थत्वावगमात्, क्रयस्याक्षाभ्यञ्जनस्य च द्वयोरप्येकहायनीनयनसाध्यत्वात् सन्निधानात् क्रयस्येव पदकर्मणोऽक्षाभ्यञ्जनस्यापि शेष इत्युभयार्थं सदुभाभ्यां प्रयुज्यते गोर्नयनमिति।

सिद्धान्तस्तु, ''एकहायन्या क्रीणाति'' इति तृतीयाश्रुत्या गोः क्रयार्थत्वावगमेन तत्संस्काररूपनयनस्यापि तदर्थतैवेति क्रय एवैकहायनीनयनप्रयोजको न पदकर्माक्षाभ्यञ्जनम्। तत्तु परार्थमेकहायनीनयनमुपजीवतीति। तदाह **सूत्रे, पदकर्म** पदसाध्यमक्षाभ्यञ्जनं नयनस्याप्रयोजकम्। नयनस्य क्रयरूपपरार्थत्वादिति।

फलन्तु, दैवात्सप्तमं पदं शिलादौ निधीयते, पदपांसुग्रहणाय सा पुनर्नेया पूर्वपक्षे। सिद्धन्ते तु न पुनर्नेया। किन्तु सप्तमपदासंस्कृतेनैव रजसा अक्षाभ्यञ्जनं कार्यमिति। न च परप्रयुक्तद्रव्योपजीविनस्तदलाभे लोप एव युक्त इति वाच्यम्। सप्तमपदसंस्काराभावेऽपि पांसुप्रयोजकस्याक्षाभ्याञ्जनविधेः सत्त्वादिति।

इति दशमं गवानयनस्य पदकर्माप्रयुक्तताधिकरणम्

अथैकादशं कपालानां तुषोपवापाप्रयुक्तताधिकरणम्

अर्थाभिधानकर्म च भविष्यता संयोगस्य तन्निमित्तत्वात्तदर्थो हि विधीयते ॥ २६ ॥

अत्रापि पूर्ववैषम्येण शङ्कनात्सङ्गतिः। दर्शपूर्णमासयोः ''कपालेषु श्रपयति'' इति श्रपणं पुरोडाशस्य कपाले श्रुतम्। तथा ''पुरोडाशकपालेन तुषानुपवपति'' इति कपाले तुषधारणञ्च श्रुतम्। ते च तुषाः सकपालाः ''रक्षसां भागोऽसि'' इति मन्त्रेण नैऋत्यां दिशि स्थापनीयाः। तत्र कपालः किं पुरोडाशश्रपणतुषोपवापाभ्यां प्रयुज्यते, अथ श्रवणेनैवेति **सन्देहः**।

पूर्वपक्षस्तु, नयनस्य क्रयणमात्रार्थतया पदकर्माप्रयुक्तत्वेऽपि पुोडाशकपालस्य ''पुरोडाशकपालेन'' इति तृतीयाश्रुत्या ''एकहायन्या क्रीणाति'' इत्यत्र एकहायन्याः क्रयार्थत्वस्येव तुषोपवापशेषत्वस्य अवगमात् पुरोडाशश्रपणेनेव तुषोपवापेनापि प्रयुज्यते कपाल इति।

सिद्धान्तस्तु , कपालस्य तृतीयाश्रुत्या तुषोपवापे विनियोगेऽपि पुरोडाशश्रपण इव न निरपेक्षं कपालमात्रं विनियुज्येत। किन्तु पुरोडाशेन संयुक्तम्। करिष्यमाणपुरोडाशेन संयोगश्च तस्य तादर्थ्यलक्षण एव। करिष्यमाणार्थत्वञ्च कपालस्य तत्प्रयुक्तत्वेनोपादानं विना न ज्ञातुं शक्यमिति पुरोडाशप्रयुक्तत्वेनोपात्तमेव तुषोपवापे विनियुज्यत इति न तुषोपवापेनापि प्रयुक्तिर्युक्ता प्रयुक्तस्य पुनः प्रयोगायोगात्। अतः पुरोडाशश्रपणेनैव प्रयुज्यत इति।

तदाह **सूत्रे, अर्थेन** पुरोडाशादिना **सहाभिधीयते** इत्यर्थाभिधानं पुरोडाशकपालादिकम्

तस्य कर्म च, तुषोपवापादिकर्म च अप्रयोजकमित्यनुषङ्गः । कुतः ? **भविष्यता** पुरोडाशेन **संयोगस्य तन्निमित्तत्वात्** तादर्थ्यलक्षणत्वात् । **तदर्थो हि** पुरोडाशाद्यर्थो हि, कपालादिस्तुषोपवापशेषत्वेन विधीयत इति ।

फलन्तु, सौर्यचरौ श्रपणाभावेन तदर्थं कपालानुपादानेऽपि तुषोपवापार्थं कपालोपादानं पूर्वपक्षे । **सिद्धान्ते तु नेति ।**

इत्येकादशं कपालानां तुषोपवापाप्रयुक्तताधिकरणम्

अथ द्वादशं शकृल्लोहितयोः पशावप्रयोक्तृत्वाधिकरणम्

पशावनालम्भाल्लोहितशकृतोरकर्मत्वम् ॥ २७ ॥

अत्रापि पूर्ववैषम्येण शङ्कनात्सङ्गतिः । ''अग्नीषोमीयं पशुमालभेत'' इति प्रकृत्य श्रूयते ''हृदयस्याग्रेऽवद्यति, अथ जिह्वायाः , अथ वक्षसः'' इत्यादि । तथा ''शकृत्संप्रविध्यति, लोहितं निरस्यति'' इति च । शकृत्सम्प्रविध्यति पुरीषं निष्कासयतीत्यर्थः । तत्र **सन्देहः** , किं हृदयादिकं शकृल्लोहितश्च पश्वालम्भस्य प्रयोजकमुत हृदयाद्येवेति ।

पूर्वपक्षस्तु, पूर्वत्र तुषोपवापस्य परप्रयुक्तशेषोपजीवित्वात्कपालं प्रत्यप्रयोजकत्वेऽपि लोहितशकृतोस्तदभावात् हृदयादिवाक्ये लोहितशकृद्वाक्ययोश्च पशुसम्बन्धाश्रवणात्, पशुप्रकरणपाठस्य च हृदयादेरिव शकृल्लोहितयोरपि साम्यात्, पशुसाध्यत्वसाम्याच्चाविशेषात् , हृदयादिवच्छकृदादिकमपि पश्वालम्भस्य प्रयोजकमिति ।

सिद्धान्तस्तु, स्यादेवं यदि विशेषो न स्यात् । ''अग्नीषोमीयं पशुमालभेत'' इति यागार्थतया श्रुतस्य पशोः विशसनावदानश्रवणेन नाशात्, साक्षान्न यागसाधनता । अपि तु हविःप्रकृतिद्रव्यतया । हविश्च यागार्थद्रव्यसंस्कारत्वेन निर्ज्ञातावदानसम्बन्धितया श्रुतं हृदयाद्येव । अभिषवयुक्तपूतीकवत् । अतो वाक्ये साक्षात्पशुसम्बन्धाश्रवणेऽपि हृदयादिनैव पशोः सम्बन्धः ।

तदर्थस्यैव तु पुरोडाशकपालवल्लोहितशकृद्भ्यां सम्बन्ध इति हृदयादिरेव प्रयोजको न शकृदादिः। शकृत्संप्रवेधो लोहितनिरसनञ्च शिष्टस्य प्रतिपत्तिमात्रम्। न चेष्टिशिष्टद्रव्यस्यैव प्रतिपत्तियोग्यत्वात् हविष्ट्वाभावे प्रतिपत्त्यर्हता नेति वाच्यम्। आकीर्णकरत्वेन फलीकरणवदनुनिष्पन्नस्यापि प्रतिपत्तियोग्यत्वाविरोधात्। अत एव **वाजिनयागोऽपि प्रतिपत्तिरिति** भाष्ये सप्तमे वक्ष्यत इति।

तदाह **सूत्रकारः पशौ लोहितशकृतोरकर्मत्वं** अप्रयोजकत्वम्। तदर्थं **पशोरनालम्भादिति। फलन्तु,** हृदयाद्यर्थमेवानुष्ठानमिति व्यक्तम्।

इति द्वादशं शकृल्लोहितयोः पशावप्रयोक्तृत्वाधिकरणम्

अथ त्रयोदशं पुरोडाशस्य स्विष्टकृदप्रयुक्तताधिकरणम् (सूत्राणि २८-३२)

एकदेशद्रव्यश्चोत्पत्तौ विद्यमानसंयोगात्॥ २८॥

निर्देशात्तस्यान्यदर्थादिति चेत्॥ २९॥ न शेषसन्निधानात्॥ ३०॥ कर्मकार्यात्॥ ३१॥ लिङ्गदर्शनाच्च॥ ३२॥

अत्रापि पूर्ववैषम्येण शङ्कनात्सङ्गतिः। दर्शपूर्णमासयोः "उत्तरार्धात्स्विष्टकृते समवद्यति" इति श्रुतः स्विष्टकृद्यागः उत्तरार्धस्य पुरोडाशस्य च प्रयोजक उत अग्न्यादिप्रयुक्तोपजीवीति **सन्देहः।**

पूर्वपक्षस्तु, लोहितशकृतोः प्रकृतपशुसम्बन्धेऽप्युत्तरार्धस्य न प्रकृताऽग्नेयपुरोडाशसम्बन्धो युक्तः। प्रकृतस्याग्न्याद्यर्थत्वात्। देवतान्तरार्थं कल्पितस्य देवतान्तरोद्देशेन त्यागे शिष्टाचारविरोधापातात्। अतो न प्रकृतान्वय इत्यपूर्वपुरोडाशस्योत्तरार्धस्य च प्रयोजक इति।

सिद्धान्तस्तु, उत्तरशब्दोऽर्धशब्दश्च सर्वनामत्वात् भागवाचित्वाच्च प्रकृतं कञ्चिद्भागिनमाकांक्षतः। तेन विनाऽन्वयबोधस्यैवायोगात्। प्रकृतश्च पुरोडाशोऽग्न्यादिदेवतार्थो भागवांश्च। तस्मात्तमेवोपजीव्य स्विष्टकृद्यागः प्रवर्तत इति नापूर्वस्य प्रयोजकः।

अन्यार्थस्यान्यसम्बन्धः ''शेषात्स्विष्टकृते समवद्यति'' इति ''उत्तरार्धात्स्विष्टकृते समवद्यति'' इत्यदिवचनादविरुद्ध इति ।

तदाह **सूत्रे** , परिकीयद्रव्यै**कदेशो द्रव्यं यस्य** स्विष्टकृदादेः कर्मणस्तदप्यप्रयोजक-मित्यनुषङ्गः । कुतः ? **उत्पत्तौ** उच्यमानदशायामेव उत्तरादिशब्दस्य **विद्यमानेन** प्रकृतेन पुरोडाशेन **संयोगात्** सम्बद्धतया अवगमादिति ।

फलन्तु, प्रकृतशेषेणैव स्विष्टकृद्याग इति । अत्रत्यसिद्धान्तमुपजीव्य ''आश्रयिषु'' इत्यत्र स्विष्टकृतः प्रतिपत्तिकर्मत्वमुक्तमिति, अत्रत्यपूर्वपक्षदशायां प्रतिपत्तित्वासिद्धेस्तत्रत्यन्यायेन पूर्वशेषद्रव्यकत्वसिद्धेः कथमपूर्वपुरोडाशप्रयोजकत्वपूर्वपक्ष इति शङ्कानवकाशः ।

इति त्रयोदशं पुरोडाशस्य स्विष्टकृदप्रयुक्तताधिकरणम् (सूत्राणि २८-३२)

अथ चतुर्दशं अभिघारणे शेषधारणतत्पात्रयोरननुष्ठानाधिकरणम् (सूत्राणि ३३-३९)

अभिघारणे विप्रकर्षादनुयाजवत्पात्रभेदः स्यात् ॥ ३३ ॥

(न वाऽपात्रत्वादपात्रत्वं त्वेकदेशत्वात् ॥ ३४ ॥ हेतुत्वाच्च सहप्रयोगस्य ॥ ३५ ॥ अभावदर्शनाच्च ॥ ३६ ॥ सति सव्यवचनम् ॥ ३७ ॥ न तस्येति चेत् ॥ ३८ ॥ स्यात्तस्य मुख्यत्वात् ॥ ३९ ॥)

पूर्वन्यायेनात्र शङ्कनात्**सङ्गतिः** । प्रकृतावग्नीषोमीयपशौ ''प्रयाजशेषेण हवींष्यभिघारयति'' इति श्रुतम् । तदेतत्प्रयाजशेषेण हविरभिघारणं चोदकपरम्परया वाजपेयगतपशुषु विकृतिभूतेषु प्राप्तम् । ते च द्विविधाः । क्रतुपशवः प्राजापत्यपशवश्चेति । ''आग्नेयं पशुमालभेत'' इत्यादिना विहिताः क्रतुपशवः । अन्ये तु ''सप्तदश प्राजापत्यान् पशूनालभते'' इति विहिताः । एते च द्विविधाः पशवः प्रातस्सवने सहैवोपक्रम्यन्ते । तत्रैव सर्वेषामर्थे प्रयाजा अनुष्ठीयन्ते । तत्रैव क्रतुपशव आलभ्यन्ते । प्राजापत्यास्तु ''ब्रह्मसाम्न्यालभते'' इति वचनाद्ब्रह्मसामस्तोत्रकाले माध्यन्दिनसवने आलभ्यन्ते । तत्र **सन्देहः**, किं प्रातस्सवनेऽनुष्ठितानां प्रयाजानां शेषो माध्यन्दिनकालीनप्राजापत्यवपाभिघारणाय धारयितव्यः । तदर्थश्च पात्रान्तरं सम्पाद्यम् । जुह्वाः

क्रत्वनुष्ठाने व्यापृतत्वात्। उत न धारयितव्यः, अतो न पात्रान्तरसम्पादनमिति। प्राजापत्यवपाभिः स्वाभिघारणाय प्रातःसवनीयप्रयाजशेषस्य धारणं प्रयुज्यते न वेति **फलितार्थः**।

पूर्वपक्षस्तु, प्रयाजशेषेणेति तृतीयया शेषे संस्कारकत्वस्य हवींषीति द्वितीयया हविषां संस्कार्यत्वस्य च श्रवणात्, शेषस्य प्रतिपत्तित्वे ''प्रयाजशेषं हविष्षु क्षारयेत्'' इति श्रवणापातात्, उपयुक्तसंस्कारादप्युपयोक्ष्यमाणसंस्कारस्याभ्यर्हितत्वाच्च, यथाऽन्यार्थस्याप्युत्तरार्धस्य वचनात्स्विष्टकृदर्थता तथाऽन्यार्थस्यापि प्रयाजशेषस्य हविरभिघारणार्थं धारणं तावत्कालं कर्तव्यम्। अन्यथा तदभिघारणासिद्धेः। तदर्थं पात्रान्तरं सम्पाद्यमिति।

तदाह **सूत्रे**, **अभिघारणे** निमित्ते तद्धारणार्थं पात्रभेदः स्यात्। **अनुयाजवत्** यथा पशावनूयाजार्थपृषदाज्यधारणार्थं पात्रभेदस्तद्वत्। कुतः ? **विप्रकर्षात्** प्राजापत्यवपानां विप्रकृष्ट-त्वादिति।

सिद्धान्तस्तु, शेषस्य हि प्रतिपत्तिरपेक्षिता। जुह्वां विद्यमानप्रयाजशेषभूताज्यस्य करिष्यमाणाऽज्यभागार्थाज्येनासाङ्कर्यार्थत्वात्। हविस्संस्कारस्त्वनपेक्षितः। उपस्तरणा-भिघारणाभ्यामेव पात्रासंसर्गार्थस्नेहनसिद्धेः। अनपेक्षितविधानादपेक्षितविधिरौचित्यप्राप्तः। प्रतिपत्तित्वे चाऽज्यभागार्थाज्येनाऽसांकर्यार्थं जुह्वा रिक्तताकरणं दृष्टमेव प्रयोजनं लभ्यते। न च दृष्टे सम्भवति हविस्संस्काररूपादृष्टकल्पना युक्ता। तस्माच्छेषः स्वप्रतिपत्तिरूपसंस्कारार्थः। अतः प्रधानभूतशेषेतिप्रातिपदिकानुरोधेन गुणभूतविभक्तिबाधेन ''प्रयाजशेषं हविष्षु क्षारयति'' इति वाक्यार्थः। तानि च सन्निधानात्प्रातःसवनीयपशुहर्वींष्येव। एवञ्च हविराघारनियमात् तत्संस्कारोऽपि भवतीति स्विष्टकृद्वत्सूक्तवाकवच्चोभयार्थं हविष्षु शेषस्थापनमिति।

फलन्तु, धारणपृथक्पात्रसम्पादनयोरकर्तव्यता।

इति चतुर्दशमभिघारणे शेषधारणतत्पात्रयोरननुष्ठानाधिकरणम् (सूत्राणि ३३-३९)

अथ पञ्चदशं समानयनस्याऽज्यधर्मप्रयोजकताधिकरणम् (सूत्रे ४०-४१)

समानयनन्तु मुख्यं स्याल्लिङ्गदर्शनात्॥ ४०॥

(वचने हि हेत्वसामर्थ्ये ॥ ४१ ॥)

पूर्वन्यायेन शङ्कनात्सङ्गतिः। दर्शपूर्णमासयोराज्यग्रहणं प्रकृत्य श्रूयते, ''चतुर्जुह्वां गृह्णाति, अष्टावुपभृति, चतुर्ध्रुवायां'' ''यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तत्'' ''यदुपभृति प्रयाजानूयाजेभ्यस्तत्'' ''सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्यम्'' इति, तथा ''अतिहायेऽडो बर्हिः प्रति समानयति जुह्वामौपभृतम्'' इति। **अस्यार्थः**, पञ्चानां प्रयाजानां मध्ये तृतीयः प्रयाज इच्छब्देन बहुवचनान्तेनोच्यते। तं तृतीयं प्रयाजमतिक्रम्य बर्हिर्नामकचतुर्थादिप्रयाजं होतुमुपभृत्संज्ञिकायां स्रुचि स्थितं घृतं जुह्वामानेतव्यमिति। तत्र **सन्देहः**, तदेतदानयनमुपभृत्याज्यग्रहणस्य प्रयोजकमुत नेति।

पूर्वपक्षस्तु, पूर्वत्र यथा परकीयद्रव्यस्य संस्कारत्वादभिघारणमप्रयोजकमित्युक्तम् तथा जुह्वामौपभृताज्यस्याऽनयनमुपभृत्याज्यग्रहणस्य न प्रयोजकम्। जौहवं हि केवलं प्रयाजार्थम्। औपभृतन्तु प्रयाजानूयाजार्थमिति प्रयाजेषु जौहवमौपभृतञ्चोभयं विकल्प्यते। तथा सति यदा जौहवैन प्रयाजा इज्यन्ते तदौपभृतस्यानयनमेव नास्ति। आनयनस्य प्रयोजकता कुतः ?। यदा त्वौपभृतेन प्रयाजहोमस्तदानीमौपभृतस्यार्थं पञ्चप्रयाजार्थम्। प्रयाजेभ्य इति विभक्त्यश्रवणेऽप्यनूयाजप्रातिपदिकपराया अत्राप्यनुषङ्गात्। इतरदनूयाजार्थम्। तयोरर्धयोर्मध्ये प्रयाजसाधनमर्धं प्रथमप्रयाजकाल एव जुह्वामानीतमिति न तस्य चतुर्थोत्तरप्रयाजद्वयं प्रति समानयनं विधीयते। तदानीं तत्र तदभावात्। यत्त्वनूयाजार्थमितरत्तदर्धमुपभृत्यवशिष्टं तन्मध्ये किञ्चिच्चतुर्थादिप्रयाजं प्रति समानेतव्यम्। तच्चानूयाजप्रयुक्तमेव। ततस्तत्संस्काररूपमानयनं न तस्य प्रयोजकमिति।

सिद्धान्तस्तु, यज्जौहवं तत्प्रयाजत्रयार्तम्। यच्चौपभृतं तत् प्रयाजौ चानूयाजाश्च (तेभ्यः) प्रयाजानूयाजेभ्य इति विग्रहाश्रयणेनावशिष्टप्रयाजद्वयार्थमनूयाजार्थश्चेत्येवं वाक्यद्वयस्य व्यवस्थायां सम्भवन्त्याम् अष्टदोषदुष्टविकल्पाश्रयणस्यानुचितत्वात्प्रयाजद्वयार्थमुपभृति गृहीतस्यैव जुह्वामानयनम्। एवं हि प्रयाजार्थमुपभृति गृहितस्य होमार्थं जुह्वामानयनं प्राप्तमनूद्य ''अतिहायेडो बर्हिः प्रति'' इत्येवं कालमात्रविधानाल्लाघवं दृष्टार्थश्चानयनं भवति। अन्यथाऽनूयाजार्थस्यानयने तदानयनमदृष्टार्थमत्यन्ताप्राप्तं क्षारणं विधेयमिति गौरवं स्यात्। अतो जुह्वामौपभृतस्यानयनमुप-

भृत्याजन्यग्रहणस्य प्रयोजकमेवेति। तदाह सूत्रे, समानयनमौपभृतस्य मुख्यं प्रयोजकं स्यात्। कुतः ? लिङ्गदर्शनात् आतिथ्येष्टौ चतुर्गृहीतिबहुत्वरूपलिङ्गस्य दर्शनादित्यर्थः। एवं हि तत्र श्रूयते ''चतुर्गृहीतान्याज्यानि भवन्ति। न ह्यत्रानूयाजान् यक्ष्यन् भवति'' इति। यदि प्रयाजेषु जौहवौपभृतयोः पूर्वपक्षोक्तदिशा विकल्पस्तर्हि ''इडान्ताऽऽतिथ्या सन्तिष्ठते'' इतीडान्तायामातिथ्यायामनूयाजाभावेन तदर्थमुपभृति चतुर्गृहीत्यभावेन प्रयाजार्थं जुह्वां वोपभृति वैकं चतुर्गृहीतं ध्रुवायामेकं चतुर्गृहीतमिति द्वयमेव चतुर्गृहीतं स्यात्। जौहवं प्रयाजत्रयार्थमौपभृतं प्रयाजद्वयार्थमिति द्वयोः समुच्चयपक्षे जुह्वामेकं चतुर्गृहितं, उपभृत्यपरं, ध्रुवायामन्यदिति चतुर्गृहीतिबहुत्वं युक्तमिति।

फलन्तु, समुच्चय इति व्यक्तम्।

इति पञ्चदशं समानयनस्याऽऽज्यधर्मप्रयोजकताधिकरणम् (सूत्रे ४०-४१)

अथ षोडशमौपभृतजौहवयोः क्रमेणोभयानुभयार्थताधिकरणम् (सूत्राणि ४२-४५)

तत्रोत्पत्तिरविभक्ता स्यात्॥ ४२॥

(तत्र जौहवमनुयाजप्रतिषेधार्थम्॥ ४३॥ औपभृतं तथेति चेत्॥ ४४॥ स्याज्जुहूप्रतिषेधान्नित्यानुवादः॥ ४५॥)

पूर्वन्यायेन वा, पूर्वाऽक्षेपेण वाऽत्र शङ्कनात्सङ्गतिः। पूर्वोदाहृतजुह्वादिवाक्य-त्रयोक्तान्याज्यानि किं सर्वाणि सर्वाज्यकार्यार्थान्युत जौहवं प्रयाजार्थमौपभृतमनूयाजार्थमिति, किं वा जौहवं प्रयाजत्रयार्थमौपभृतमवशिष्टप्रयाजानुयाजार्थं, ध्रौवन्तु तदन्यसर्वार्थमिति सन्देहः।

यथा हि पूर्वत्र समानयनं चिकीर्षितप्रयाजद्वयार्थं। दृष्टानुरोधात्। एवमत्राप्युत्पत्तौ विशेषाश्रवणाद्दृष्टानुरोधात्पात्रत्रयगतमाज्यं चिकीर्षितसर्वाज्यकार्यार्थम्। ''यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तत्, यदुपभृत्यनूयाजेभ्यस्तत्'' इति केवलप्रयाजाद्यर्थत्वश्रवणं त्ववयुत्याऽनुवाद इत्याद्यः पूर्वः पक्षः।

तदाह **सूत्रे**, **तत्र जौहवादावुत्पत्तिरविभक्ता**, अविशेषिता । **ततस्तेषां सर्वार्थतेति** । पूर्वत्र समानयनस्यौपभृतप्रयोजकत्वं यदुक्तं तदौपभृतस्य प्रयाजानुयाजोभयार्थत्वे युक्तं स्यात् । तदेव न सम्भवति । ''यदुपभृत्यनूयाजेभ्यस्तत्'' इति वाक्यान्तरेण केवलानूयाजार्थताश्रवणात् । तस्य वाक्यस्य विधायकत्वेन सार्थक्यसम्भवेऽनर्थकानुवादत्वायोगात्केवलप्रयाजार्थं जौहवमनूयाजमात्रार्थमौपभृतमिति **द्वितीयः** । तदाह **सूत्रे**, **औपभृतं तथेति चोदिति** ।

सिद्धान्तस्तु, जौहवस्य प्रयाजमात्रार्थत्वेऽप्यौपभृतस्य नानूयाजमात्रार्थत्वम् । ''यदुपभृति प्रयाजानूयाजेभ्यस्तत्'' इत्युभयार्थतावचनात्तदुभयार्थम् । ध्रौवाज्यं तदुभयान्यसर्वार्थम् । केवलानूयाजार्थतावचनन्तूभयार्थवचनप्राप्तार्थत्वादगत्याऽनुवाद इति ।

फलन्तु , औपभृतस्य प्रागुक्तदिशोभयार्थत्वसिद्धिः ।

इति षोडशमौपभृतजौहवयोः क्रमेणोभयानुभयार्थताधिकरणम् (सूत्राणि ४२-४५)

अथ सप्तदशमुपभृति द्विचतुर्गृहीताचरणाधिकरणम् (सूत्राणि ४६-४८)

तदष्टसंख्यं श्रवणात् ॥ ४६ ॥

(अनुग्रहाच्च जौहवस्य ॥ ४७ ॥ द्वयोस्तु हेतुसामर्थ्यं श्रवणश्च समानयने ॥ ४८)

पूर्वन्यायेन शङ्कनात्सङ्गतिः । ''अष्टावृपभृति गृह्णाति'' इत्यत्र किमष्टसंख्याकैकग्रहण-विधिरुत चतुःसख्याकग्रहणद्वयविधिरिति **सन्देहे**, ''अष्टावुपभृति गृह्णाति'' इत्यष्टसङ्ख्याकग्रहणश्रवणादष्टसङ्ख्याकग्रहणरूपमेकमेव हविर्विधीयते । ''चतुर्गृहीतं जुहोति'' इति श्रुतसंख्या तु, यथा पूर्वत्र ''चतुर्ध्रुवायां'' इत्युत्पन्नमाज्यं प्रयाजानूयाजान्यविषयं तथा तदुभयान्यविषया । चतुस्संख्याकग्रहणद्वयविधौ तु अष्टावित्यस्य लक्षणाप्रसङ्गादिति **प्राप्तम्** । तथा च **सूत्रं** , **अष्टसङ्ख्यं तद्ग्रहणं** विधीयते । **श्रवणादिति** ।

सिद्धान्तस्तु, ''चतुर्गृहितं जुहोति'' इत्यनारभ्य श्रुतं वाक्यं होममात्रोद्देशेन चतुर्गृहीतं विदधत्प्रयाजाद्युद्देशेनापि विदधातीति चतुर्गृहीतं फलवत्प्रधानभूतहोमाङ्गम् । अष्टसंख्या तु

होमाङ्गग्रहणाङ्गमिति अङ्गाङ्गभूताष्टसंख्यया न प्रधानाङ्गं चतुष्ट्वं बाधितुं शक्यमिति । अष्टत्वस्य ग्रहणस्वरूपमात्राङ्गत्वे नैष्फल्याल्लक्षणया हविर्भूतचतुर्गृहीतद्वयपरमष्टाविति पदम् ।

फलन्तु, अनूयाजरहितातिथ्येष्ट्यादौ नाष्टगृहीतम् ॥ किन्तूपभृत्यपि पूर्वोक्तदिशा प्रयाजाद्यर्थश्चतुर्गृहीतमेवेति ।

इति सप्तदशमुपभृति द्विचतुर्गृहीताचरणाधिकरणम् (सूत्राणि ४६-४८)

इति श्रीभाट्टसंग्रहे सर्वतन्त्रस्वतन्त्रश्रीसुधीन्द्रतीर्थगुरुपादशिष्य
श्रीराघवेन्द्रतीर्थयतिसार्वभौमकृते चतुर्थाध्यायस्य प्रथमः पादः

अस्मिन् पादे	अधिकरणानि	१७	सूत्राणि	४८
आदितः	अधिकरणानि	२६३	सूत्राणि	७०५

अथ चतुर्थाध्यायस्य द्वितीयः पादः ।

अथ प्रथमं स्वरोश्छेदनाद्यप्रयोजकताधिकरणम् (सूत्राणि १-६)

पूर्वपादे साक्षाद्यज्ञसाधनानां हविरादीनां तत्सम्बन्धिनां तुषोपवापादीनाञ्च प्रयोजकत्वाप्रयोजकत्वे चिन्तिते । अत्र तु परम्परासाधनानां स्वरुशाखादीनां प्रयोजकत्वाप्रयोजकत्वे चिन्त्येते इति **पादभेदः** पूर्वानन्तरता चास्य **ध्येया** । साक्षात्साधनविषयचिन्तनानन्तरं व्यवहितसाधनविषयचिन्ताया उचितत्वादिति ।

स्वरुस्त्वनेकनिष्पत्तिः स्वकर्मशब्दत्वात् ॥ १ ॥

(जात्यन्तराच्च शङ्कते ॥ २ ॥ तदेकदेशो वा स्वरुत्वस्य तन्निमित्तत्वात् ॥ ३ ॥ शकलश्रुतेश्च ॥ ४ ॥ प्रतियूपश्च दर्शनात् ॥ ५ ॥ आदाने करोतिशब्दः ॥ ६ ॥)

अग्नीषोमीयपशौ श्रूयते ''यूपस्य स्वरुं करोति, स्वरुणा पशुमनक्ति'' इति । **स्वरुर्नाम** यूपार्थं खदिरादिवृक्षच्छेदे यः प्राथमिकः शकलः पतितः सोऽभिधीयते । स किं स्वरुश्छेदनादियूपधर्माणां खदिरादिवृक्षस्य च प्रयोजकः किं वा नेति **सन्देहः** ।

पूर्वपक्षस्तु, करोतीत्यनेन मुख्यवृत्त्या भावनोच्यते ''स्वरुं भावयेत्'' इति । तस्य करणेतिकर्तव्यताकांक्षायां यूपशब्दोपलक्षितः खदिरादिवृक्षः करणत्वेन, छेदनादिरितिकर्तव्यतात्वेनान्वेति । ''च्छिन्नेन खदिरादिवृक्षेण स्वरुमुत्पादयेत्'' इति विशिष्टविधानाच्च न वाक्यभेदः । एवमुत्पन्नस्य स्वरोः ''स्वरुणा'' इति वाक्येन पश्वञ्जने विनियोगः । तस्मात्स्वरुश्छेदनादेः प्रयोजक इति ।

तदाह **सूत्रे, स्वरुस्त्वनेकनिष्पत्तिः** यूपेन सहैकनिष्पत्तिर्न भवति । यूपमनपेक्ष्य पृथक्तक्षणादिनोत्पाद्य इति यावत् । कुतः ? स्वरुं करोति'' इति स्वरुभावनाबोधकशब्दवत्त्वादिति।

सिद्धान्तस्तु, स्वरुणेति वाक्येऽअनसाधनत्वेनावगतस्य स्वरोरर्थप्राप्तमादानं करोतिनाऽनूद्य ''यत्स्वरुमुपादत्ते तद्यूपस्य'' इति लाघवेन यूपीयत्वविशेषणमात्रविधिसम्भवे करणेतिकर्तव्यता-

विशिष्टभावनाविधिगौरवस्य प्राथमिकयूपपदे खदिरादिवृक्षलक्षणाश्रयणस्य चायोगात्। भावनायां मुख्यस्यापि करोतेर्जघन्यत्वेनोपादानलक्षणाया मुख्ययूपपदलक्षणातो वरत्वात्। तस्माद्यूपानु-निष्पाद्यः स्वरुर्न यूपधर्मादिः प्रयोजक इति।

फलन्तु, ''खलेवाली यूपो भवति'' इत्यत्र स्वरोः खदिरादिप्रयोजकता **पूर्वपक्षे** । **सिद्धान्ते** तु यः कश्चिच्छकल उपादेय इति ।

इति प्रथमं स्वरोश्छेदनाद्यप्रयोजकताधिकरणम् (सूत्राणि १-६)

अथ द्वितीयं शाखाया आहार्यताधिकरणम्

शाखायां तत्प्रधानत्वात्॥ ७॥

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः । दर्शपूर्णमासयोः ''यत्पर्णशाखया वत्सानपाकरोति'' इति पलाशशाखां प्रकृत्य ''यत्प्राचीमाहरेद्देवलोकमभिजयेत्'' इति श्रुतम्। तत्र किं प्राचीशब्दो दिग्वाची किं वा प्राग्दिगवस्थितशाखावाचीति **सन्देहः** ।

पूर्वपक्षस्तु, प्राचीशब्दस्य पूर्वदिगवस्थितशाखापरत्वे प्राचीशब्दे लक्षणा स्यात् । न च सा पूर्वत्र यूपशब्दस्येव प्राथमिकस्य युक्ता। न च दिक्परत्वे तदाहरणस्याशक्यतया द्वितीयायाः सप्तम्यर्थलक्षणया ''दिश्याहरति'' इति तुल्या लक्षणेति वाच्यम् । प्रत्ययलक्षणातो मुख्यप्रातिपदिकलक्षणाया अयुक्तत्वादिति।

सिद्धान्तस्तु, दिक्प्रातिपदिकेन दिगवच्छिन्नो देशो लक्षणीयः, द्वितीयया च सप्तम्यर्थः, प्राचीदिगवच्छिन्नदेश आहरतीति त्वयापि वाच्यत्वेन, प्रातिपदिकप्रत्यययोरुभयोरपि लक्षणातः प्रातिपदिकमात्रस्य प्राचीदिगवस्थितशाखालक्षणाया वरत्वाच्छाखापरः प्राचीशब्द इति।

तदाह **सूत्रे**, **शाखायामेव** प्राचीशब्दः प्रवर्तते । **तत्प्रधानत्वात्** शाखाप्रधानत्वात् तां प्रकृत्य श्रुतत्वादिति यावत्।

फलन्तु, पूर्वपक्षे या काचिच्छाखा प्राचीदिश्याहरणीया। **सिद्धान्ते** तु वृक्षस्य प्राचीशाखा यत्किञ्चिद्दिशं प्रत्याहरणीयेति।

इति द्वितीयं शाखाया आहार्यताधिकरणम्

अथ तृतीयं छेदनस्य शाखाप्रयुक्तताधिकरणम् (सूत्रे ८-९)

शाखायां तत्प्रधानत्वादुपवेषेण विभागः स्याद्वैषम्यात्॥ ८॥

(श्रुत्यपायाच्च॥ ९॥)

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः। दर्शपूर्णमासयोः श्रूयते ''शाखामाच्छिनत्ति'' ''शाखामाहरति'' ''मूलतः शाखां परिवास्योपवेषं करोति'' इति। येयं पलाशशाखा छित्वा वृक्षादाहृता तां पुनश्छित्वा मूलभागः प्रादेशपरिमित **उपवेषाख्यः** कार्यः। तयोरग्रमूलयोः शाखाभागयोः पृथग्विनियोगः श्रुतः ''शाखया वत्सानपाकरोति'' इति ''उपवेषेण कपालान्युपदधाति'' इति। तत्र वत्सापाकरणोपधाने द्वे अपि शाखाछेदनाहरणपरिवासनानां प्रयोजके, उतोपधानं न प्रयोजकम्, वत्सापाकरणमेव प्रयोजकमिति **सन्देहः।**

पूर्वपक्षस्तु, ''शाखामाच्छिनत्ति'' इति , आदौ श्रुतशाखाशब्दस्य समूलाग्रवाचित्वात् वृक्षच्छेदेन समाहृतया च तया वत्सापाकरणोपधानरूपकार्यद्वयस्यापि निष्पत्तेर्द्वयोरपि तयोश्छेदनादिकमङ्गम्। परिवासनस्यापि ''शाखां परिवास्य मूलत उपवेषं करोति'' इति व्यवहितमपि मूलमुपवेषेण, पूर्वत्र व्यवहिताऽपि शाखा आकांक्षादिवशात् प्राचीशब्देनेवान्वीयत इति व्यवहितान्वयेनोपवेषार्थत्वस्याप्यवगमादुभयं छेदनादेः प्रयोजकमिति।

सिद्धान्तस्तु, छेदनादिवाक्ये शाखाशब्दस्य समूलाग्रवाचित्वेऽपि परिवासनवाक्ये-ऽग्रमात्रवाचित्वैव। मूलतः परिवासनश्रवणेऽपि मूलतः परिवासनायोगेन अग्रवाचितैव तत्रोपेयेत्यग्रार्थं परिवासनम्। परिवासनविशेषणञ्च मूलं तद्द्वारेणाग्रार्थमेव। समूलाग्रशाखायाश्छेदनमाहरणञ्च। समूलाग्रस्य छेदनाहरणयोरभावे मूलतः परिवासनायोगात्। अतः परिवाासनं मूलच्छेदनमाहरणं

सर्वमग्रार्थम्। अग्रश्च वत्सापाकरणार्थमिति तदेव छेदनादेः सर्वस्य प्रयोजकम्। नोपधानम्। तत्त्वग्रार्थपरिवासनादनुनिष्पन्नेन मूलेनोपवेषसंज्ञकेनानुष्ठीयते। न च ''परिवास्य मूलत उपवेषं करोति'' इति क्त्वाश्रुत्योपवेषार्थं परिवासनमिति वाच्यम्। व्यवहितान्वयदोषात्, वाक्यादपि बलीयस्या द्वितीयाश्रुत्या शाखापदोक्ताग्रार्थत्वावगमाच्चेति।

तदाह **सूत्रे, शाखायामेव** मूलापादानकपरिवासनसम्बन्धः। शाखाया द्वितीयान्ततया परिवासनस्य शाखाप्रधानत्वत् शाखार्थत्वावगमात्। **उपवेषेण** तु परिवासनस्य **विभागः स्यात्** असम्बन्धः स्यात्। न चोपवेषस्यापि द्वितीयान्तत्वाविशेषात्कथं न तदन्वय इति वाच्यम्। वैषम्यात्। उपवेषे हि द्वितीया करोत्यपेक्षया। न तु शाखावत्परिवासनापेक्षयेति वैषम्यादिति।

फलन्तु, पौर्णमास्यामपि कपालोपधानार्थं शाखाऽहरणीया **पूर्वपक्षे। सिद्धान्ते** तु येन केनचित्काष्ठेनोपवेषाख्येन कपालोपधानमिति।

इति तृतीयं छेदनस्य शाखाप्रयुताधिकरणम् (सूत्रे ८-९)

अथ चतुर्थं शाखाहरणस्य प्रतिपत्तिकर्मताधिकरणम् (सूत्राणि १०-१३)

हरणे तु जुहोतिर्योगसामान्याद्द्रव्याणाञ्चार्थशेषत्वात्॥ १०॥

(प्रतिपत्तिर्वा शब्दस्य तत्प्रधानत्वात्॥ ११॥ अर्थेऽपीति चेत्॥ १२॥ न तस्याधिकारादर्थस्य च कृतत्वात्॥ १३॥)

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः। दर्शपूर्णमासयोः श्रूयते ''सह शाखया प्रस्तरं प्रहरति'' इति। तत्र किं शाखाप्रहरणं शाखायाः प्रयोजकमुत नेति **सन्देहः**।

पूर्वपक्षस्तु, प्रस्तरप्रहरणं तावत्प्रस्तरप्रतिपत्तिकर्म सदपि यागरूपञ्च भवतीत्यर्थकर्मेत्युक्तं पूर्वाध्यायद्वितीयपादे **सूक्तवाके च कालविधिः परार्थत्वादिति** पञ्चमेऽधिकरणे। तथा च तत्साधनभूतप्रस्तरेण सहभावश्रवणाच्छाखापि तत्साधनमित्यवगम्यते। प्रहरतीति च यागोपलक्षणार्थं ''प्रस्तरेण शाखया च यजेत'' इति। तस्मात्पूर्वत्र वत्सापाकरणमिव शाखाप्रहरणमपि यागरूपत्वात् द्रव्यभूतशाखायां प्रयोजकमिति।

तदाह **सूत्रकारः**, **हरणे तु जुहोतिः** स्यात् । हरणं याग एव स्यादिति यावत् । ततश्च प्रस्तरवच्छाखाया अपि सहशब्दयोगसामान्यात् गुणभाव एव तत्र युक्तः । न प्राधान्यम् । न च वत्सापाकरणे विनियुक्तशाखायाः प्रतिपत्तिरेव न्याय्येति वाच्यम् । **द्रव्याणाश्चार्थशेषत्वा-दर्थक्रियां** प्रति शेषत्वस्य न्याय्यत्वात् । विनियुक्तविनियोगस्य प्रमाणे सति न्याय्यत्वादिति।

सिद्धान्तस्तु, हरतेर्यागोपलक्षणार्थत्वे प्रस्तरस्य प्रतिपत्तिर्न सिद्ध्येत् । किन्तु प्रक्षेपार्थत्वमेव । तत्रैव शाखायाः सहभावो न यागे । ''सूक्तवाकेन प्रस्तरं प्रहरति'' इत्यत्रापि हरतिर्न यागार्थः । किन्तु सूक्तवाकविनियोगबलान्मान्त्रवर्णिकदेवतामुपलभ्य द्रव्यदेवताभ्यां यागः कल्प्यते । शाखाप्रहरणे तु नास्ति देवता । सूक्तवाकस्य तत्राविनियोगात् । तस्मात् हरतिशब्दिते आहवनीयप्रक्षेपमात्रे शाखायाः सहभावात्, हरतौ च प्रस्तरस्य प्रतिपाद्यत्वात् शाखाया अपि वत्सापाकरणोपयुक्तायाः प्रतिपत्तिरिति ।

फलन्तु पूर्वपक्षे पौर्णमास्यामपि पलाशशखाहरणं कार्यम् । **सिद्धान्ते** तु नेति ।

इति चतुर्थं शाखाहरणस्य प्रतिपत्तिकर्मताधिकरणम् (सूत्राणि १०-१३)

अथ पञ्चमं निनयनस्य प्रतिपत्तिकर्मताधिकरणम् (सूत्रे १४-१५)

उत्पत्त्यसंयोगात्प्रणीतानामाज्यवद्विभागः स्यात् ॥ १४ ॥

(संयवनार्थानां वा प्रतिपत्तिरितरासां तत्प्रधानत्वात् ॥ १५ ॥)

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः । दर्शपूर्णमासयोः श्रूयते ''अपः प्रणयति'' इति । चमसपात्रेण प्रणीतानां तासामपां प्रयोजनमेवं श्रूयते ''प्रणीताभिर्हवींषि संयौति'' इति, ''अन्तर्वेदि प्रणीता निनयति'' इति च । **संयवनं** पुरोडाशार्थं पेषणम् । **निनयनं** चतुर्दिक्षु सेचनम् । तत्र **सन्देहः**, संयवनं निनयनश्चोभयमपां प्रणयनस्य प्रयोजकमुत संयवनमेव तथा । निनयनन्तु प्रतिपत्तिरिति ।

पूर्वपक्षस्तु, ''अपः प्रणयति'' इत्युत्पत्तिवाक्ये संयवननिनयनयोरन्यतरेणाप्यसंयोगात् किमर्थं वयं प्रणीताः ? इति प्रयोजनाकांक्षायां सत्यामुभयमपि प्रयोजनमुपाददत इत्युभयार्थाः

सत्य उभाभ्यां प्रयुज्यन्ते। ''प्रस्तरं प्रहरति'' इत्यत्र द्वितीयायास्तृतीयार्थत्वमिव ''प्रणीताः'' इति द्वितीयाया अपि प्रणीताभिरित्येव तृतीयार्थत्वकल्पनादुभयमपां प्रणयनस्य प्रयोजकमिति। तदाह **सूत्रे, उत्पत्तौ** केनचित्प्रयोजनेन **असंयोगात्** प्रणीतानां **विभागः स्यात्**। कश्चिदंशः संयवने कश्चिन्निनयन इति विभागः स्यात्। **आज्यवत्** ''सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्यम्'' इत्युक्तध्रौवाज्यमंशभेदेन सर्वार्थं यथा तद्वदिति।

सिद्धान्तस्तु, उत्पत्तौ प्रणीतानामपां प्रयोजनाकांक्षिणीनां विनियोजकवाक्ये प्रणीताभिरिति तृतीयाश्रुत्या संयवनार्थत्वावगमात्संयवनमेव प्रयोजकम्। निनयनवाक्ये तु प्रणीता इति द्वितीयया संस्कार्यत्वावगमान्निनयनं संयवनोपयुक्तशेषस्य प्रतिपत्तिरिति न प्रयोजकमिति।

फलन्तु, पुरोडाशाभावे प्रणीतानामभाव इति।

इति पञ्चमं निनयनस्य प्रतिपत्तिकर्मताधिकरणम् (सूत्रे १४-१५)

अथ षष्ठं दण्डदानस्यार्थकर्मताधिकरणम् (सूत्राणि १६-१८)

प्रासनवन्मैत्रावरुणाय दण्डप्रदानं कृतार्थत्वात्॥ १६॥

(अर्थकर्म वा कर्तृसंयोगात्स्रग्वत्॥ १७॥ कर्मयुक्ते च दर्शनात्॥ १८॥)

पूर्वन्यायेनात्रापि शङ्कनात्सङ्गतिः। ज्योतिष्टोमे श्रूयते'' दण्डेन दीक्षयति'' इति। दीक्षितस्य दण्डधारणं विधाय पुनराम्नातम् ''क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति'' इति मैत्रावरुणाय दण्डप्रदानम्। तत्र मैत्रावरुणाय यद्दण्डप्रदानं तत्किं दण्डस्य प्रयोजकमुत नेति **सन्देहः**।

पूर्वपक्षस्तु, यथा हि पूर्वत्र संयवनेन कृतार्थस्य द्रव्यस्य निनयनं प्रतिपत्तिरित्युक्तम् तथा दण्डदानमपि। दण्डो हि यजमानधारणेन कृतार्थः। यजमानो ह्यध्वर्युणा दीक्षासिद्ध्यर्थं दत्तं दण्डमासोमक्रयाद्धारयति। '' दण्डं प्रयच्छति '' इति द्वितीयया संस्कार्यत्वावगमाच्च

प्रतिपत्ति कर्म दण्डदानम्। मैत्रावरुणहस्ते प्रक्षिप्यत इत्यतो न प्रयोजकमिति। तदाह सूत्रे, कृष्णविषाणप्रासनवत् **मैत्रावरुण**सम्प्रदानकमपि **दण्डदानं** प्रतिपत्तिः स्यात्। कुतः ? **कृतार्थत्वादिति।**

सिद्धान्तस्तु, उपयुक्तसंस्कारादुपयोक्ष्यमाणसंस्कारो हि प्रशस्तः। उपयुक्तसंस्कारो हि तन्मात्रपर्यवसायी सन्न कार्यपर्यवसायीत्यप्रशस्तः। उपयोक्ष्यमाणसंस्कारस्तु कार्यपर्यवसायीति प्रशस्तः। इह च ''दण्डी प्रैषानन्वाह'' इति वचनेन यदा मैत्रावरुणः स्थित्वा प्रैषाननुवदति तदाऽवलम्बनाय दण्डस्यापेक्षितत्वाद्दृष्टार्थो दण्ड इति मैत्रावरुणार्थं दण्डप्रदानमिति दण्डस्य प्रयोजकम्। ''कर्मणा यमभिप्रैति स सम्प्रदानम्'' इत्युक्त्या दानकर्मणा दण्डेन मैत्रावरुणस्याभिप्रेतत्व एव सम्प्रदानत्वेन चतुर्थीप्राप्त्या तया मैत्रावरुणार्थत्वावगमाद्दण्डस्य। द्वितीया तु ''तथा युक्तञ्चानीप्सितम्, इत्यनेनेति, दण्डस्य तया नाभिप्रेयमाणत्वसिद्धिः। येन तद्दानं न प्रतिपत्तिः स्यादिति।

फलन्तु, निरूढपशावपि दीक्षिते मैत्रावरुणार्थत्वेनैव दण्डसम्पादनसिद्धिः।

इति षष्ठं दण्डदानस्यार्थकर्मताधिकरणम् (सूत्राणि १६-१८)

अथ सप्तमं प्रासनस्य प्रतिपत्तिकर्मताधिकरणम्

उत्पत्तौ येन संयुक्तं तदर्थं तत्, श्रुतिहेतुत्वात्, तस्यार्थान्तरगमने शेषत्वात्प्रतिपत्तिः स्यात्॥ १९॥

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः। ज्योतिष्टोमे ''कृष्णविषाणया कण्डूयते'' इति कण्डूयन साधनत्वेन कृष्णविषाणं विधाय श्रूयते ''नीतासु दक्षिणासु चात्वाले कृष्णविषाणं प्रास्यति'' इति। यजमानेन दत्ता दक्षिणाः ऋत्विग्भिर्यदा नीतास्तदा यजमानस्तस्य हस्ते धृतं कृष्णमृगस्य शृङ्गञ्चात्वालनामके गर्ते परित्यजेदिति तदर्थः। तत्र **सन्देहः,** किं चात्वाले प्रासनं प्रयोजनशब्दितार्थाय विधीयमानतयाऽर्थकर्मभूतं सत् कृष्णविषाणप्रयोजकमुत प्रतिपत्तिकर्म सन्न प्रयोजकमिति।

पूर्वपक्षस्तु, कृष्णविषाणप्रासनमपूर्वार्थतयाऽर्थकर्मेत्यङ्गीकर्तुमुचितम्। कण्डूयनेन कृतार्थस्य प्रासनरूपसंस्कारे प्रयोजनाभावात्। कार्ययोग्यतापादनस्य संस्कारत्वात्। कृतकार्ये च पुनः कार्ययोग्यतापादनायोगात्। अतोऽर्थकर्मैवेति युक्तम्। **द्वितीया तु पूर्वत्रेव** ''तथा युक्तञ्चानीप्सितम्'' इत्यनेनेति, ''कृष्णविषाणया साधितेन प्रासनेनापूर्वं कुर्यात्'' इति वाक्यार्थ इति।

सिद्धान्तस्तु कृतार्थेऽपि द्रव्ये व्याकीर्णतया ''यज्ञदेशविविक्तीकरणाय किं देशान्तरं नेयम् ?'' इति प्रतिपत्त्यपेक्षायां तद्विधानेन प्रतिपत्तिरूपसंस्कारस्य प्रयोजनवत्त्वात् ''तथा युक्तम्'' इति सूत्रोक्तद्वितीयातः ''कर्तुरीप्सिततमं कर्म'' इत्युक्तकर्मकारके प्राप्तद्वितीयाया मुख्यत्वात् , तया च प्राधान्यावगमात्प्रतिपत्तिकर्मैवेदं प्रासनम्। चात्वाल इति देशविशेषनियमान्नियमादृष्टं कल्प्यत इति। तदाह **सूत्रे, उत्पत्तौ** यत् यदर्थतया श्रुतं **तत् तदर्थम्**। कुतः ? **श्रुतिसंयोगात्। तस्यान्यार्थतयोत्पन्नस्य अर्थान्तरगमने** अर्थान्तरेण सम्बन्धे अर्थान्तरस्य **शेषत्वात्** शेषकार्यत्वात् **प्रतिपत्तिः स्यादिति**।

फलन्तु, न प्रयोजकं प्रासनं कृष्णविषाणस्येति तदपचारे सति न पुनस्तत्सम्पादनम्।

इति सप्तमं प्रासनस्य प्रतिपत्तिकर्मताधिकरणम्।

अथाष्टममवभृथगमनस्य प्रतिपत्तिकर्मताधिकरणम् (सूत्राणि २०-२२)

सौमिके च कृतार्थत्वात्॥ २० ॥

(अर्थकर्म वाऽभिधानसंयोगात्॥ २१॥ प्रतिपत्तिर्वा तन्न्यायत्त्वाद्देशार्थाऽवभृथश्रुतिः॥ २२॥)

पूर्ववैषम्येणात्र शङ्कनात्सङ्गतिः। ज्योतिष्टोमे ''वारुणेनैककपालेनावभृथं यन्ति'' इत्यवभृथेष्टिं वरुणदेवताकैककपालपुरोडाशद्रव्यकां विधाय पुनः श्रूयते ''चतुर्गृहीतं वा एतद्यज्ञस्य यदृजीषं, यद्ग्रावाणो, यदौदुम्बरी, यदधिषवणफलके, तस्माद्यत्किञ्चित्सोमलिप्तं द्रव्यं तेनावभृथं यन्ति'' इति। निष्पादितस्य सोमस्य नीरसो भाग ऋजीषमुच्यते। तदेतदृजीषग्रावादिकं सोमाभिषवादौ सोमेन लिप्यते। तदेतत्सोमलिप्तं सर्वं द्रव्यमवभृथसाधनमुत प्रतिपत्तिरिति **सन्देहः**।

पूर्वपक्षस्तु, पूर्वत्र विषाणस्य द्वितीयाश्रुत्या प्राधान्यप्रतीत्या प्रतिपाद्यत्वेपीह सोमलेपवतामृजीषग्रावौदुबर्यधिषवणफलकानां ''यत्किञ्चित्सोमलिप्तं तेनावभृथं यन्ति'' इति तृतीयाश्रुत्या गुणत्वावगमेन न प्रतिपाद्यत्वम्। किन्तु साधनत्वमेवोपेयम्। न च सोमलिप्तपदेनैव सोमशेषतया प्रतीतस्यान्यत्र गुणभावायोगात् तदधिष्ठानर्जीषादिद्रव्यलक्षणोपेयेति वाच्यम्। ''सोमलिप्तमवभृथदेशं यन्ति'' इति वचनव्यक्तिमुपेत्य प्रतिपत्तिविध्यङ्गीकारे तेनेति तृतीयाया द्वितीयार्थे, अवभृथशब्दस्य तत्समीपदेशे, यन्तीत्यस्य प्रापयन्तीति णिजर्थे लक्षणा स्यात्। अतो भूयोनुग्रहाय मुख्येऽपि सोमलिप्तपदे तदाधारद्रव्यलक्षणामाश्रित्यावभृथे हविष्ट्वेन युक्त इति।

सिद्धान्तस्तु, '' वरुणेनैककपालेन '' इत्युत्पत्तिशिष्टपुरोडाशहविषाऽवरुद्धेऽवभृथे सोमलिप्तद्रव्यस्य हविष्ट्वेन सम्बन्धायोगादगत्याऽवभृथशब्दादेर्देशादिलक्षणया ''अवभृथदेशं गच्छन्तः सोमलिप्तान्यादाय गच्छेयुः। तानि च तद्देशे प्रक्षेप्तव्यानि'' इति। तत्प्रक्षेपश्च प्रतिपत्तिकर्म। पूर्वमुपयुक्तत्वादिति। तदाह **सूत्रे, सौमिके** सोमसम्बन्धिन्यवभृथे सोमलिप्तानां प्रतिपत्तिः स्यात्। कुतः ? तेषां **कृतार्थत्वेन** प्रतिपत्त्यपेक्षित्वादिति।

फलन्तु, तदपचारे सत्यवभृथस्य तदप्रयोजकत्वान्न पुनस्तदर्थं सोमलिप्तसम्पादनमिति।

इत्यष्टममवभृथगमनस्य प्रतिपत्तिकर्मताधिकरणम् (सूत्राणि २०-२२)

अथ नवमं कर्तृदेशकालविधीनां नियमार्थताधिकरणम् (सूत्राणि २३-२४)

कर्तृदेशकालानामचोदनं , प्रयोगे नित्यसमवायात् ॥ २३ ॥

नियमार्था वा श्रुतिः ॥ २४ ॥

पूर्वाक्षेपेणात्र शङ्कनात्सङ्गतिः। ''पशुबन्धस्य यज्ञक्रतोः षड्ऋत्विजः'' ''दर्शपूर्णमासयोर्यज्ञक्रत्वोश्चत्वारो ऋत्विजः'' ''चातुर्मास्यानां यज्ञक्रतूनां पञ्चर्त्विजः'' ''अग्निहोत्रस्य यज्ञक्रतोरेक ऋत्विक्'' '' सौम्यस्याध्वरस्य यज्ञक्रतोः सप्तदशर्त्विजः'' इति कर्तारः श्रुताः। तथा ''समे दर्शपूर्णमसाभ्यां यजेत'' इति देशः, ''पौर्णमास्यां पौर्णमास्यां

पौर्णमास्या यजेत इति कालः, ''व्रीहिभिर्यजेत'' ''सोमेन यजेत'' इति द्रव्यञ्च श्रुतम् । यज्ञक्रतोरित्यत्र क्रतोरित्येव वक्तव्ये यज्ञेति विशेषणोक्तिः क्रतुपदस्य ''स क्रतुं कुर्वीत । मनोमयः प्राणशरीरोत्पादरूपः'' इति छन्दोगोपनिषदि मानसोपासनेपि प्रयोगात् तद्व्यावृत्त्यर्थेत्याहुः । तत्र **सन्देहः** , कर्तृदेशकालद्रव्याणि किं विधीयन्तेऽथानूद्यन्त इति ।

पूर्वपक्षस्तु, कर्तृदेशकालादिना कारकेण विना कर्मप्रयोगायोगात्तदन्यथानुपपत्त्यैव अर्थाद्देशादेः प्राप्तत्वान्न विधीयन्ते । किन्त्वनूद्यन्त एव । न चापूर्वविध्ययोगेऽपि समदेशादेरिव विषमदेशादेरपि प्राप्त्या तन्निवृत्तये नियमपरिसङ्ख्याविध्योरन्यतरविधिः स्यादिति वाच्यम् । सम एव, पौर्णमास्यामेव इत्येवकाराश्रवणात्, परिसङ्ख्यातोऽन्यस्य नियमविधेरभावाच्च । ''समे यजेत'' इत्यस्य ''विषमे न यजेत'' इति परिसङ्ख्यायां स्वार्थत्यागान्यार्थकल्पना-कर्मविधिप्राप्तबाधरूपदोषत्रयप्राप्तेः । तस्मादनुवादः । एवञ्च देशादेर्विध्यभावात्सोमलिप्ताना-मवमृथदेशे नयनं न विधातुं शक्यमिति पूर्वोक्ताऽक्षेपः ।

तथा च **सूत्रम्, कर्तृदेशकालानामचोदनमनुवादः । तेषां प्रयोगे** क्रियाविध्याक्षेपादेव **नित्यसमवेतत्वादिति** । कर्त्राद्युक्तिर्द्रव्यस्याप्युपलक्षणमिति ।

सिद्धान्तस्तु, अर्थापत्त्या समादीनामनियमेन प्राप्तवपि नियमेनाप्राप्तेर्यत्र प्रयोगे समादेरप्राप्तिस्तत्र समादेः प्रापकतयाऽप्राप्तांशपरिपूरणफलकनियमविधेरितरपरिवर्जनफलक-परिसङ्ख्यातो भेदसम्भवेन त्रिदोषदुष्टपरिसङ्ख्यातः आर्थिकेतरनिवृत्तिफलकनियमविधेर्ज्यायसः सम्भवे पाक्षिकानुवादत्वायोगात्, एवकाराश्रवणेऽपि प्राप्तस्य पुनःश्रवणबलादेव नियमसिद्धेर्नियमविधिरेवायम् '' सम एव, पौर्णमास्यामेव, व्रीहिभिरेव, सोमेनैव '' इति ।

फलन्तु, पूर्वपक्षे पाक्षिकानुवादत्वात्समादीनां विकल्पः । **सिद्धान्ते तु,** विधिना तेषामेवाङ्गत्वावगमात्तल्लोपे क्रियाया वैगुण्यप्रसङ्गात्तेषां नियम इति ।

इति नवमं कर्तृदेशकालविधीनां नियमार्थताधिकरणम् (सूत्रे २३-२४)

अथ दशमं द्रव्यगुणविधानस्य नियमार्थताधिकरणम्

तथा द्रव्ये गुणश्रुतिरुत्पत्तिसंयोगात् ॥ २५ ॥

अधिकाशङ्कायां पूर्वन्यायातिदेशादातिदेशिकी **सङ्गतिः**। ''वायव्यं श्वेतमालभेत भूतिकामः'' इति श्रूयते। तथा '' सोमारौद्रं घृते चरुं निर्वपेच्छुक्लानां व्रीहीणां ब्रह्मवर्चसकामः'' इत्यादि च। **तत्र सन्देहः** श्वेत्यशौक्ल्यादिगुणस्य द्रव्योपादानानुषङ्गप्राप्तस्यानुवादः, उत पूर्वत्रेव नियमविधिरिति।

पूर्वत्र देशादीनाममूर्तत्वेऽपि कारकतया क्रियाङ्गत्वयोगात्तादर्थ्येन विधानं क्रियया प्रयुक्तत्वञ्च युक्तम्। श्वेत्यादिगुणस्य क्रियाङ्गत्वेन प्रतीतस्याप्यमूर्तत्वेन क्रियासाधनभावासम्भवान्न तादर्थ्येन विधानं युक्तम्। शुक्लगुणस्य तु चरुविशेषणव्रीहिविशेषणतया न शब्दतोऽपि क्रियासम्बन्ध इति द्रव्योपादानानुषङ्गप्राप्तानुवाद इति **विशेषाशङ्कायां** पूर्वत्रेव पाक्षिकानुवादत्वापेक्षया श्वेतेतरादिव्यावृत्तये श्वेतमेव शुक्लानामेवेति नियमविधेर्ज्यायस्त्वान्नियमविधिरिति। अमूर्तस्य साक्षात्क्रियासाधनत्वायोगेऽपि द्रव्यद्वारा तत्सम्भवात्तादर्थ्येन नियमविधिरिति।

तथा च **सूत्रं**, द्रव्यं व्रीह्यादौ शुक्लादिगुणश्रुतिरपि **तथा** नियमार्था। न च गुणस्यामूर्तस्य कथं क्रियार्थतेति वाच्यम्। **उत्पत्तिसंयोगात्** उत्पद्यते कर्मानेनेत्युत्पत्ति द्रव्यम्। तत्संयोगात् द्रव्यपरिच्छेदद्वारा क्रियार्थत्वसम्भवादिति।

फलन्तु श्वैत्यादिनियम इति व्यक्तम्।

इति दशमं द्रव्यगुणविधानस्य नियमार्थताधिकरणम्

अथैकादशमवघातादिसंस्कारविधानस्य नियमार्थताधिकरणम्

संस्कारे च तत्प्रधानत्वात् ॥ २६ ॥

अत्राप्यातिदेशिकी **सङ्गतिः**। दर्शपूर्णमासयोः '' व्रीहीनवहन्ति'' ''तण्डुलान् पिनष्टि'' इति श्रूयते। तत्रावघातपेषणे किं पूर्वत्रेवाऽग्नेयादियागे नियमविधाने, किं वानूद्येते इति **सन्देहे**,

देशादिवत् श्वेतगुणवच्चावघाताधिसंस्कारस्य प्रधानाऽग्नेयादिकर्मसम्बन्धानवगमात् ''शुक्लानां व्रीहीणां चरुम्'' इतिवच्चावघातादिविशिष्टद्रव्यस्य प्रधानक्रियाङ्गतया वा श्रवणाभावात् ''व्रीहिभिर्यजेत'' इति द्रव्यमात्रस्यैव प्रधानाङ्गताश्रुतेर्न तादर्थ्येन नियमस्तयोर्विधातुं शक्यते। व्रीहिमात्राङ्गतयैव श्रवणात्। तस्मात् तण्डुलाद्याक्षिप्तपाक्षिकक्रियानुवादोऽवघातादिरिति **विशेषाशङ्कायां,**

साक्षात्क्रियासम्बन्धाश्रवणेऽपि व्रीहिस्वरूपेऽवहननविधेरानर्थक्यात्प्रकरणसनाथया आख्यातश्रुत्याऽपूर्वसाधनविशेषे व्रीहिशब्दलक्षिते विनियुक्तस्यावहननादेरपूर्वार्थतया तण्डुलनिष्पत्त्यर्थं लोकतः प्राप्तपाक्षिकनखविदलनादिव्यावृत्त्यर्थं नियमविधिरेवायमपीति **सिद्धान्तः।** तदाह सूत्रे, **संस्कारेऽवघातादौ श्रुतिर्नियमार्थैव। तत्प्रधानत्वात्** अपूर्वसाधनार्थत्वादिति।

फलन्तु, पूर्वपक्षे, प्रधानकर्माप्रयुक्तत्वमवघातादेः। **सिद्धान्ते तु,** तत्प्रयुक्तत्वमिति।

इत्येकादशमवघातादिसंस्कारविधानस्य नियमार्थताधिकरणम्

अथ द्वादशं यागहोमस्वरूपनिरूपणाधिकरणम् (सूत्रे २७-२८)

भाष्यकारीयं वर्णकम्

यजतिचोदना द्रव्यदेवताक्रियं समुदाये कृतार्थत्वात्॥ २७॥ इति

तदुक्ते श्रवणाज्जुहोतिरासेचनाधिकः स्यात्॥ २८॥

इति च सूत्रद्वयम्। तत्रैव **तन्त्ररत्नोक्तेः।** यागाङ्गभूतानां देशादीनां नियमविधौ स्थिते सतीह प्रसङ्गाद्यागादिलक्षणमुच्यत इति **भाष्यकारो** मन्यते।

तथा हि, ''सोमेन यजेत'' इति, ''अग्निहोत्रं जुहोति'' इति, ''हिरण्यमात्रेयाय

ददाति'' इति च श्रूयते। तत्र **यजतिचोदना** यजतिशब्दः **द्रव्यदेवताक्रियम्**। द्वन्द्वैकवद्भावः। द्रव्यं देवतां क्रियाश्चाभिधत्ते। **समुदाये** त्रितयसमुदाये यजतिशब्दस्य **कृतार्थत्वात्** लोके प्रयुज्यमानत्वात्। **जुहोतिर्होम आसेचनाधिकः** प्रक्षेपाधिकः स एव याग एव स्यात्। कुतः ? **तदुक्ते** ''सोमेन यजेत'' इति विहिते कर्मणि ''यद्ग्रहान् जुहोति'' इति **होमश्रवणादिति**। ''अग्नये इदं न मम'' इत्यादिरूपेण देवतोद्देशेन द्रव्यत्यागो **यागः**। विहिते आहवनीयाद्याधार-विशेषे त्यक्तद्रव्यस्य प्रक्षेपो **होम** इति **निष्कृष्टार्थः**। एतच्च सौत्रयागहोमलक्षणं स्वकीयद्रव्यस्य स्वत्वनिवृत्तिपूर्वं परकीयत्वसम्पादनं **दानमिति** दानलक्षणस्याप्युपलक्षणमिति।

फलन्तु, लक्ष्यावधारणम्। तदाह **भाष्यकारः**, **लक्षणकर्मणि प्रयोजनं न वक्तव्यम्। ज्ञानमेवात्र प्रयोजनमिति।**

वार्तिककारीयं वर्णकम्।

वार्तिककारस्तु, लोके येष्वर्थेषु प्रसिद्धानि पदानि इत्यादिना **भाष्य** एव लोक-प्रसिद्धपदार्थव्यवहारिण्यां मीमांसायां सूत्रकारपरिभाषाया निरासात्, याज्ञिकव्यवहारेण यज्यादिशब्दस्य यागादिषु व्युत्पत्तिसम्भवेन गवादिशब्दानामिवैषामपि लोकसिद्धपदार्थकत्वात् तल्लक्षणोक्तिपरतया व्याख्याऽनुचितेति **भाष्यं** दूषयित्वा यागाद्यनुष्ठानप्रकारकथनपरतया सूत्रद्वयं व्याचख्यौ।

तथा हि, पूर्वत्र यागाऽनुवादेन देशादयो नियम्यन्त इत्युक्तौ को यागाद्यनुष्ठानप्रकार इति जिज्ञासायामिदं सूत्रद्वयम्। **तदर्थः**, **यजतिचोदना**, ''यजेत'' इत्यादियागविधायकं वाक्यं **द्रव्यदेवताक्रियं** देवतोद्देश्यकद्रव्यत्यागात्मिकां क्रियामनुष्ठापयति। यो देवतोद्देशेन द्रव्यं त्यजति तेन यागश्चोदनार्थोऽनुष्ठितो भवतीति यावत्। **समुदाय** एव देवतोद्देश्यकद्रव्यविशिष्टत्यागे सत्येव यजतिचोदनायाः **कृतार्थत्वात्** पर्याप्तत्वादिति **प्रथमसूत्रार्थः**।

अन्यस्य तु, आसेचनाधिकः प्रक्षेपाधिको यागप्रयोगः एव **जुहोतिर्होमप्रयोगः** स्यात्। प्रक्षेपं कुर्वता होमविध्यर्थोऽनुष्ठितो भवतीति यावत्। **कुतः ? तदुक्ते** ''दर्शपूर्णमासाभ्यां

यजेत'' इति यजत्युक्तेऽर्थे यागे ''चतुरवत्तं जुहोति'' इति होमपदश्रवणादिति । अस्मिन् पक्षे अनुष्ठापयतीति पदाध्याहार **आद्यसूत्रे । द्वितीये** तु जुहोतिशब्दो होमप्रयोगपरो व्याख्येय **इत्यरुच्याऽन्योप्यर्थ** उक्तः ।

तृतीयं वर्णकम्

पूर्वत्र यागाद्यनुवादेन देशादयो नियम्यन्त इत्युक्तमयुक्तम् । आग्नेयाद्युत्पत्तिवाक्येषु यजेरश्रवणादिति शङ्कायामिदमुच्यते । द्रव्यदेवताक्रियं श्रूयमाणं यजतिचोदनेति ज्ञातव्यम् । यागाविनाभूतत्वाद्द्रव्यदेवतासम्बन्धस्येत्याद्यस्यार्थः ।

अन्यस्य तु, **तदुक्ते** यजत्युक्ते कर्मणि पुनर्जुहोति**श्रवणाद्** यागहोमयोश्चाभेदात्पुनः स कथम् ? इति शङ्कायां **आसेचनाधिकः** प्रक्षेपमात्रे चतुरवत्तवाक्ये विधीयत इति ॥ १२ ॥

इति द्वादशं यागहोमस्वरूपनिरूपणाधिकरमम् (सूत्रे २७-२८)

अथ त्रयोदशं बर्हिष आतिथ्यादिसाधारण्याधिकरणम् (सूत्रे २९-३०)

विधेः कर्मापवर्गित्वादर्थान्तरे विधिप्रदेशः स्यात् ॥ २९ ॥

(अपि वोत्पत्तिसंयोगादर्थसम्बन्धोऽविशिष्टानां प्रयोगैकत्वहेतुः स्यात् ॥ ३० ॥)

पूर्वत्र प्रधानचोदनार्थानुष्ठानप्रकारोक्ताविह तदङ्गबर्हिरनुष्ठानप्रकारकथनात्सङ्गतिः । ज्योतिष्टोमे श्रूयते ''यदातिथ्यायां बर्हिस्तदुपसदां तदग्नीषोमीयस्य'' इति । क्रीतं सोमं शकटेऽवस्थाप्य प्राचीनवंशं प्रत्यानयनेऽभिमुखो यामिष्टिं निर्वपति **सेयमातिथ्या** । तदूर्ध्वं **त्रिषु दिनेषु** क्रियमाणा **उपसदः** । औपवस्थ्येऽह्न्यनुष्ठेयोऽ**ग्नीषोमीयः** । तत्राऽतिथ्येष्टौ विहितं बर्हिः किमातिथ्येष्टित आच्छिद्य तत्रोपयोगमकृत्वैवोपसदादौ विधीयते, किं वाऽन्यत्रोपयुक्तशब्दितस्य **निरिष्टिकस्य** बर्हिषोऽन्यत्र विधानमुत धर्मातिदेशोऽथ वा साधारण्यविधिरिति चतुर्धा **सन्देहः** ।

पूर्वपक्षस्तु, ''चैत्रगौर्मैत्राय दीयताम्'' इत्यादाविवाऽत्राप्याच्छिद्य दानं प्रतीयत इत्याद्यः। तथात्वे आतिथ्यायां बर्हिर्विधानस्याऽऽनर्थक्यापत्तेर्निरिष्टिकस्योपदेश इति **द्वितीयः**। एकत्रोपयुक्तनिर्माल्यरूपस्यान्यत्राऽप्युपयोगे शिष्टाचारविरोधाद्धर्मातिदेशः, ''आतिथ्याबर्हिषो ये धर्माः अश्ववालत्वादयस्ते धर्मा उपसदादिबर्हिषि'' इति **तृतीयः**।

सिद्धान्तस्तु, धर्मातिदेशपक्षे ''यदातिथ्यायां बर्हिः'' इति बर्हिश्शब्दस्य बर्हिर्धर्मा इत्यर्थत्वे लक्षणा स्यात्। तस्मात् साधारण्यविधिः। ''आतिथ्यार्थं यद्बर्हिरुपादीयते तन्न केवलमातिथ्यार्थम्। किन्तूपसदग्नीषोमीयार्थञ्चोपादेयम्'' इति विधिवाक्यस्यार्थः। तस्मादातिथ्योपसदाग्नेयास्त्रयोप्यस्य बर्हिषः प्रयोजका इति ''यदातिथ्यायां बर्हिः'' इति न आच्छिद्य दानम्। विधेर्बर्हिर्विधेरातिथ्याकर्मण्यपवर्गित्वात् समाप्यत्वात् अतोऽर्थान्तरे उपसदादावातिथ्योपयुक्तस्यैव **विधिप्रदेशो** विनियोगः **स्यादिति पूर्वपक्षसूत्रार्थः**।

फलन्तु, त्रितयार्थं बर्हिरादानं व्यक्तम्।

इति त्रयोदशं बर्हिष आतिथ्यादिसाधारण्याधिकरणम् (सूत्रे १९-३०)

इति श्री भाट्टसंग्रहे सर्वतन्त्रस्वतन्त्रश्रीसुधीन्द्रतीर्थगुरुपादशिष्य श्रीराघवेन्द्रतीर्थयतिसार्वभौमकृते चतुर्थाध्यायस्य द्वितीयः पादः

अस्मिन् पादे	अधिकरणानि	१३	सूत्राणि	३०
आदितः	अधिकरणानि	२७६	सूत्राणि	७३५

अथ चतुर्थाध्यायस्य तृतीयः पादः

अथ प्रथमं द्रव्यसंस्कारकर्मणां क्रत्वर्थताधिकरणम् (सूत्राणि १-३)

पूर्वत्र पुरुषार्थाङ्गानां प्रयुक्तिश्चिन्तिता। अत्र तु पुरुषार्थयोः क्रतुफलयोः प्रयुक्तिश्चिन्त्यत इति पूर्वानन्तर्यं ततो भेदश्चास्य पादस्येति ज्ञेयम्। यद्यपि प्रधानप्रयुक्तिचिन्तानन्तरमङ्गप्रयुक्तिचिन्ता कार्या तथापि **यस्मिन् प्रीतिः पुरुषस्य, तस्य लिप्साऽर्थलक्षणाविभक्तत्वात्** इत्याद्यपादीयलिप्सासूत्रे गोदोहनादिप्रयोजकता प्रधानविषयिण्येव प्रस्तुता । सा चाऽवान्तरसङ्गतिलोभाद्विच्छिन्ना पुनरिह प्रस्तूयत इत्यदोषः।

द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः स्यात् ॥ १ ॥

(उत्पत्तेश्चातत्प्रधानत्वात् ॥ २ ॥ फलन्तु तत्प्रधानायम् ॥ ३ ॥)

''यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं श्रुणोति'' इत्यनारभ्य श्रूयते । तथा ज्योतिष्टोमे ॥ यदांक्ते चक्षुरेव भ्रातृव्यस्य वृंक्ते'' इति, तथा ''यत्प्रयाजानूयाजा इज्यन्ते, वर्म वा एतद्यज्ञाय क्रियते, वर्म यजमानाय, भ्रातृव्याभिभूत्या'' इति च । तत्र जुह्वाः पर्णमयत्वं, यश्चाञ्जनरूप-चक्षुःसंस्कारः, यच्च प्रयाजानुयाजरूपं वर्म तत्त्रितयं किं पुरुषार्थत्वेन विधीयते, अथ क्रत्वर्थत्वेन, उतोभयार्थत्वेनेति **सन्देहः** ।

पूर्वपक्षस्तु, पापश्लोकश्रवणराहित्यादिफलश्रवणात् पुरुषार्थतया विधियते । ''यस्य पथ्यमशनं भवति, स कल्पो भवति'' इति लोके वर्तमानापेदशस्यापि फलप्रतिपादकत्व-दर्शनादित्येकः ।

फलसंयोगात्फलार्थत्वेऽपि क्रत्वविनाभूततया क्रत्वर्था या जुहूस्तदुद्देशेन विधीयमानस्य पर्णमयत्वस्य क्रत्वर्थतापि स्यादिति दध्यादिवदुभयार्थं पर्णमयत्वविधानम्। तथा संस्कारकर्मणोरपि ज्योतिष्टोमादिप्रकरणेन क्रत्वर्थतापि प्राप्तेत्युभयस्याप्युभयार्थं विधानमित्यन्यः ।

सिद्धान्तस्तु, युक्तं दध्न उभयार्थत्वम् । ''दध्ना जुहोति'' इति , ''दध्नेन्द्रियकामस्य जुहुयात्'' इति क्रतुसंयोगस्य फलसंयोगस्य पृथग्वाक्यद्वयोक्तत्वेन संयोगपृथक्त्वन्यायात् । इह त्वेकं वाक्यम् । तस्य क्रतुसम्बन्धफलसम्बन्धरूपोभयपरत्वे वाक्यभेदः स्यात् । न च क्रत्वर्थाप्रणयनाश्रितगोदोहनं यथा फलाय विधीयते तथा क्रत्वर्थजुह्वाद्याश्रितपर्णतादिकं फलाय विधीयतामिति वाच्यम् । तत्र पशुकामस्येति कामपदश्रवणेन पशोः फलत्वप्रतीत्या गोदोहनस्य फलार्थत्वेपीह ''न श्रुणोति'' । ''वृंक्ते'' ''वर्म क्रियते'' इति वर्तमाननिर्देशेन साध्यत्वाप्रतीत्या पापश्लोकश्रवणराहित्यादेः फलत्वाप्रतीतेः । एवमुक्तदिशा क्रत्वर्थानां पर्णतादीनां क्रतुनिष्पादनद्वारा क्रतुफलेनैव फलवत्त्वेन फलाकांक्षाविरहाद्रात्रिसत्रन्यायेन ''यः अपापश्लोकश्रवणादिकामः स पर्णतादिकं कुर्यात्'' इति विपरिणामेनार्थवादस्य फलपरताकल्पनमप्ययुक्तमित्यर्थवाद एव सर्वोपीति ।

तदाह सूत्रे, **द्रव्यसंस्कारकर्मसु** जुहूप्रकृतिभूतपर्णरूपद्रव्याञ्जनरूपसंस्कारप्रयाजानुयाजरूपकर्मसु **फलश्रुतिरर्थवादः** । कुतः ? **परार्थत्वात्** क्रत्वर्थत्वात् । क्रत्वर्थतया क्रतुफलेनैव फलवत्त्वेन फलाकांक्षाविधुरत्वादिति ।

फलन्तु, न फलार्थं पर्णतादिविधानमिति क्रत्वर्थतयैव तदनुष्ठानमिति ।

इति प्रथमं द्रव्यसंस्कारकर्मणां क्रत्वर्थताधिकरणम् (सूत्राणि १-३)

अथ द्वितीयं नैमित्तिकानामनित्यार्थत्वाधिकरणम्

नैमित्तिके विकारत्वात् क्रतुसाधनमन्यत्स्यात् ॥ ४ ॥

पूर्ववैषम्येणात्र शङ्कनात्सङ्गतिः । दर्शपूर्णमासयोः ''अपः प्रणयति'' इति प्रकृत्य ''मृण्मयेन प्रतिष्ठाकामस्य प्रणयेत्'' इति श्रूयते । तथा ज्योतिष्टोमे ''बार्हद्गिरं ब्राह्मणस्य ब्रह्मसाम कुर्यात्'' इति च । बार्हद्गिराख्यं साम ब्रह्मसामाख्यस्तोत्रसाधनं कुर्यादित्यर्थः । यदेतत्काम्यं मृण्मयं यच्च नैमित्तिकं बार्हद्गिरं तदेव नित्यक्रत्वर्थमुत तदर्थमन्यदुपादेयमिति **सन्देहः** ।

पूर्वपक्षस्तु, युक्तं पूर्वत्रापापश्लोकश्रवणादेः साध्यत्वाप्रतीत्या साधनाकांक्षाविरहात् सन्निहितेनापि पर्णतादिनान्वयो नेति । ''अपः प्रणयति'' इति सामान्येनोक्ताप्रणयनादेस्तु साधनाकांक्षस्य सन्निहतेन मृण्मयादिनाऽन्वयेन नैराकांक्ष्यसम्भवे सत्यश्रुतपात्रान्तरकल्पना-योगात्तदेव नित्यार्थमपीति ।

सिद्धान्तस्तु, प्रणयनादेः साधनाकांक्षासत्त्वेऽपि प्रतिष्ठाकाम इति प्रतिष्ठारूपफल-सम्बन्धितया श्रुतस्य मृण्मयस्य , ब्राह्मणनिमित्तकत्वेन श्रुतस्य बार्हद्गिरस्य प्रणयनादौ साधनतयान्वयायोगेन ''वारणो यज्ञावचरः'' ''अभिवर्तो ब्रह्मसाम'' इति वचनोक्तवारणपात्रान्वयेन अभिवर्ताख्यसामान्वयेन च साधनाकांक्षाशान्तिसम्भवान्नित्यप्रणयनाद्यर्थं पात्रान्तरं सम्पाद्यमिति । तदाह **सूत्रे**, नैमित्तिक इत्युपलक्षणम् । नैमित्तिके काम्ये च श्रूयमाणे हि **क्रतुसाधनम**न्यदेव स्यात् । कुतः ? **विकारत्वात्** । विशेषनिमित्तादौ श्रुतत्वादिति ।

फलन्तु, **पूर्वपक्षे**, क्रत्वर्थमपि मृण्मयादेरुपादानम् । **सिद्धान्ते** तु फलार्थमेवेति । अत्र सत्यपि ''वारणो यज्ञावचरः'' ''चमसेनापः प्रणयेत्'' इति ''अभिवर्तो बह्म साम'' इति वचने, तदज्ञानेनात्र पूर्वपक्षः इत्याहुः ।

इति द्वितीयं नैमित्तिकानामनित्यार्थत्वाधिकरणम्

अथ तृतीयं संयोगपृथक्त्वन्याये दध्यादेर्नित्यर्निमित्तिकोभयार्थताधिकरणम् (सूत्राणि ५-७)

एकस्य तूभयत्वे संयोगपृथक्त्वम् ॥ ५ ॥

(शेष इति चेत् ॥ ६ ॥ नार्थपृथक्त्वात् ॥ ७ ॥)

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः । अग्निहोत्रे ''दध्नेन्द्रियकामस्य जुहुयात्'' इति श्रूयते । तत्किं काम्यार्थं दधि नित्येऽपि स्यादुत क्रत्वर्थमन्यदेव सम्पाद्यमिति **सन्देहे**, पूर्वन्यायेन काम्यदध्नः क्रत्वर्थत्वायोगात्तदर्थमन्यदेव दधि सम्पाद्यमिति **प्राप्ते**,

सिद्धान्तः, ''दध्ना जुहोति'' इति कामसंयोगरहितवाक्यान्तरस्याप्यग्निहोत्रप्रकरणे श्रवणेनैकस्यापि दध्नो वाक्यद्वयेन नित्यत्वं काम्यत्वञ्चाविरुद्धमिति पूर्ववैषम्यादुभयार्थं दधीति। एवं ''खादिरे बध्नाति'' ''खादिरं वीर्यकामस्य यूपं कुर्वीत'' इत्याद्यपि ध्येयम्।

तदाह **सूत्रे**, **एकस्य** दध्यादे**रुभयार्थत्वे** नित्यत्वे काम्यत्वे च **संयोगपृथक्त्वं** संयोगयोः क्रतुसंयोगफलसंयोगयोः पृथक्त्वं भिन्नवाक्योक्तत्वञ्च कारणं भवति। तच्चेहास्ति। ''दध्ना जुहोति'' ''दध्नेन्द्रियकामस्य'' इति वाक्यद्वयश्रवणादिति।

फलन्तु, **पूर्वपक्षे** फलार्थतयैवोपादानम् । **सिद्धान्ते तु** क्रत्वर्थतयापीति ।

इति तृतीयं संयोगपृथक्त्वन्याये दध्यादेर्नित्यनैमित्तिकोभयार्थताधिकरणम् (सूत्राणि ५-७)

अथ चतुर्थं पयोव्रतादीनां क्रतुधर्मताधिकरणम् (सूत्रे ८-९)

द्रव्याणां तु क्रियार्थानां संस्कारः क्रतुधर्मः स्यात् ॥ ८ ॥

(पृथक्त्वाद्व्यवतिष्ठेत ॥ ९ ॥)

पूर्ववैषम्येण शङ्कनात्**सङ्गतिः** । ज्योतिष्टोमे दीक्षितस्यान्नभोजनाभावात् व्रतमाम्नायते ''पयोव्रतं ब्राह्मणस्य, यवागू राजन्यस्य, आमिक्षा वैश्यस्य'' इति । तत्किं पुरुषार्थं क्रत्वर्थं वेति **सन्देहः** ।

पूर्वपक्षस्तु, युक्तं पूर्वत्र दध्यादेः संयोगस्य पृथक्त्वादुभयार्थत्वम् । पयोव्रतादेस्तु ब्राह्मणादिसंयुक्तस्य षष्ठीश्रुत्या तादर्थ्यावगमात्प्रकरणबाधेन पुरुषार्थत्वमेव। न क्रत्वर्थत्वम्। न च अहीनवत्पुरुषधर्मस्तदर्थत्वादिति पूर्वाध्यायचतुर्थपादीयाधिकरणोक्तदिशा ''जञ्भ्यमानो ब्रूयान्मयि दक्षक्रतू'' इति जञ्भ्यमानमन्त्रस्य पुरुषसंयोगेऽपि प्रकरणाबाधेन क्रतुयुक्तपुरुष-संस्कारतया क्रत्वर्थत्ववद्व्रतस्यापि क्रत्वर्थता स्यादिति शंक्यम्। वैषम्यात्। तत्र फलकल्पना-प्रसङ्गभिया क्रत्वर्थत्वोक्तावपीह पुरुषप्रीत्यर्थतया लब्धफलत्वेन फलकल्पनादोषाभावादिति।

सिद्धान्तस्तु, व्रतस्य पुरुषप्रीत्यर्थतया फलवत्त्वेन फलान्तराकल्पनेऽपि पयःप्रभृतिद्रव्य-नियमं विनापि येन केनचित् व्रतकरणेऽपि प्रीतिसम्भवेन पयआदिनैव ब्राह्मणादिना व्रतं कार्यमिति नियमस्यावश्यं किञ्चित्फलं कल्प्यम् । तच्च लाघवात्क्रतुफलमेव कल्प्यमिति क्रतावधिकृतपुरुषसंस्कारद्वरेण नियमस्य फलाश्रयणं युक्तमिति क्रत्वर्थं व्रतमिति ।

तदाह **सूत्रे**, **क्रियार्थानां** क्रत्वधिकृतानां **द्रव्याणां** पुरुषाणां पयोव्रतादिकं **संस्कारः** । अतः **क्रतुधर्मः स्यादिति** ।

फलन्तु, क्रतुप्रयुक्तपुरुषसंस्कारतया व्रतानुष्ठानम् ।

इति चतुर्थ पयोव्रतादीनां क्रतुधर्मताधिकरणम् (सूत्रे ८-९)

अथ पञ्चमं विश्वजिदादीनां सफलत्वाधिकरणम् (सूत्राणि १०-१२)

चोदनायां फलाश्रुतेः कर्ममात्रं प्रतीयेत, न ह्यशब्दं प्रतीयते ॥ १० ॥

(अपि वाऽऽम्नानसामर्थ्याच्चोदनार्थेन गम्यते, अर्थानां ह्यर्थवत्त्वेन वचनानि प्रतीयन्ते, अर्थतो ह्यसमर्थानामानन्तर्येप्यसम्बन्धः, तस्माच्छ्रुत्येकदेशः सः ॥ ११ ॥ वाक्यार्थश्च गुणार्थवत् ॥१२॥)

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः । ''विश्वजिता अतिरात्रेण सर्वपृष्ठेन सर्वस्तोमेन सर्ववेतसदक्षिणेन यजेत '' इति श्रूयते । तत्र **सन्देहः**, विश्वजिदादिचोदनासु फलमस्त्युत नेति।

पूर्वपक्षस्तु यथा हि पूर्वत्र पयोव्रतादेः फलाश्रवणादपुरुषार्थता तथेहापि विश्वजिदादेः फलाश्रवणादपुमर्थतैव । न च व्रतस्येव क्रत्वर्थता शंक्या । श्रुतिलिङ्गाद्यन्यतमस्यापि तत्कल्पकस्याभावात् । न च विश्वजिन्नामकयागेन कुर्यात्'' इत्युक्ते किमित्याकांक्षोदयात्तन्निवृत्तये स्वर्गादिरूपं किञ्चित्फलं कल्प्यमिति वाच्यम् । ''यागेन कुर्यात्'' इति वचनव्यक्तौ हि स्यादेवं फलाध्याहारः । न चैवम् । किन्तु ''यागं कुर्यात्'' इत्येव । एकपदोपात्तधात्वर्थस्यैव प्रत्ययोपात्त-भावनां प्रत्यन्वयसम्भवे तत्त्यागायोगात् । न चैवं क्लेशात्मनो यागस्यैव कर्तव्यत्वोक्तौ न कोऽपि तत्र प्रवर्तेतेति विध्यानर्थक्यात्ताद्वाक्यममानतामाप्नोतीति वाच्यम् । न्यायप्राप्तस्य केनाप्यनिवा-रणेनाप्रामाण्यस्यौचित्यादिति ।

तदुक्तं **सूत्रे, चोदनायां** विधिवाक्ये **फलाश्रुतेः कर्ममात्रमेव** भाव्यतया **प्रतीयते** । न फलम् । न च कल्प्यतां फलमिति वाच्यम् । **न ह्यशब्दं** शब्दाप्रतिपाद्यं शाब्दप्रतीतिविषय इति युक्तमिति ।

सिद्धान्तस्तु, लिङाद्यर्थभूतशब्दभावना हि चेतनप्रवर्तनात्मिका । सा चापुरुषेष्टसाधनेषु पुरुषं प्रवर्तयितुमसमर्था सती, सामान्यतः कमपि पुमर्थमाक्षिप्य, विशेषसमर्पणमन्यतो गवेषमाणा, समानपदोपात्तमपि धात्वर्थमपुमर्थतयोल्लंघ्य, तं करणतयोपादाय, दर्शादिविधिवद्वाक्यान्तरादपि पुमर्थं भाव्यमलभमाना साकांक्षैवास्त इति, पुमर्थभूतभाव्याध्याहारेणैवाऽकांक्षाशन्त्या वाक्यपूर्तिर्नान्यथेति फलपदाध्याहारो युक्त इति पुमर्थत्वाम्नानमेवंजातीयकमपीति ।

फलन्तु, पूर्वपक्षे फलाभावादननुष्ठानम् विश्वजिदादेः । **सिद्धान्ते** तु फलभावादनुष्ठानमिति ।

इति पञ्चमं विश्वजिदादीनांसफलत्वाधिकरणम् (सूत्राणि १०-१२)

अथ षष्ठं विश्वजिदादीनामेकफलताधिकरणम् (सूत्रे १३-१४)

तत्सर्वार्थमनदेशात् ॥ १३ ॥

(एकं वा चोदनैकत्वात् ॥ १४ ॥)

पूर्वत्र विश्वजिदादेरध्याहृतफलार्थत्वे स्थितेऽत्र तद्विशेषचिन्तनात्सङ्गतिः । विश्वजिदादिकं किं सर्वफलार्थमुतैकैकफलार्थमिति **सन्देहे,**

एतदेवास्य फलमिति विशेषहेतोरभावात् पशुपुत्रवीर्येन्द्रियादिकं सर्वं फलत्वेन कल्प्यमिति सर्वार्थं विश्वजिदादीति **प्राप्तम्** । तदाह **सूत्रे, तत्** विश्वजिदादि **सर्वार्थम्** । फलविशेषस्यानादेशादनुपदेशादिति ।

सिद्धान्तस्तु, आकांक्षा हि फलकल्पने प्रमाणम्। सा चैकेनैव फलेन शान्तेति नानेककल्पने प्रमाणमित्येकफलार्थं विश्वजिदादीति।

फलन्तु, एकस्यैव फलस्याध्याहारः।

इति षष्ठं विश्वजिदादीनामेकफलताधिकरणम् (सूत्रे १३-१४)

अथ सप्तमं विश्वजिदादीनां स्वर्गफलताधिकरणम् (सूत्रे १५-१६)

स स्वर्गस्स्यात्सर्वान् प्रत्यविशिष्टत्वात्॥ १५॥

(प्रत्ययाच्च॥ १६॥)

पूर्वत्रैकमेव फलमिति सामान्यत उक्तम्। तस्यात्र विशेषे पर्यवसानकथनात्**सङ्गतिः**। पूर्वत्रोक्तं फलमनियतं यत्किंचिदुतैवंरूपमिति नियतमिति **सन्देहे,** एतादृग्रूपं तदेकफलमिति निर्धारकाभावात् पुनः सर्वार्थत्वं वाऽनध्यवसायादप्रामाण्यं वा विश्वजिदादिविधेरिति **प्राप्ते**

सिद्धान्तः, स्वर्गो हि दुःखासंयुक्तनिरतिशयसुखरूपः सर्वाभिलषितश्च ''यन्न दुःखेन सम्भिन्नम्'' इत्यादेः। पश्वादिकश्च सुखदुःखानुषक्तं कैश्चिदेवाभिलषितम्। विश्वजिदादिविधायकशास्त्रस्य सति सम्भवे तादृशस्वर्गफलकत्वकल्पनमेव न्याय्यमिति स्वर्गरूपमेव विश्वजिदादिफलमिति स्वर्गकामपदस्यैवाध्याहार इति।

तदाह **सूत्रे, स** कल्प्यः फलविशेषः **स्वर्गः स्यात्**। सर्वपुरुषान् प्रति प्रीतिविषयत्वेन **तस्याविशिष्टत्वात्,''** इति।

फलन्तु, स्वर्गार्थं विश्वजिदाद्यनुष्ठानमिति।

इति सप्तमं विश्वजिदादीनां स्वर्गफलताधिकरणम् (सूत्रे १५-१६)

अथाष्टमं रात्रिसत्रस्याऽर्थवादिकफलकताधिकरणम् (सूत्राणि १७-१९)

क्रतौ फलार्थवादमङ्गवत्कार्ष्णाजिनिः ॥ १७ ॥

(फलमात्रेयो निर्देशादश्रुतौ ह्यनुमानं स्यात् ॥ १८ ॥ अङ्गेषु स्तुतिः परार्थत्वात् ॥ १९ ॥)

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः । सत्रकाण्डे रात्रिसत्राख्यं सत्रं प्रकृत्य श्रूयते ''प्रतितिष्ठन्ति ह वा एते , य एता रात्रीरुपयन्ति'' इति, ''ब्रह्मवर्चस्विनोऽन्नादा भवन्ति, य एता उपयन्ति'' इति च । ''द्वादशाहादूर्ध्वभाविनस्त्रयोदशचतुर्दशरात्रयः सर्वे सत्रविशेषाः । त्रयोदशसंख्याका रात्रयो यस्मिन् सत्रविशेषे सोऽयं त्रयोदशरात्र इत्येवंरूपे रात्रिसत्रे ''ज्योतिर्गौरायुः'' इत्यादिवाक्योक्तानि सौन्यानि कर्माणि रात्रिरित्यनेनोच्यन्ते । तदिदं रात्रिसत्रं स्वर्गार्थमुत प्रतिष्ठार्थमिति **सन्देहः** ।

पूर्वपक्षस्तु, ''न स पापं श्लोकं शृणोति'' इत्यत्रेव वाक्यशेषे ''प्रतितिष्ठन्ति'' इति वर्तमानापदेशेन कामपदाभावेन च साध्यत्वाप्रतीत्या फलसमर्पकत्वायोगेन अपापश्लोकश्रवणादेरिवार्थवादतया, अनिर्दिष्टफलकत्वाद्विश्वजिदादिवत्स्वर्गफलकताकल्पनया स्वर्गार्थं रात्रिसत्रमिति ।

तदाह **सूत्रे, क्रतौ** रात्रिसत्रादावर्थवादं अङ्गवत्पर्णताद्यङ्गतार्थवादवत् स्तुतिपरमेव **कार्ष्णाजिनिर्मन्यत** इति ।

सिद्धान्तस्तु, जुहूगतपर्णमयत्वस्य क्रत्वर्थतया क्रतुफलेनैव फलवत्त्वेन पृथक्फलाकांक्षावैधुर्येण वाक्यशेषस्यार्थवादमात्रत्वेऽपीह ''किमर्थं रात्रीरुपयन्ति ?'' इति फलाकांक्षायाः केनाप्यनिवृत्तेः, स्वर्गपदाध्याहरेण तदाकांक्षाशान्तावश्रुतस्वर्गरूपस्याश्रुतकर्मसम्बन्धस्य फलत्वस्य च कल्पनापेक्षया क्लृप्तविधिवाक्यैकवाक्यताके वाक्यशेषे श्रुतप्रतिष्ठास्वरूपस्य प्रत्यासन्नतया ''ये प्रतितष्ठिासन्ति त एता रात्रीरुपेयुः'' इति विपरिणामेन फलकल्पनं लघीय इत्यार्थवादिकप्रतिष्ठाफलार्थं रात्रिसत्रम् । अध्याहारेण स्वर्गफलकत्वपक्षे ''यस्मात्प्रतितिष्ठन्ति तस्मात् स्वर्गकामा उपेयुः'' इति वाक्यशेषान्वयस्य व्यधिकरणतया ''यस्मात् प्रतितिष्ठनिश्रुत तस्मात् प्रतिष्ठाकामा रात्रीरुपेयुः'' इत्यन्वयस्य स्वरसतया प्रतिष्ठाफलाध्याहारस्यैवौचित्याच्चेति।

फलन्तु प्रतिष्ठाद्यर्थमेव रात्रिसत्रानुष्ठानम्।

इत्यष्टमं रात्रिसत्रस्यार्थवादिकफलकताधिकरणम् (सूत्राणि १७-१९)

अथ नवमं काम्यानामैहिकामुष्मिकफलवत्त्वाधिकरणम् (सूत्राणि २०-२४)

काम्ये कर्मणि नित्यः स्वर्गो यथा यज्ञाङ्गे क्रत्वर्थः ॥ २० ॥

(वीते च करणे नियमात् ॥ २१ ॥ कामो वा तत्संयोगेन चोद्यते ॥ २२ ॥ अङ्गे गुणत्वात् ॥ २३ ॥ वीते च नियमस्तदर्थम् ॥ २४ ॥)

पूर्वाक्षेपेणात्र शङ्कनात्**सङ्गतिः**। ''सौर्यं निर्वपेद्ब्रह्मवर्चसकामः'' इत्यादीनि श्रुतफलान्तराणि काम्यकर्माणि किं स्वर्गश्रुतफलोभयार्थान्युत श्रुतफलार्थान्येवेति **सन्देहः**।

पूर्वपक्षस्तु, लिङाद्यर्थभूतश्चेतनप्रवर्तनात्मा विधिः सर्वपुरुषसाधारणः सर्वपुरुषान् प्रवर्तयन् पुरुषप्रवर्त्यव्यापारस्य सर्वाभिलषितेष्टसाधनत्वमेवावगमयति। स्वर्गश्च सर्वाभिलषित इति प्रागुक्तम्। तस्मात्सौर्यादेः स्वर्गार्थतैव युक्ता। ब्रह्मावर्चसादिश्रुतफलन्तु काष्ठाहरणार्थं वनं गतस्य शाकाहरणवत्स्वर्गानुषङ्गिकतया तदपि भवतीति तदर्थश्च सौर्यादीनि। एवञ्च प्रागुक्तं रात्रिसत्रे श्रुतप्रतिष्ठामात्रफलकत्वमयुक्तम्। विधेः सर्वसाधारण्यभङ्गापत्त्या स्वर्गार्थताया एव वाच्यत्वादिति।

तदुक्तं **सूत्रे, काम्येपि कर्मणि नित्यः स्वर्गः** फलत्वेनाऽश्रयणीयः। न चैकस्य श्रुतफलार्थता स्वर्गार्थता च न युक्तेति शंक्यम्। यथा **यज्ञाङ्गे** खादिरादौ **क्रत्वर्थः** पुरुषार्थश्च संयोगस्तद्वदत्रापीति।

सिद्धान्तस्तु, यदि विधिबलात्स्वर्गः फलं स्यात्तदैवं स्यात्। न चैवम्। विधिस्वारस्याद्धि समीहितसाधनत्वमात्रं व्यापारस्यावगम्यते। तच्च विशेषप्रमाणाभावे विश्वजिन्न्यायात्स्वर्गमादाय पर्यवस्यति। तत्सत्त्वे तु तेनैवाकांक्षाशान्तेर्न स्वर्गकल्पना युक्ता। विधेः सर्वसाधरण्यञ्च विशेष-प्रमाणभाव एव। तस्मिन् सति तु तत्फलकामनावत्पुरुषमात्रसाधारण इति श्रुतफलार्थतैव सौर्यादेरिति प्राचीनरात्रिसत्रमप्यार्थवादिकप्रतिष्ठाफलकमिति सिद्धम्।

फलन्तु, श्रुतफलार्थमेव सौर्याद्यनुष्ठानमिति।

इति नवमं काम्यानामैहिकामुष्मिकफलवत्त्वाधिकरणम् (सूत्राणि २०-२४)

अथ दशमं दर्शपूर्णमासादीनां सर्वकामार्थताधिकरणम् (सूत्रे २५-२६)

सार्वकाम्यमङ्गकामैः प्रकरणात् ॥ २५ ॥

(फलोपदेशो वा प्रधानशब्दसंयोगात् ॥ २६ ॥)

पूर्वन्यायेन शङ्कनात्सङ्गतिः। ''एकस्मै वा अन्या इष्टयः कामायान्हियन्ते, सर्वेभ्यो दर्शपूर्णमासौ'' इति श्रूयते। तत्र किमयमनुवाद उत स्वर्गकामार्थो दर्शादिविधिरिति **सन्देहः**।

पूर्वपक्षस्तु, यथा हि पूर्वत्र सौर्ये श्रुतफलविरोधान्न फलान्तरकल्पनं युक्तमित्युक्तम् तथेहापि ''दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत'' इति स्वर्गरूपश्रुतफलविरोधान्न ''सर्वेभ्यः'' इति वाक्योक्तफलान्तरकल्पनं युक्तम्। ''सर्वेभ्यः'' इति वाक्ये विधिप्रत्ययस्याश्रवणेन साध्यसाधनभावाप्रतीतेश्च। अतो ''गोदोहेन पशुकामस्य'' ''मृण्मयेन प्रतिष्ठाकामस्य'' इत्यादिवाक्योक्तैः स्वार्थप्रणयनसम्बन्धिगोदोहनादिसम्बन्धिपश्वादिफलैः सम्बद्धौ दर्शपूर्णमासौ ''सर्वेभ्यः कामेभ्यः'' इत्यनूद्येते दर्शादिप्रशंसार्थमिति। तदाह, **सूत्रे, सार्वकाम्यमङ्गकामैः** सम्बन्धादेवानूद्यते। न च तेषां न प्रधानसम्बन्ध इति वाच्यम्। **प्रकरणात्** प्रधानप्रकरणाम्नाताङ्ग-सम्बन्धितया परम्परासम्बन्धसम्भवादिति।

सिद्धान्तस्तु, यद्यत्र सर्वकामपदेन गुणफलान्येवोच्येरंस्तदा दर्शपूर्णमासपदस्य गोदोहनादिलक्षणा स्यात् ''सर्वेभ्यः कामेभ्यो गोदोहनादिः'' इति। ''सर्वेभ्यः'' इति तादर्थ्यस्यैव चतुर्थ्यर्थत्वेन दर्शपूर्णमासयोर्गुणकामार्थताया अन्यतोऽनवगमेन अनुवादायोगात्। न चाङ्गानां प्रधानानुग्राहकत्वात्प्रधानफलार्थता यथा तथा प्रधानस्यापि अंगानुष्ठापकतया तदनुग्राहकत्वा-त्तत्फलार्थता प्राप्तेत्यनुवादत्वं शंक्यम्। प्रधानस्याङ्गानुष्ठापकतया अङ्गोपकारकत्वेऽपि तादर्थ्याभावेन तद्द्वारा तत्फलार्थत्वाभावात्। तस्मादप्राप्ता सर्वकामार्थता

दर्शपूर्णमासयोर्विधीयते । न च विध्यश्रवणदोषः । कर्तव्यावितिपदस्य गत्यन्तराभावेनाध्याहार्यत्वादिति । नन्वेवं स्वर्गकामवाक्यं व्यर्थमिति चेत् तत्र केचित् स्वर्गेतरपशुपुत्रादिबहुकामपरं सर्वकामपदमित्याहुः।

अन्ये तु, स्वर्गकामवाक्यसर्वकामवाक्याभ्यां फलसम्बन्धित्वेनावगतमेव कर्माभ्युदय-कारीति । कल्प्यत इत्याहुः ।

अपरे तु, समिधादीनामफलानां फलवत्सन्निधावफलं तदङ्गमिति न्यायेनाङ्गत्वसिद्ध्यर्थं दर्शपूर्णमासयोः फलवत्त्वप्रदर्शनाय स्वर्गकामवाक्यमित्याहुः । एवं ज्योतिष्टोमेऽपीति ।

फलन्तु, पश्वाद्यनेकफलार्थं दर्शाद्यनुष्ठानम् ।

इति दशमं दर्शपूर्णमासादीनां सर्वकामार्थताधिकरणम् (सूत्रे २५-२६)

अथैकादशं दर्शपूर्णमासादीनां प्रतिफलं पृथगनुष्ठानाधिकरणम् (सूत्रे २७-२८)

तत्र सर्वेऽविशेषात् ॥ २७ ॥

(योगसिद्धिर्वाऽर्थस्योत्पत्त्यसंयोगत्वात् ॥ २८ ॥)

एवं सामान्यतः सर्वकामार्थत्वे स्थिते सति, अत्र तत्प्रयोगभेदेनेति विशेषचिन्तनात्सङ्गतिः । किमेकस्मिन् प्रयोगे सर्वे कामा भवन्ति उत प्रयोगभेदेनेति सन्देहे,

सकृत्प्रयोग एव सर्वकामावाप्तिरिति पूर्वः पक्षः । निमित्तसाम्यात् । यादृक्कर्मैकस्य निमित्तं तस्यैव कामान्तरं प्रत्यपि निमित्तत्वादिति । तदाह सूत्रे, तत्र दर्शपूर्णमासादिषु सर्वे कामा युगपदेव स्युः । साधनस्याविशेषादिति ।

सिद्धान्तस्तु, सर्वकामोद्देशेन हि कर्मणो विधानम् । न कर्मोद्देशेन कामविधानम् । कामानां रागप्राप्तत्वात् । तत्र कामानामेकशब्देनोद्दिश्यमानतया साहित्यप्रतीतावपि तस्योद्देश्यगतत्वेन ग्रहैकत्ववन्नास्ति विवक्षेत्येकैकस्यैव कामस्य निरपेक्षस्य साधनतया कर्म चोद्यत इति

निरपेक्षैकैककामप्रयुक्तमेव तत्साधनकर्मानुष्ठानम् । यदा यत्फलं काम्यते तदा तत्साधयत्यन्यदा त्वन्यदिति पर्यायेणैव कामानां न सकृत्प्रयोगमात्रेणेति प्रतिफलं पृथक् प्रयोगः ।

फलन्तु, पूर्वपक्षे अनेकफलोद्देशेन सकृत्प्रयोगः । **सिद्धान्ते** तु पृथक्पृथक्प्रयोग इति ।

इत्येकादशं दर्शपूर्णमासादीनां प्रतिफलं पृथगनुष्ठानाधिकरणम् (सूत्रे २७-२८)

वर्णकान्तरम्

अथ द्वादशं योगसिद्धिन्यायाधिकरणम्

''योगसिद्धिर्वाऽर्थस्योत्पत्त्यसंयोगित्वात् ॥ २८ ॥

पूर्वत्र कामगतः पर्यायरूपो विशेषश्चिन्तितः । अत्र तु तद्गताऽमुष्मिकतादिविशेषश्चिन्त्यत इति **सङ्गतिः** । स्वर्गस्याऽमुष्मिकत्वे वृष्ट्यभिचारपुत्रपूतत्वब्रह्मवर्चसादेरैहिकत्वे चाविवादात् पश्वादिफले चिन्ता । ''चित्रया यजेत पशुकामः'' इत्यादावुक्तपश्वादीनि कर्मफलानि किं देहान्तरोपभोग्यान्येव । आमुष्मिकाणीति यावत् । उत अत्र वा देहान्तरे वेत्यनियतानीति **सन्देहः** ।

पूर्वपक्षस्तु, प्रतिग्रहविक्रयादिना कारणान्तरेण पश्वादिलाभसम्भवेन तदर्थमदृष्टहेतुचित्रादि-साधनानपेक्षणात्, विशिष्टफलभोगार्हशरीरस्य मातापितृसंयोगमात्रेण भूतसंयोगमात्रेण चानुत्पत्तेस्तादृश-देहान्तरारम्भकत्वेन चित्रादेः पश्वादिहेतुत्वमित्यामुष्मिकाण्येव पश्वादिफलानीति ।

सिद्धान्तस्तु, पशुकामप्रजाकामादिशब्दैः पश्वादेः साध्यत्वमात्रावगमेन , इह वाऽमुत्र वेति विशेषानवगमादेहान्तरारम्भकत्वमप्रामाणिकमिति न देहान्तरारंभश्चित्रादिना । न चैवं साङ्गे कर्मण्यनुष्ठितेऽपीह क्वचित्फलादर्शनादेहान्तरारंभ आवश्यक इति वाच्यम् । प्रबलप्रारब्ध-प्रतिबन्धाभावेऽत्रैव कर्मफलभोगः, प्रारब्धकर्मपतिबन्धे तु देहान्तरे कर्मफलमोग इत्यङ्गीकारे

दोषाभावात् । अतोऽत्र वा जन्मान्तरे वा इत्यनियम इति । तदाह **सूत्रकारः**, **योगसिद्धिः** चित्रादिफलयोगस्येहापि सिद्धिः । **अर्थस्य** पश्चादेः **उत्पत्त्यसंयोगित्वात्** देहान्तरोत्पत्त्यनपेक्षत्वादिति ।

फलन्तु, **पूर्वपक्षे** देहान्तरे कर्मफलभोगर्थं चित्रादिकर्मणामनुष्ठानम् । सिद्धान्ते तु, प्रतिबन्धकाभावाभावाभ्यामिह वा परत्र वा भोगार्थमनुष्ठानमिति ।

इति द्वादशं काम्यानामैहिकामुष्मिकफलवत्त्वाधिकरणम् ।

अथ त्रयोदशं सौत्रामण्यादीनां चयनाद्यङ्गताधिकरणम् (सूत्राणि २९-३१)

समवाये चोदना संयोगस्यार्थवत्त्वात् ॥ २९ ॥

(कालश्रुतौ काल इति चेत् ॥ ३० ॥ नासमवायात्प्रयोजनेन स्यात् ॥ ३१ ॥)

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः । वाजपेये श्रूयते ''वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत'' इति । तत्र **सन्देहः** , वाजपेयबृहस्पतिसवयोरङ्गाङ्गिभावरूपसम्बन्धो वाजपेयाङ्गं बृहस्पतिसव इति , उत कालार्थः सम्बन्धो वाजपेययागानन्तरं बृहस्पतिसवः कार्य इति ।

पूर्वपक्षस्तु , वाजपेयबृहस्पतिसवयोः प्रत्येकं निर्ज्ञातफलवत्त्वेन फलवदफलन्यायानवतारात्, सन्निध्यभावाच्च, ब्रह्मवर्चसादिफलकस्य वाजपेयसन्निधावनाम्नातस्य प्रसिद्धबृहस्पतिसवस्य वाजपेयाङ्गत्वं पूर्वत्र चित्रादेरामुष्मिकैकफलकत्ववदप्रामाणिकम् । न चैवं ''प्रकरणान्तरे प्रयोजनान्यत्वम्'' इति द्वितीयोक्तप्रकरणान्तरन्यायेन प्रसिद्धबृहस्पतिसवसमानधर्मकं कर्मान्तरमफलं वाजपेयाङ्गतया विधीयत इति वाच्यम् । तथात्वे बृहस्पतिसवेवेत्यस्य बृहस्पतिसवसमानधर्मकेणेति धर्मलक्षणा स्यात् । तस्मात्कालार्थः सम्बन्ध इति ।

सिद्धान्तस्तु, कालार्थसम्बन्धत्वे वाजपेयश्रुतेरत्यन्तपारार्थ्यापत्तेः , प्रकरणबाधापातात्, त्त्वाश्रुत्यवगतसमानकर्तृकत्वविरोधात् । अङ्गाङ्गिभाव एवानयोः सम्बन्धः । तथा हि, प्रसिद्धबृहस्पतिसवस्य वाजपेयादुत्तरकालकर्तव्यतापरत्वे वाजपेयपदस्योत्तरकालावधि-

समर्पणपरतया अत्यन्तपारार्थ्यं स्यात्। न च मुख्यस्य तद्युक्तम्। वाजपेयप्रकरणबाधश्चैवं सति स्यात्। ''समानकर्तृकयोः पूर्वकाले'' इत्युक्तत्त्वात् त्त्वाश्रुत्या प्रतीतसमानकर्तृकत्वभङ्गापत्तेश्च। न हि ''वाजपेयकर्त्रैव बृहस्पतिसवः कार्यः'' इति नियमोऽस्ति। प्रसिद्धबृहस्पतिसव-समानधर्मककर्मान्तरं वाजपेयाङ्गतया विधीयत इति पक्षे तु वाजपेये किञ्चिद्विधानात् वाजपेयशब्दस्य न पारार्थ्यं, प्रकरणाबाधः, त्त्वाप्रत्ययोक्तसमानकर्तृकत्वाविरोधश्च। तस्मात् अङ्गाङ्गिभावार्थोऽयं सम्बन्धः। एवं तस्य कर्मान्तरत्वे सिद्धे मासाग्निहोत्रन्यायेन धर्मलक्षणा च न दोषः। तथा चायमर्थः ''वाजपेयप्रयोगं यथोक्तं कृत्वा न तावता कृतार्थः। किन्तु इदमपरं प्रसिद्धबृहस्पतिसवसमानधर्मकमङ्गं तस्य। तच्च पश्चात्कर्तव्यम्'' इति।

तदाह **सूत्रकारः**, **समवाये** अङ्गाङ्गिभावसम्बन्ध एव **चोदना**। कुतः ? **संयोगस्य** वाजपेयसंयोगस्य **अर्थवत्त्वादिति**।

फलन्तु, वाजपेयोत्तरांगतया बृहस्पतिसवसमानधर्मककर्मणोऽनुष्ठानम्।

इति त्रयोदशं सौत्रामण्यादीनां चयनाद्यङ्गताधिकरणम् (सूत्राणि २९-३१)

अथ चतुर्दशं वैमृधादेः पौर्णमास्याद्यङ्गताधिकरणम् (सूत्राणि ३२-३५)

उभयार्थमिति चेत्॥ ३२।

(न शब्दैकत्वात्॥ ३३॥ प्रकरणादिति चेत्॥ ३४॥ नोत्पत्तिसंयोगात्॥ ३५॥)

पूर्ववैषम्येणात्र शङ्कनात्सङ्गतिः। दर्शपूर्णमासप्रकरणे श्रूयते ''संस्थाप्य पौर्णमासीं वैमृधेनानुनिर्वपति'' इति। तत्र किमङ्गाङ्गिभावार्थः सम्बन्ध उत कालार्थः सम्बन्धः इति **संशयः**।

पूर्वपक्षस्तु, युक्तं पूर्वत्र वाजपेयाङ्गत्वं बृहस्पतिसवसमानधर्मककर्मणः। वाजपेयसमाप्तेरश्रवणात्। वैमृधेष्टेस्तु न पौर्णमास्यङ्गत्वं विज्ञातुं शक्यम्। संस्थाप्येति समाप्तिश्रवणात्। न हि समाप्तस्य पुनरङ्गसम्बन्धः सम्भवति। तस्मात्कालार्थः सम्बन्धः ''पौर्णमासीं समाप्य तत्काले वैमृधेष्टिः कार्या'' इति। न चैवं फलकल्पनादोषः। दर्शपूर्णमासप्रकरणवशेन तदुभयाङ्गतया

तत्फलेनैव फलवत्तया पृथक्फलकल्पनाभावात् । **तथा च सूत्रम्** वैमृधमुभयार्थं प्रकरणाविशेषादिति चेदिति ।

सिद्धान्तस्तु, पौर्णमासीं संस्थाप्य वैमृधेनानुनिर्वपति'' इति वाक्येन पौर्णमासीसंयुक्ततया प्रतीतां वैमृधेष्टिं वाक्याद्दुर्बलं प्रकरणं नोभयाङ्गतया नेतुमलमिति पौर्णमास्यङ्गतयैव वैमृधविधिः । संस्थाप्येति समाप्तिवचनन्तु दर्शसाधारणाङ्गसमाप्त्यभिप्रायेणैवोपपन्नम् । ''दर्शादिसाधारणाङ्गयुक्तां पौर्णमासीं समाप्येदं वैमृधाख्यमपरमङ्गं कर्तव्यम्'' इति वाक्यार्थपर्यवसानान्न कालार्थः सम्बन्ध इति । तदाह सूत्राकारः, न शब्दैकत्वादिति । एकवाक्यत्वादित्यर्थः ।

फलन्तु, दर्शेपि वैमृधेष्ट्यनुष्ठानं **पूर्वपक्षे** । **सिद्धान्ते** तु पौर्णमास्यामेवेति ।

इति चतुर्दशं वैमृधादेः पौर्णमास्याद्यङ्गताधिकरणम् (सूत्राणि ३२-३५)

अथ पञ्चदशमनुयाजादीनामग्निमारुतोर्ध्वकालताधिकरणम् ।

अनुत्पत्तौ कालः स्यात् प्रयोजनेन सम्बन्धात् ॥ ३६ ॥

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः । ज्योतिष्टोमे ''अग्निमारुतादूर्ध्वमनुयाजैश्चरन्ति'' इति श्रुतम् । अग्निमारुतं नाम किञ्चिच्छस्त्रम् । **अनुयाजास्तु** ''देव बर्हिर्मा त्वा'' इत्यादिभिः पाशुकहौत्रकाण्डपठितैरेकादशभिर्मन्त्रैः साध्या एकादशहोमाः । तत्र किं अग्निमारुतानुयाजानामङ्गाङ्गिभावार्थः सम्बन्धः कालार्थो वेति **सन्देहे,** कालार्थत्वे अग्निमारुतशब्दस्योर्ध्वकालं प्रत्यवधिसमर्पकतया अत्यन्तपारार्थ्यापत्तेः, बृहस्पतिसववदनुयाजधर्मककर्मान्तरत्वेन वा वैमृधवद्वा अग्निमारुतशस्त्राङ्गमनुयाजा इति **प्राप्ते,**

सिद्धान्तः , इतरस्तोत्रशस्त्रवदग्निमारुतशस्त्रस्यापि सोमयागाङ्गत्वं निर्णीतम् । अग्नीषोमीयपशुविकृतिभूतसवनीयपशावतिदेशतः प्राप्तानामेकादशानुयाजानामपि प्रयाजवत् पश्वङ्गत्वमवगतम् । ततः परस्परमंगाङ्गिभावायोगात् कालार्थोयं सम्बन्ध इति ।

तदाह **सूत्रे, अनुत्पत्तौ** कर्मान्तरानुत्पत्तौ **कालः स्यात्** कालार्थ एव संयोगः स्यात। कुतः ? प्रसिद्धस्य कर्मणः **प्रयोजना**न्तरेण सम्बन्धात् अन्याङ्गतया विध्ययोगादिति।

फलन्तु, पूर्वपक्षे अग्निमारुतार्थानामनुयाजानां प्रसिद्धानुयाजेभ्यः कर्मान्तरत्वात् पश्वर्था अनुयाजाः स्वकाले कर्तव्याः। **सिद्धान्ते तु** पश्वार्थानामेवाग्निमारुतादूर्ध्वमुत्कर्षान्न स्वकाले कर्तव्यतेति।

इति पञ्चदशमनुयाजादीनामग्निमारूतोर्ध्वकालताधिकरणम्

अथ षोडशं सोमादीनां दर्शपूर्णमासोत्तरकालताद्यधिकरणम्

उत्पत्तिकालविशये कालः स्यात् वाक्यस्य तत्प्रधानत्वात् ॥ ३७ ॥

पूर्ववैषम्येणात्र शङ्कनात्सङ्गतिः। ज्योतिष्टोमे ''दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत'' इति श्रुतम्। तत्र किमयमङ्गाङ्गिभावार्थः सम्बन्धोऽथ कालार्थ इति **सन्देहः**।

पूर्वपक्षस्तु, पूर्वत्रान्याङ्गत्वेन निर्धारितयोरग्निमारुतानुयाजयोरन्योन्याङ्गाङ्गिभावायोगेऽपीह दर्शपूर्णमासकर्मज्योतिष्टोमकर्मणोरन्याङ्गत्वाभावात्कालविधिपरत्वे दर्शपूर्णमासपदयोरत्यन्तपारार्थ्यापातादङ्गाङ्गिभावार्थोऽयं सम्बन्ध इति।

सिद्धान्तस्तु , दर्शपूर्णमासयोः सोमयागस्य च प्रत्येकं वाक्यान्तरेण फलवत्त्वश्रवणादङ्गाङ्गिभावकल्पकस्य फलवदफलन्यायस्येहाभावात्। नाङ्गार्थः सम्बन्धः। **किञ्च** दर्शपूर्णमासयोः सोमाङ्गत्वं चोद्यते सोमस्य तदङ्गत्वं वा। **नाद्यः**। विधिविभक्तेः सन्निहितसोमयागेनैवान्वितत्वेन दर्शपूर्णमासयोर्विध्यभावेनाविधीयमानयोस्सोमाङ्गत्वायोगात्। वाक्यान्तरेण विधाने तु पृथक्फलश्रवणान्नान्याङ्गत्वमित्युक्तम्। द्वितीयेऽपि तत्किं कर्मान्तरमुत प्रकृतज्योतिष्टोम एव। **नाद्यः**। प्रकृतस्यैव बुद्धौ विपरिवर्तमानत्वेन प्रकृतत्यागापातात्। **नान्त्यः**। तस्य वाक्यान्तरेण फलार्थतया निर्णीत्वेनान्याङ्गताया अयुक्तत्वात्कालार्थ एवायं सम्बन्ध इति।

तदाह **सूत्रकारः**, **उत्पत्तिकालविशये** किमत्र कर्मान्तरस्योत्पत्तिरुत प्रसिद्धस्यैव सोमस्य कालविधिरिति संशये **काल** एव विधेयः **स्यात्** । कुतः ? **वाक्यस्य** विधिप्रत्यासत्तिबलेन प्रकृतसोमयागविधिपरत्वेन कालमात्रविधिप्रधानत्वादिति ।

फलन्तु, पूर्वपक्षे सोमार्थं दर्शाद्यनुष्ठानम् । **सिद्धान्ते तु** नेति ।

इति षोडशं सोमादीनां दर्शपूर्णमासोत्तरकालताद्यधिकरणम्

अथ सप्तदशं वैश्वानरेष्टेः पुत्रगतफलकत्वाधिकरणम्

फलसंयोगस्त्वचोदिते न स्यादशेषभूतत्वात् ॥ ३८ ॥

उत्तरचिन्तोपयुक्ततयेदमारभ्यते । तदाह **तन्त्ररत्ने, तस्य चायमुपोद्धातः** इति । काम्येष्टिकाण्डे ''वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते'' इति प्रकृत्य श्रूयते ''यस्मिन् जात एतामिष्टिं निर्वपति स पूत एव तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवति'' इति । तदिदमर्थवादगतं पूतत्वादिकं, क्रतौ फलार्थवादमित्यत्र प्रागुक्तरात्रिसत्रप्रतिष्ठावत्फलमिति स्थिते तत्किमिष्टिकर्तुः पितुः फलमुत पुत्रस्येति **सन्देहे,**

प्रवर्तनारूपविधिना विध्युद्देश एव कर्तुरिष्टसाधनत्वबोधनद्वारा तस्यैव प्रेर्यत्वादन्यफले कर्मण्यन्यस्य प्रेरणायोगात्, ''अग्नीनादधीत'' इत्याधानगतात्मनेपदेन कर्तृगामिफलबोधनादग्निसाध्यकर्मफलानामाधातृगामित्वनियमावगमात्पितुरेव तत्फलमिति **प्राप्ते,**

सिद्धान्तः, ''यस्मिन् जात एतामिष्टिं निर्वपति स पूतः'' इति फलसमर्पकार्थवाद एव ''सः'' इति जातमेव निर्दिश्य तस्यैव फलोक्तेः स्पष्टत्वात्, पुत्रपूतत्वस्यापि पितुरुभिलषितत्वेनाऽधानगतात्मनेपदाविरोधाच्च पुत्रफलमेव पूतत्वादिकमिति । तदाह सूत्रे, ॥ **फलसंयोगस्त्विति** । **अचोदिते** वाक्यशेषे अनुक्ते पितरि फलसंयोगो न स्यात् । वाक्यशेषस्य पितृगतफलप्रतीतौ शेषभूतत्वाभावादिति ।

फलन्तु, पुत्रगतपूतत्वाद्युद्देशेनानुष्ठानम् । एषा वैश्वानरेष्टिर्विधिवाक्ये पुत्रजन्मनिमित्तकत्वस्य आर्थवादिकफलस्य च श्रवणान्नैमितिककाम्येष्टिरित्याहुः ।

इति सप्तदशं वैश्वनरेष्टेः पुत्रगतफलकत्वाधिकरणम्

अथाष्टादशं वैश्वनरेष्टेर्जातकर्मोत्तरकालताधिकरणम्

अङ्गानामुपपातसंयोगो निमित्तार्थः ॥ ३९ ॥

पुत्रगतफलार्थेयमिष्टिरिति स्थिते **चिन्त्यते** ''किमियं जननानन्तरमेव कार्योत कृते जातकर्मणि पश्चात्कार्या'' इति । निमित्तानन्तरमेव नैमित्तिकस्य कर्तव्यतया प्राप्तस्य कारणेन विना अतिक्रमणायोगाज्जननानन्तरमेव कार्येति **प्राप्ते**,

सिद्धान्तः, जातस्य स्तनपानं तावज्जातकर्मानन्तरं विधीयते । यदि जातकर्मणः प्रागेवेयमिष्टिर्निरूप्येत तर्हि स्तनपानमिष्टिजातकर्मणोरनन्तरमुत्कृष्येत । ततश्च पुत्रस्य विपत्तिप्रसङ्गादिष्टिरेवेयमनर्थिका स्यात् । अतो जातकर्मानन्तरमेवेयमिष्टिः कार्येति ।

तदाह **सूत्रे**, **अङ्गानां** वैश्वानरादिकर्मणा**मुपपातसंयोगः** । उपपातः संयोगी । उपपततीत्युपपातः पुत्रजन्म । पुत्रजन्मसंयोग एव निमित्तार्थः, **निमित्तम्** । न तस्याव्यवहितानन्तर्यमिति ।

फलन्तु, जातकर्मानन्तरमनुष्ठानमिष्टेरिति ।

वर्णकान्तरम्

वर्णकान्तरं तु, किमियमिष्टिर्जातकर्मानन्तरमेव कार्योत आशौचापगमे दर्शादिस्वकाल एवेति **सन्देहे**, पुत्रजनिरूपनिमित्तानन्तरं प्राप्तेयमिष्टिः पुत्रविपत्तिभिया जातकर्मानन्तरमुत्कृष्टा । न ह्याशौचानन्तरमप्युत्कर्षे कारणमस्ति । न च शौचरूपाङ्गोपेततासिद्धिरेव कारणमिति वाच्यम् ।

अपि वाप्येकदेशः स्यात् इति षष्ठतृतीयपादीयाद्यनये वक्ष्यमाणदिशा निमित्तवशेन प्राप्तप्रधानकर्तव्यत्वावश्यकत्वानुरोधेन यथासम्भवमङ्गानुष्ठानसम्भवादिति जातकर्मानन्तरमेव सा कार्येति प्राप्ते,

निमित्तानन्तरमेव स्वरसतः प्राप्तापीयमिष्टिः प्रयोजनवशात्तत्कालबाधेनोत्कृष्टा। तथाऽत्रावैगुण्याय शौचकालप्रतीक्षया अशौचापगमे मुख्ये पौर्णमास्यादिस्वकाल एव कार्येति **सिद्धान्तः**। अस्मिन् पक्षे **सूत्रार्थस्तु, अङ्गानामिष्टीनां** उपपातसंयोगो भूतपुत्रजननसंयोगो निमित्तम्। स च समग्राङ्गोपसंहारेऽप्यविरुद्ध इति।

फलन्तु, स्वकाले पर्वण्येवानुष्ठानम्।

इत्यष्टादशं वैश्वानरेष्टेर्जातकर्मोत्तरकालताधिकरणम्।

अथैकोनविंशं सौत्रामण्याद्यङ्गानां स्वकालकर्तव्यताधिकरणम्। (सूत्रे ४०-४१)

प्रधानेन संयोगादङ्गानां मुख्यकालत्वम्॥ ४०॥

(अपवृक्ते तु चोदना तत्सामान्यात्स्वकाले स्यात्॥ ४१॥)

पूर्ववैषम्येण शङ्कनात्सङ्गतिः। ''वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत'' इत्यत्र बृहस्पतिसवसमानधर्मकं कर्मान्तरं वाजपेयाङ्गमित्युक्तं समवाये चोदनेति नये। तत्र किं तदङ्गमङ्गिकाले अङ्गिना सहैव कार्यमुत अतिदेशप्राप्ते वसन्तरूपे स्वकाल इति **सन्देहः**।

पूर्वपक्षस्तु, ''शरदि वाजपेयेन'' इति वाजपेयकरणकफलार्थव्यपारः फलभावनाख्यः शरत्काले विधीयते। स च व्यापारोऽङ्गप्रधानव्यासक्त एव फलोत्पादसामग्रीति समानोऽङ्गप्रधानयोः शरत्काल इत्यातिदेशिकवसन्तकालबाधेन वाचनिको बलवान् शरत्काल एवाङ्गान्तराणामिवास्यापि प्राप्त इत्यङ्गिना सह तत्काल एवेदमप्यङ्गं कार्यमिति। पूर्वत्र वैश्वानरेष्टेर्निमित्त स्वररूपविघातेन स्वकाले पर्वण्येवानुष्ठानेपीह वाचनिककालविरोधान्नातिदिष्टे स्वकालेऽनुष्ठानमिति।

तदाह **सूत्रे,** **अङ्गानां** बृहस्पतिसवादीनां **मुख्यकालत्वं** अङ्गिकालत्वमेव युक्तम् । कुतः ? प्रधानेन साहित्यनियमादङ्गानामिति ।

सिद्धान्तस्तु, क्त्वाप्रत्ययेन पूर्वकालवाचिना साङ्गे यागे निर्वृते पश्चाच्चोद्यमानं बृहस्पतिसवाख्यं कर्मान्तरमिदमङ्गिना यदि तत्काले तेन सह क्रियेत तदा क्त्वाश्रुतिप्रापितः पूर्वोत्तरकालविभागो बाध्येत । ततः पृथक्प्रयोगेऽवश्यंभाविनि स्वस्वचोदकप्रापिते काले तदनुष्ठानं युक्तमिति बृहस्पतिसवस्य ज्योतिष्टोमविकृतितया तस्य चोदकप्राप्तवसन्तकालत्वेन तत्समानधर्मकमिदं कर्म वसन्तकाल एव कर्तव्यम् ।

नन्वेवं पूर्वकालीनेन साङ्गप्रधानानुष्ठानेन फलापूर्वस्य निष्पन्नत्वादुत्तरकालीनमिदमङ्गं व्यर्थमिति चेत् तस्यैवापूर्वस्यानेनाङ्गेन बलवत्त्वरूपातिशयः क्रियत इति कल्पनीयत्वादिति ।

फलन्तु, वसन्त एव बृहस्पतिसवसधर्मकवाजपेयाङ्गकर्मणोऽनुष्ठानम् ।

इत्येकोनविंशं सौत्रामण्याद्यङ्गानां स्वकालकर्तव्यताधिकरणम् (सूत्राणि ४०-४१)

इति श्रीभाट्टसंग्रहे सर्वतन्त्रस्वतन्त्रश्रीसुधीन्द्रतीर्थगुरुपादशिष्य

श्रीराघवेन्द्रतीर्थयतिसार्वभौमकृते चतुर्थाध्यायस्य तृतीयः पादः

अस्मिन् पादे	अधिकरणानि	१९	सूत्राणि	४१
आदितः	अधिकरणानि	२९५	सूत्राणि	७७६

अथ चतुर्थाध्यायस्य चतुर्थः पादः

अथ प्रथमं राजसूयेज्यानां विदेवनाद्यङ्गकत्वाधिकरणम् (सूत्रे १-२)

हरिः ॐ । पूर्वपादे अङ्गानां स्वतन्त्रफलप्रयुक्तत्वमस्त्युत नेति चिन्ता कृता । अत्र तु करणतयाऽवगतानां प्रधानफलप्रयुक्तत्वमस्त्युत नेति चिन्त्यत इति **पादभेदो** ज्ञेयः । पर्णतादीनां फलप्रतिपादनयोग्यवाक्यसम्बन्धः क्लृप्त इति तेषु फलप्रयोज्यत्वधीरविलम्बिता । विदेवनादेस्तु फलवाक्यसम्बन्धो न स्फुट इति सा विलम्बितेति तदनन्तरमियं चिन्तेति ध्येयम् ।

प्रकरणशब्दसामान्याच्चोदनानमनङ्गत्वम् ॥ १ ॥

(अपि वाऽङ्गमनिज्याः स्युस्ततो विशिष्टत्वात् ॥ २ ॥)

राजसूयप्रकरणे अनेकेष्टिपशुसोमदर्वीहोमरूपाश्चतुर्विधा यागाः श्रुताः । ''अनुमत्यै पुरोडाशमष्टादशकपालं निर्वपति'' ''नैऋतमेककपालं'' ''आदित्यं चरुं निर्वपति,'' ''अग्नावैष्णवमेकादशकपालम्'' इत्यादय इष्टयः । ''आदित्यां मल्हां गर्भिणीमालभेत'' ''मारुतीं पृश्निम्'' ''पृष्टौहीमश्विभ्याम्'' इत्यादयः पशुयागाः । **मल्हा** गलस्तनयुक्तेत्यर्थः । तस्य अदितिर्देवता । **पृश्निरल्पतनुः** । तस्य मारुतो देवता । यावता वयसा पृष्ठे भारं वोढुं शक्नोति तावद्वयस्का **पृष्टौही** त्रिवर्षेत्यर्थः । तस्या अश्विनौ देवता । एवमभिषेचनीयदशपेयादयः सोमयागाः । ''वल्मीकवपायां होमः'' इत्यादयो दर्वीहोमाश्च । तथा ''अक्षैर्दीव्यति, राजन्यं जिनाति, शौनःशेपमाख्यापयति'' इति विदेवनराजन्यजयशुनःशेपाख्यानादयोऽयागरूपाः पदार्थाः श्रुताः।

एवं श्रुतयागायागसमुदायं प्रकृत्य ''राजा राजसूयेन स्वाराज्यकामो यजेत'' इति श्रूयते । तत्र **सन्देहः**, किमनुमत्यादयो यागाः विदेवनादयश्चायागाः सर्वेऽपि फलवाक्येन साक्षात्फले विनियुक्ततया समप्रधानाः सन्तः फलेनैव प्रयुज्यन्ते । किं वा यागा एव तथा । अयागास्तु क्रत्वर्थास्सन्तः क्रतुद्वारा फले विनियुज्यन्त इति ।

पूर्वपक्षस्तु, फलवाक्यस्थराजसूयशब्दस्याप्रसिद्धार्थत्वेऽपि तृतीयान्ततया फलसाधनत्वेन

निर्णीतत्वात् फलापेक्षाणां सन्निहितानां यागायागरूपाणां सर्वेषां नामत्वाध्यवसायात् यजेतेत्यनेन छत्रिन्यायेन यागायागसमुदायपरेण ''राजसूयनामकेन यागायागसमुदायेन स्वाराज्यं भावयेत्'' इति फलवाक्येन सर्वेषां फलसम्बन्धावगमात् सर्वेपि समप्रधानाः सन्तः फलेनैव प्रयुज्यन्त इति।

तदाह **सूत्रे, प्रकरणस्य** फलाकांक्षायाः शब्दस्य राजसूयनामधेयस्य च सामान्याच्चोदनानामिज्यानिज्याचोदनानामन्योन्यमनङ्गत्वमिति।

सिद्धान्तस्तु, भावार्थनये धात्वर्थादेवापूर्वद्वारा फलमित्युक्तत्वादिहापि धात्वर्थादेव भावनाद्वारा फलस्य वाच्यत्वात् धातोश्च मुख्यवृत्त्या सन्निहितयागमात्रपरत्वसम्भवे लक्षणाश्रयणायोगात् , नामधेयस्यापि यजिसामानाधिकरण्येन यागमात्रनामत्वात् यागानामेव फलसाधनत्वम् । अन्येषान्तु फलवदफलन्यायेन फलवदङ्गत्वमिति यागानमेव प्रयोज्यत्वं न विदेवनादीनां इति।

तथा **च सूत्रम् , अपि वाऽङ्गमनिज्याः स्युः** इति।

फलन्तु, अवेष्टिनामकेष्टेर्बहिः प्रयोगे विदेवनादेरननुष्ठानं **पूर्वपक्षे** । प्रधानत्वेन अवेष्ट्यङ्गत्वाभावात् । **सिद्धान्ते तु** अङ्गत्वादनुष्ठानमिति ।

इति प्रथमं राजसूयेज्यानां विदेवनाद्यङ्गकत्वाधिकरणम् (सूत्रे १-२)

अथ द्वितीयं विदेवनस्य कृत्स्नराजसूयाङ्गताधिकरणम् (सूत्रे ३-४)

मध्यस्थं यस्य तन्मध्ये ॥ ३ ॥

(सर्वासां समत्वाच्चोदनातः स्यान्न हि तस्य प्रकरणं देशार्थमुच्यते मध्ये ॥ ४ ॥)

पूर्वत्रायागानां यागाङ्गत्वे सिद्धेऽत्र कस्याङ्गम् ? कस्य न ? इति विशेषचिन्तनात्सङ्गतिः । अभिषेचनीयाख्यसोमयागं विधाय तत्सन्निधौ विदेवनादयोऽभिषेकान्ताः पदार्था विहिताः । यजमानस्याभिषेकश्च ''माहेन्द्रस्तोत्रं प्रत्यभिषिच्यते'' इति अभिषेचनीययागाङ्गमध्ये माध्यन्दिने

सवने माहेन्द्रस्तोत्रकालेऽपकृष्यते । स चापकृष्यमाणः पूर्वान् विदेवनादीनभिषेकान्तान् सर्वानप्यपकर्षतीति पञ्चमस्य द्वितीयपादे **कृतदेशात्पूर्वेषामित्यत्र** वक्ष्यते ।

तथा च **सन्देहः** किमिमे विदेवनादयोऽभिषेचनीयाख्यसोमायागाङ्गमुत राजसूयशब्दित-सर्वयागाङ्गमिति ।

पूर्वपक्षस्तु, अभिषेचनीयस्य विकृतित्वेन औपदेशिकाङ्गानामभावेऽपि तस्य कथंभावाकांक्षापूरकत्वेन चोदकप्राप्तप्राकृताङ्गमध्ये माहेन्द्रस्तोत्रकाले माध्यन्दिने सवनेऽपकर्षेण तदीयाङ्गमध्यपातेन ''अभिक्रामं जुहोति'' इत्यादेः प्रयाजाङ्गत्वमिव सन्दंशन्यायेनात्रावा-न्तरप्रकरणकल्पनया अभिषेचनीयाङ्गत्वं विदेवनादीनामिति ।

तदाह **सूत्रे, यस्य** कर्मणो **यन्मध्यस्थं , तन्मध्ये** तदङ्गकलापमध्ये पातात्तदङ्गमिति।

सिद्धान्तस्तु, अन्योन्याकांक्षावशाद्ध्यवान्तरप्रकरणकल्पनम् । तेन चाङ्गतानिश्चयः । अन्यथा विकृतिष्वौपदेशिकविशेषाकांक्षावशात्तासामप्युत्थापिताकांक्षाकल्पनं न स्यात् । न ह्यत्रोभयोराकांक्षाऽस्ति । अभिषेचनीयस्याङ्गाकांक्षायां सत्यामपि विदेवनादीनामुत्पत्तिस्थल एवोत्पन्नप्रयोजनाकांक्षाया राजसूयाख्यानुमत्यादियागचतुष्टय-स्याङ्गाकांक्षारूपमहाप्रकरणेन तदुपकारकतया शेषत्वबोधनेन शान्तत्वात् पुनरनुष्ठानस्थले प्रयोजनाकांक्षानुदयेनावान्तर-प्रकरणकल्पनानवकाशात् । अनुष्ठानं तु राजसूयमध्ये यत्र क्व चापेक्षितमिति वचनबलादभि-षेचनीयगतमाहेन्द्रस्तोत्रकाले क्रियत इति । तदाह **सूत्रे, सर्वासां वा समत्वादित्यादि ।**

फलन्तु, पूर्वपक्षे पूर्ववदेवेष्टौ बहिःप्रयोगे विदेवनादीनां नानुष्ठानम् । **सिद्धान्ते** त्वनुष्ठानमिति । पूर्वाध्याये बलाबलाधिकरणे सन्निधिरूपस्थानप्रमाणापेक्षया प्रकरणस्य प्राबल्यमुपेत्य विदेवनादेः सर्वार्थत्वोक्तावपीहावान्तरप्रकरणेन विशेषहेतुना अभिषेचनीयाङ्गत्वशङ्केति वा, अत्र अवान्तरप्रकरणे निरस्ते महाप्रकरणेन सर्वार्थत्वे स्थिते तत्र सन्निधिरूपक्रम-प्रमाणेनाभिषेचनीयाङ्गत्वे शङ्किते प्रकरणप्राबल्येन सर्वाङ्गत्वसाधनमिति वा अपौनरुक्त्यमित्याहुः।

इति द्वितीयं विदेवनस्य कृत्स्नराजसूयाङ्गताधिकरणम् (सूत्रे ३-४)

अथ तृतीयं सौम्यादीनामुपसत्कालकत्वाधिकरणम् (सूत्रे ५-३)

प्रकरणाविभागे च विप्रतिषिद्धं ह्युभयम् ॥ ५ ॥

(अपि वा कालमात्रं स्याददर्शनाद्विशेषस्य ॥ ६ ॥)

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः । राजसूये संसच्छब्दवाच्यानि आग्नेयाष्टकपालादीनि दश हवींष्याम्नातानि । तेष्वष्टमनवमदशमानि "सौम्यं चरुं" "बभ्रुर्दक्षिणा" इत्यादिवाक्योक्तानि सौम्यत्वाष्ट्रवैष्णवानि । तद्विषयमेतद्वाक्यं श्रूयते "पुरस्तादुपसदां सौम्येन प्रचरन्ति, अन्तरा त्वाष्ट्रेण, उपरिष्टाद्वैष्णवेन" इति । योऽयं राजसूये दशपेयो नाम सोमयागस्तस्मिन्नतिदिष्टानामुपसदामादिमध्यावसानेषु सौम्यादीनां त्रयाणमनुष्ठानमनेन वाक्येन चोद्यते । तत्र **सन्देहः**, सौम्यादीन्युपसदङ्गानि ताभिः प्रयुज्यन्ते किं वा अनुमत्यादिवत्फलार्थानि । कालार्थोऽयं संयोग इति ।

पूर्वपक्षस्तु, "राजा राजसूयेन" इत्यादिफलसम्बन्धबोधकमनुमत्यादिसर्वयागसाधारण्यात् सामान्यवाक्यं सत्, फलाकांक्षाणि सौम्यादीन्यपि प्रकरणवशेन यजिना अनूद्य फलसम्बन्धं बोधयति । पुरस्तादित्यादिवाक्यानि तु सौम्येनेत्यादितृतीयान्तेन षष्ठीनिर्दिष्टोपसदंगत्वेन विनियुञ्जानानि विशेषवाक्यानि प्रकरणात् प्रबलानि चेति तदङ्गताव्याघुट्टनेन फलार्थतां न सहन्त इत्युपसदंङ्गत्वम् । यथा पूर्वत्र बलवत्प्रकरणप्रमाणविनियुक्तानां न दुर्बलक्रमप्रमाणेनाभिषेचनीयाङ्गता तथेति । तदाह **सूत्रे, प्रकरणस्य** फलाकांक्षरूपस्य प्रकरणस्यापि **अविभागे** चाविशेषेऽपि अङ्गाङ्गिभाव एव न्याय्यः । अन्यथा तृतीया षष्ठी **चेत्युभयं विप्रतिषिद्धं** बाधितं स्यादिति ।

सिद्धान्तस्तु, उपसदामिति षष्ठ्याः कालवाचिना पुरस्तादिति शब्देनान्वयात्सौम्यादीनां कालविशेषसम्बन्धपरमिदं वाक्यम् । अन्यथा पुरस्तादित्यस्य वैय्यर्थ्यापत्तेः । तस्मात्फलार्थानि सौम्यादीनि, नोपसदङ्गानीति । तदाह **सूत्रे, अपि वा कालमात्रं स्यादित्यादि ।**

फलन्तु, पूर्वपक्षे सौम्यादेः प्रत्युपसदमनुष्ठानम् । अङ्गानां यावत्प्रधानमावृत्तेः । सिद्धान्ते तु सर्वासामुपसदामादौ सकृदनुष्ठानमिति ।

इति तृतीयं सौम्यादीनामुपसत्कालकत्वाधिकरणम् (सूत्रे ५-६)

अथ चतुर्थमामनहोमादीनां सांग्रहण्यङ्गताधिकरणम् ।

फलवद्वोक्तहेतुत्वादितरस्य प्रधानं स्यात् ॥ ७ ॥

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः । काम्येष्टिकाण्डे ''वैश्वदेवीं सांग्रहणीं निर्वपेद्ग्रामकामः'' इति श्रुतां काम्येष्टिं प्रकृत्य ''आमनस्यामनस्य देवा इति तिस्र आहुतीर्जुहोति'' इति श्रूयते । तत्र किं ग्रामकामपदानुषङ्गेण सांग्रहणीष्टिवत्फलार्था होमाः किं वा सांग्रहण्यङ्गमिति **सन्देहः** ।

पूर्वपक्षस्तु, सांग्रहण्या अङ्गाकांक्षायां सत्यामपि तस्य दर्शपूर्णमासविकृतित्वेन चोदकप्राप्ताङ्गैरेवाऽकांक्षाशान्तेः पृथगङ्गाकांक्षाभावात् आमनहोमानाञ्च फलपदानुषङ्गेण प्रयोजनावाप्तेरन्यापेक्षाभावात् , सौम्यादेः फलवत्त्वेनान्यानङ्गत्ववदस्यापि फलवत्त्वेन सम्भवति च प्राधान्येऽन्याङ्गत्वायोगात्, फलार्था एव होमा इति ।

सिद्धान्तस्तु, सांग्रहण्या अङ्गाकांक्षारूपप्रकरणाभावेऽप्यामनहोमानां प्रयोजनाकांक्षासत्त्वात्, तस्याः फलपदानुषङ्गेण पूरणे फलपदस्य सकृदाम्नानबाधात्, सन्निधिरूपक्रमप्रमाणेन फलवत्सांग्रहणीष्ट्यङ्गत्वसम्भवे अगतिकानुषङ्गकल्पनायोगात्, ''उग्रोऽस्युग्रस्त्वं देवेष्वध्युग्रोऽहं सजातेषु भूयासम्'' इति परिधिमन्त्रव्यवधानेन **व्यवायान्नानुषज्यत** इति न्यायादनुषङ्गायोगाच्चाङ्गमेवाऽमनहोमा इति ।

तदाह **सूत्रे**, **फलवत्**सांग्रहण्याख्यं कर्म **इतरस्य** आमनहोमस्य **प्रधानं स्यात्** । कुतः ? **उक्तहेतुत्वात्** फलवत्सन्निधावफलं तदङ्गमिति हेतोरुक्तत्वादित्यर्थः ।

फलन्तु, स्वतन्त्रफलार्थिनैवामनहोमाः सांग्रहणीमध्ये वचनादनुष्ठेयाः **पूर्वपक्षे** । **सिद्धान्ते तु**, सांग्रहण्यर्थमिति ।

इति चतुर्थमामनहोमादीनां सांग्रहण्यङ्गताधिकरणम् ।

अथ पञ्चमं दधिग्रहस्य नित्यताधिकरणम् (सूत्राणि ८-१०)

दधिग्रहो नैमित्तिकः श्रुतिसंयोगान्नित्यश्चा ज्येष्ठशब्दात् ॥ ८ ॥

(सार्वरूप्याच्च ॥ ९ ॥ नित्यो वा स्यादर्थवादात्तयोः कर्मण्यसम्बन्धाद्भङ्गित्वाच्चान्तरायस्य ॥ १० ॥)

पूर्ववैषम्येणात्र शङ्कनात्सङ्गतिः । ज्योतिष्टोमे श्रूयते ''यां वै काश्चिदध्वर्युश्च यजमानश्च देवतामन्तरितस्तस्या आवृश्च्येते, यत्प्राजापत्यं दधिग्रहं गृह्णीयाच्छमयत्येवैनाम्'' इति ।

अस्यार्थः, अध्वर्युः यजमानश्च यां देवतां अन्तरितो व्यत्यासयतः, तस्याः सकाशात् आवृश्च्येते क्षोभमाप्नुतः । दधिग्रहे गृहीते तद्दोषशान्तिः स्यादिति । तत्र दधिग्रहः किं नैमित्तिकः, उत नित्यो नैमित्तिकश्च, किं वा नित्य एवेति त्रेधा **सन्देहः** ।

पूर्वपक्षस्तु देवतान्तराये एतन्निमित्तक्षोभमुक्त्वा दधिग्रहणे तद्दोषशमनाभिधानात् पूर्वत्र व्यवायेन ग्रामपदस्यानन्वयेऽपीहवाक्यशेषस्थक्षोभशान्तिरूपफलान्वयसम्भवेन तत्प्रयोजनकः सन् देवतान्तरायनिमित्तकोऽयं दधिग्रहो नैमित्तिक **इत्येकः** । तदुक्तं **सूत्रे, दधिग्रहो नैमित्तिकः** स्यात् । श्रुत्या देषशान्तिरूपकार्यसंयोगा**दिति** ।

सत्यं नैमित्तिकइति । किन्तु नित्योऽपि । कथं ? ''ज्येष्ठो वा एष ग्रहाणां'' इति ज्येष्ठत्वाम्नानात् । ज्येष्ठशब्दश्च प्रशस्ततमवचनः । प्रशस्यशब्दात् ''अतिशायने तमबिष्ठनौ'' इति इष्ठन्प्रत्यये ''प्रशस्य श्रः'' इत्यधिकृत्य ''ज्य च'' इति सूत्रेण प्रशस्यशब्दस्य ज्यादेशे कृते ज्येष्ठ इति निष्पन्नत्वात् । तच्च प्रशस्ततमत्वरूपं ज्येष्ठत्वं नित्यत्वे सत्येव युक्तम् । नैमित्तिकस्य पाक्षिकत्वेनाप्रशस्तत्वात् । तस्मान्नित्यो नैमित्तिकश्चेति **द्वितीयः** ।

तदाह **सूत्रे, नित्यश्च ज्येष्ठशब्दादिति** । स्यादेवमन्तरायस्य निमित्तत्वे द्वैरूप्यं दधिग्रहस्य । न चैतदस्ति । ''यदि सोममपहरेयुः'' इत्यादाविव यदिशब्दस्य ''यस्योभयं हविरार्तिमार्च्छेत्'' इत्यादाविव कर्तृसामानाधिकरणयच्छब्दस्य ''भिन्ने जुहोति'' इत्यादाविव सप्तम्यन्तस्य निमित्तत्वज्ञापकस्याभावात् । यच्छब्दस्य कर्तृसमानाधिकरणस्य

निमित्तत्वाप्रतिपादकत्वात्। तस्मादर्थवादमात्रमन्तरायवाक्यमिति दधिग्रहो नित्य एवेति। तदाह **सूत्रे, नित्य एव स्यादर्थवादात्तयोरित्यादि।**

फलन्तु, आद्ये पूर्वपक्षे निमित्ते सत्येव दधिग्रहोऽनुष्ठेयः। **द्वितीये** नित्यमनुष्ठेयोऽपि निमित्ते सति मध्येप्यनुष्ठेय इति। **सिद्धान्ते तु,** मध्ये निमित्तेऽपि नानुष्ठेय इति।

इति पञ्चमं दधिग्रहस्य नित्यताधिकरणम् (सूत्राणि ८-१०)

अथ षष्ठं वैश्वानरस्य नैमित्तिकताधिकरणम् (सूत्रे ११-१२)

वैश्वानरश्च नित्यस्स्यात् नित्यैः समानसंख्यत्वात्॥ ११॥

(पक्षे वोत्पन्नसंयोगात्॥ १२॥)

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः। ''य एवं विद्वानग्निं चिनुते'' इत्युक्ताग्निचयने श्रूयते ''यो वै संवत्सरमुख्यमभृत्वाऽग्निं चिनुते यथा सामिगर्भो विपद्यते तादृगेव तदाऽर्तिमार्च्छेत्। वैश्वानरं द्वादशकपालं पुरस्तान्निर्वपेत्'' इति।

अस्यार्थः, उखायां पिठरेऽग्निं निधाय, तामुखां षडुद्यामे द्वादशोद्यामे वा शिक्येऽवदाय, तच्छिक्यं स्वकण्ठेऽवबध्य तमुख्यमग्निं संवत्सरं भृत्वाग्निश्चेतव्यः। एवमभरणे त्वपरिपूर्णगर्भवदग्नेर्विनाशः स्यात्। तत्परिहाराय चयनात् प्राग्वैश्वानरेष्टिं कुर्यात्। नार्तिमार्च्छेदिति। तत्र किं नित्यो वैश्वानर उत नैमित्तिक इति **सन्देहे,**

अन्तरायवाक्यवदभरणवाक्यस्याप्यर्थवादत्वाद्दधिग्रह इव वैश्वानरेष्टिरपि नित्येति **प्राप्तम्।** तदाह **सूत्रे, वैश्वानरो नित्यः स्यात्।** नित्यैर्दधिग्रहादिभिः **समानसङ्ख्यत्वात्।** सङ्ख्यख्या बुद्धिः। नित्यतुल्यतया प्रतीयमानत्वादिति।

सिद्धान्तस्तु, ''यः पुमानभृत्वा चिनुते स निर्वपेत्'' इति कर्तृसमानाधिकृतयच्छब्दबलात् अभरणेष्ट्योर्निमित्तनैमित्तिकभावावभासान्नैमित्तिकीष्टिरिति।

फलन्तु, अग्नेरविनाशनिमित्तमिष्ट्यनुष्ठानम् ।

इति षष्ठं वैश्वानरस्य नैमित्तिकताधिकरणम् (सूत्रे ११-१२)

अथ सप्तमं षठ्याश्चितेर्नैमित्तिकताधिकरणम् (सूत्राणि १३-१७)

षट्चितिः पूर्ववत्स्यात् ॥ १३ ॥

(ताभिश्च तुल्यसंख्यानात् ॥ १४ ॥ अर्थवादोपपत्तेश्च ॥ १५ ॥ एकचितिर्वा स्यादपवृक्ते हि चोद्यते निमित्तेन ॥ १६ ॥ विप्रतिषेधात्ताभिः समानसंख्यत्वम् ॥ १७ ॥)

अत्र पूर्ववैषम्येण शङ्कनात्सङ्गतिः । ''य एवं विद्वानग्निं चिनुते'' इत्युक्ताग्नौ श्रूयते, ''संवत्सरो वा एनं प्रतिष्ठायै नुदते । योऽग्निं चित्वा न प्रतितिष्ठति । पञ्च पूर्वाश्चितयो भवन्ति । अथ षष्ठीं चितिं चिनुते'' इति ।

अस्यार्थः, लाङ्गलकृष्टे भूप्रदेशे नानाविधाभिरिष्टकाभिः पक्ष्याद्याकारेण स्थलं निष्पाद्यते । सैका चितिः । तादृश्यश्चितयस्तदुपरि पञ्च पूर्वाः क्रियन्ते । यस्त्वग्निं चित्वा प्रतिष्ठां न लभते स षष्ठीमपि चितिं कुर्यात् , प्रतिष्ठित्यर्थमित्यर्थः । तत्र पञ्चचितिकोऽग्निस्तावन्नित्यो न नैमित्तिकः । षष्ठी चितिरपि किं नित्या किं वा नैमित्तिकीति **सन्देहः** ।

पूर्वपक्षस्तु, षष्ठीति शब्दोऽन्यानपेक्षः सन् स्वार्थं यदि बोधयेत्तदा स्यान्नैमित्तिकता षष्ठचितेः । न चैवम् । ''तस्य पूरणे डट्'' इति षट्शब्दात् डटि प्रत्यये, ''षट्कतिकतिपयचतुरां थुक्'' इति डटि परे थुगागमे, ष्टुत्वे, ''टिड्ढाणञ्'' इत्यादिना ङीपि, षष्ठीति निष्पत्तेः पूरणप्रत्ययान्तोऽयं ''षण्णां पूरणी षष्ठी'' इति व्युत्पत्त्या पूर्वाः पञ्च चितीरपेक्षते । अन्यथा षट्संख्यापूरकत्वायोगात् । न हि केवला चितिः षष्ठीति वक्तुं शक्यते । तस्मात्पञ्चचितिवत्स्वयमपि नित्येति षट्चितिकोप्यग्निर्नित्यः । ''योऽग्निं चित्वेति वाक्यन्तु, पूर्वत्र विरोधाभावात् यच्छब्दबलेन निमित्तपरत्वोक्तावपीह षष्ठीति विधेयगतपूरणप्रत्ययविरोधाद्योपि न प्रतिष्ठार्हः सोऽपि षष्ठ्या चित्या प्रतितिष्ठतीति स्तुत्यर्थोऽर्थवाद एव । निमित्ततापरमिति । तदाह **सूत्रे, षट्चितिः पूर्ववत्** दधिग्रहवन्नित्यः **स्यादिति** ।

सिद्धान्तस्तु, ''प्राक् पञ्च चितयोऽभिहिताः। इदानीं षष्ठी चितिरभिधीयते'' इत्यभिधाना-पेक्षया षट्सङ्ख्यापूरणसम्भवेन पूरणप्रत्ययाविरोधात् '' योत्र न प्रतितिष्ठति असौ षष्ठी चितिं चिनुते '' इति कर्तृसमानाधिकृतयच्छब्देन पूर्वत्र यच्छब्देन संवत्सरभरणस्येव निमित्तत्वावगमात् षष्ठी चितिर्नैमित्तिकीति।

फलन्तु, प्रतिष्ठानिमित्तं षष्ठ्या अनुष्ठानं व्यक्तम्।

इति सप्तमं षठ्याश्रितेनैमित्तिकत्वाधिकरणम् (सूत्राणि १३-१७)

अथाष्टमं पिण्डपितृयज्ञस्यानङ्गताधिकरणम् (सूत्राणि १८-२०)

पितृयज्ञः स्वकालविधानादनङ्गं स्यात्॥ १८॥

(तुल्यवच्च प्रसंख्यानात्॥ १९॥ प्रतिषिद्धे च दर्शनात्॥ २०॥)

अत्रापि पूर्ववैषम्येण शङ्कनात्सङ्गतिः। ''अमावस्यायामपराह्णे पिण्डपितृयज्ञेन चरन्ति'' इति अनारभ्याधीतः पितृयज्ञः। स किं दर्शाङ्गं सत्तेन प्रयुज्यते , किं वा पुरुषार्थः सन् कल्पितफलेन प्रयुज्यत इति **सन्देहः**।

पूर्वपक्षस्तु, पूर्वत्र कर्तृसमानाधिकृतयच्छब्दवशेन वाक्यशेषस्थफलाङ्गीकारेऽपीह यच्छब्दवाक्यशेषयोरभावेन पुमर्थत्वे अश्रुतफलकल्पनाप्रसङ्गाद्दर्शत्रिकरूपकर्मवाचिना अमावास्यापदेन समभिव्याहारात्तदङ्गत्वमस्य युक्तम्। अमावास्यापदस्य कालसाधारण्येऽपि फलकल्पनाप्रसङ्गादिह कर्मवाचित्वमेव। ''न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मनः'' इति मनुस्मृतेश्च। अनाहिताग्नेः क्रत्वभावात् भवतु तस्य पुरुषार्थरूपत्वं तस्येति।

सिद्धान्तस्तु, अमावास्यापदस्य कर्मकालसाधारण्येऽपीह अपराह्णपदसामानाधि-करण्यात् कालवाचितैव ग्राह्या। काले निरपेक्षत्वेन कर्मणि तत्सम्बन्धसापेक्षत्वात् सापेक्षनिर-पेक्षयोर्निरपेक्षस्यैव ग्राह्यत्वाच्च। अतः कर्मसमभिव्याहाराभावान्न तदङ्गं पिण्डपितृयज्ञः। किन्तु फलकल्पनया पुरुषार्थ एव। स्मृतिस्तु दर्शाख्यामावास्याकाल एवाहिताग्निर्मासिकश्राद्धं कुर्यादित्येवंपरेति। तदाह **सूत्रे**, पितृयज्ञः अमावास्याख्य**स्वकाले विधानादनङ्गं** कर्मण इति।

फलन्तु, **पूर्वपक्षे** कुण्डपायिनामयने ''मासं दर्शपूर्णमासाभ्यां यजेत'' इति विहिते दर्शाख्ये कर्मणि नाम्ना तद्धर्मातिदेशात् पिण्डपितृयज्ञः कार्यः । **सिद्धान्ते** तु न कार्य इति ।

इत्यष्टमं पिण्डपितृयज्ञस्यानङ्गताधिकरणम् (सूत्राणि १८-२०)

अथ नवमं रशनाया यूपाङ्गताधिकरणम् (सूत्राणि २१-२३)

पश्वङ्गं रशना स्यात्तदागमे विधानात् ॥ २१ ॥

(यूपाङ्गं वा तत्संस्कारात् ॥ २२ ॥ अर्थवादश्च तदर्थवत् ॥ २३ ॥)

अत्रापि पूर्ववैषम्येण शङ्कनात्सङ्गतिः । ज्योतिष्टोमे श्रूयते ''त्रिवृ ता यूपं परिवीयाऽग्नेयं सवनीयं पशुमुपाकरोति'' इति । त्रिवृता त्रिरज्जुकया रशनया परिवीय संवेष्ट्येत्यर्थः । सेयं रशना किं पशुबन्धनार्थतया पश्वङ्गं सती पशुना प्रयुज्यते , किं वा यूपाङ्गं यूपेन प्रयुज्यत इति **सन्देहः** ।

पूर्वपक्षस्तु, यूपाङ्गत्वे यूपे रशनापरिव्याणे न दृष्टफलस्य कस्यचिल्लाभोऽस्ति । पश्वङ्गत्वे च पशुबन्धनरूपदृष्टफलं लभ्यते । एवञ्च पूर्वत्र अमावास्यापदमुख्यतानुरोधादगत्या अदृष्टफलकल्पनेऽपीह पशुबन्धनरूपदृष्टफलसम्भवे अदृष्टकल्पनायोगात् ''त्रिवृद्युक्तमाग्नेयं पशुमुपाकरोति'' इत्येवं पश्वङ्गमेव रशना । न यूपाङ्गम् । न च त्रिवृता यूपमिति तृतीयाद्वितीया-श्रुतिभ्यां यूपाङ्गत्वं प्रतीयत इति वाच्यम् । यूपे पशुबन्धनस्य चोदकप्राप्तेस्तदनुवादत्वादिति ।

तदाह **सूत्रे**, **रशना पश्वङ्गं स्यात्** । न चैवं त्रिवृतेति तृतीया यूपमिति द्वितीया चायुक्तेति शंक्यम् । **तदागमे** पशुबन्धनार्थाया अपि रशनायाश्चोदकेन यूपसम्बन्धावगमे सत्येव **विधानात्** अनुवादत्वसम्भवादिति ।

सिद्धान्तस्तु, यद्यत्र परिव्याणेन यूपे दृष्टं फलं न लभ्येत तदैवं स्यात् । लभ्यते चात्र यूपदार्ढ्यरूपं दृष्टं प्रयोजनम् । अतः श्रुते परिव्याणद्वारा यूपार्थत्वे सम्भवति रशनाया नाश्रुतपशुबन्धनार्थता फल्प्या । तथा च द्वितीययाऽवगतयूपार्थता परिव्याणस्य, तृतीयाश्रुत्या

रशनायाः परिव्याणशेषता च प्रतीयमाना न बाधिता भवति । तस्मात् चोदकपरिव्याणादिदमन्यत् परिव्याणान्तरं यूपार्थमिति । तदाह **सूत्रे, यूपाङ्गं वा तत्संस्कारादिति ।**

फलन्तु, एकयूपैकादशपशुकायां विकृतौ प्रतिपशु यूपे रशना बन्धनीया **पूर्वपक्षे । सिद्धान्ते तु,** एकादशिनः सवनीयविकारत्वेन अष्टमाद्यपादे **एकादशिनेषु सौत्यस्येति** नये वक्ष्यमाणत्वात् सवनीयस्य चोदकप्राप्तविशेषविहितरशनाद्वयवत्त्वादस्यापि यूपस्य रशनाद्वयमेवेति **भाष्ये** व्यक्तम् ।

इति नवमं रशनाया यूपाङ्गताधिकरणम् (सूत्राणि २१-२३)

अथ दशमं स्वरोः पश्वङ्गताधिकरणम् (सूत्राणि २४-२७)

स्वरुश्चाप्येकदेशत्वात् ॥ २४ ॥

(निष्क्रयश्च तदङ्गवत् ॥ २५ ॥ पश्वङ्गं वाऽर्थकर्मत्वात् ॥ २६ ॥ भक्त्या निष्क्रयवादः स्यात् ॥ २७ ॥)

पूर्वन्यायेनात्र **शङ्कनात्सङ्गतिः ।** अग्नीषोमीयपशौ श्रूयते ''यूपस्य स्वरुं करोति'' इति ''स्वरुणा पशुमनक्ति'' इति च । स्वरुस्वरूपमुक्तं **स्वरुस्त्वनेकनिष्पत्तेः** इति द्वितीयपादाद्यनये। तत्र **सन्देहः,** किं यूपार्थः स्वरुः । तस्य पश्वञ्जनं प्रतिपत्तिः । उत पश्वर्थः स्वरुः । तस्य यूपादुपादानमिति ।

पूर्वपक्षस्तु, यथा हि '' यूपं परिव्ययति '' इत्युत्पत्तिवाक्ये यूपाख्यशेषिणो लाभान्न पश्वङ्गता तथेहापि ''यूपस्य स्वरुं करोति'' इत्युत्पत्तिवाक्य एव यूपस्येति षष्ठीश्रुत्या ''चैत्रस्य गौः'' इत्यत्रेव तादर्थ्यप्रतीत्या शेषिणो लाभेन यूपार्थः स्वरुः । तस्य पश्वञ्जनं प्रतिपत्तिरिति । तदाह **सूत्रे, स्वरुश्चापि** यूपाङ्गमित्यनुवर्तते । **तदेकदेशत्वात्** यूपैकदेशत्वादिति ।

सिद्धान्तस्तु, स्वरुणा पशुं इति तृतीयाद्वितीयाश्रुतिभ्यां तयोरङ्गाङ्गिभावस्य स्पष्टमवगमात्, षष्ठ्याश्च सम्बन्धसामान्यवाचिन्या यूपच्छेदनजन्यतया तदवयवाभिप्रायेणोपपत्तेः, अञ्जनद्वारा पश्वङ्गं, पश्वञ्जनेन प्रयुक्तः स्वरुरिति । तदाह **सूत्रे , पश्वङ्गं वाऽर्थकर्मत्वादिति ।**

फलन्तु, यदैकस्मिन् यूपे एकादशपशवो नियुज्यन्ते तदैकस्येव पशोरञ्जनं **पूर्वपक्षे**। तावतापि प्रतिपत्तिसिद्धेः। **सिद्धान्ते तु** प्रतिपश्वञ्जनमिति। ननु **स्वरुस्त्वनेकनिष्पत्तेरि**त्यत्रैव अञ्जनसाधनत्वेनावगतस्य यूपोपलक्षितखादिरादिवृक्षादुपादानमित्युक्तत्वात् कथमत्र यूपाङ्गत्वचोद्यमिति चेत्। सत्यम्। तथापि यूपप्रातिपदिकस्य खादिरादिवृक्षे लक्षणा षष्ठ्याः पञ्चम्यर्थता च मुख्यार्थसम्भवे सत्ययुक्तेतीह आक्षिप्यत इत्याहुः।

इति दशमं स्वरोः पश्वङ्गताधिकरणम् (सूत्राणि २४-२७)

अथैकादशमाघारादीनामङ्गताधिकरणम् (२८-३७)

दर्शपूर्णमासयोरिज्याप्राधान्यमविशेषात्॥ २८॥

(अपि वाऽङ्गानि कानिचिद्येष्वङ्गत्वेन संस्तुतिः सामान्यो ह्यभिसंस्तवः॥ २९॥ तथा चान्यार्थदर्शनम्॥ ३०॥ अविशिष्टन्तु करणं प्रधानेषु गुणस्य विद्यमानत्वात्॥ ३१॥ नानुक्तेऽन्यार्थदर्शनम् परार्थत्वात्॥ ३२॥ पृथक्त्वे त्वभिधानयोर्निवेशः श्रुतितो व्यपदेशाच्च तत्पुनर्मुख्यलक्षणं यत्फलवत्त्वं, तत्सन्निनिधावसंयुक्तं तदङ्गं स्याद्भागित्वात्कारणस्याश्रुतश्चान्यसम्बन्धः॥ ३३॥ गुणाश्च नामसंयुक्ता विधीयन्ते नाङ्गेषूपपद्यन्ते॥ ३४॥ तुल्या च कारणश्रुतिरन्यैरङ्गाङ्गिसम्बन्धः॥ ३५॥ उत्पत्तावभिसम्बन्धस्तस्मादङ्गोपदेशः स्यात्॥ ३६॥ तथा चान्यार्थदर्शनम्॥ ३७॥)

अत्रापि पूर्वन्यायेन शङ्कनात्सङ्गतिः। दर्शपूर्णमासयोराघाराज्यभागप्रयाजानुयाजादयः कालसंयोगरहिताः केचन पठिताः। आग्नेयादयः षड्यागाः ''यदाग्नेयोष्टाकपालोऽमावास्याम्'' इत्यादिना कालसंयोगेन चोदिताः। तत्र किं सर्वेषां फलसम्बन्धेन प्राधान्यमुत कालयोगिनामेव। अन्येषां तदङ्गत्वमिति **सन्देहः**।

पूर्वपक्षस्तु, ''दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत'' इति फलवाक्यगतयजिना यागसामान्यवाचिना प्राकरणिकानामाघारादीनामग्नेयादीनाञ्च यागानामनुवादेन फलसम्बन्धो बोध्यते राजसूयेऽन्योन्यविलक्षणेपशुसोमानां यजिनाऽनुवादेन फलान्वयो यथा बोध्यते। तथैव पादादवुक्तेः। तद्वत् द्विवचनान्तनामधेयमपि राजसूयपदस्येवाख्यातपरतन्त्रत्वात्तद्वदेव

प्राकरणिकसर्वपरम्। अव्युत्पन्नप्रातिपदिकं द्विवचनान्तप्रतिरूपकं नेयम्। पूर्वत्र प्रथम-श्रुतषष्ठीस्वारस्यस्येव ''दर्शपूर्णमासाभ्यां'' इति प्रथमश्रुतद्विवचनस्वारस्यस्य त्यागसम्भवात्। तस्मात् सर्वेषां प्राधान्यम्।

तदाह सूत्रे, **दर्शपूर्णमासयोरिज्यानां सर्वयागानां प्राधान्यम्**। फलवाक्यस्थयजिना सर्वेषामविशेषेण फलसंबन्धबोधनादिति।

सिद्धान्तस्तु, राजसूयादिनामधेयमिवाप्रसिद्धार्थकं यन्नाम तद्व्याख्यानपरतन्त्रम्। इदं तु नामधेयं प्रसिद्धार्थकम्। प्रातिपदिकस्य प्रवृत्तिहेतुविचारे कालसंयुक्ताग्नेयादि-परताध्यवसायात्। द्विवचनस्यापि विद्वद्वाक्यसिद्धत्रिकत्रिकसमुदायाभिप्रायकत्वात्। अतः षड्यागानां समुदायद्वये प्रसिद्धं सदिदं नामधेयं सामान्यविषयमपि यजिं स्वविषये षड्यागमात्रेऽवस्थापयितुं शक्नोतीति षण्णामेव प्राधान्यम्। अन्येषां प्रकरणात्तदङ्गत्वमिति।

तदाह सूत्रे ॥ **अपि वा अङ्गानि कानिचिदित्यादि** ॥

फलन्तु, प्रयाजादीनां विकृतिषु नातिदेशः **पूर्वपक्षे**। प्रधानत्वात्। **सिद्धान्ते तु** अङ्गत्वादतिदेशः।

प्रकरणं तु पौर्णमास्यां रूपावचनादिति द्वितीयाध्यायद्वितीयपादीयनयेन ''य एवं विद्वान्'' इत्यादिविद्वद्वाक्यद्वयं फलवाक्योपात्तद्विवचनान्तप्रातिपदिकप्रसिद्ध्यर्थं कालयोगनिमित्तेन आग्नेयादित्रिकत्रिकसमुदायद्वयानुवादकमित्युक्त्या षण्णामेव प्राधान्यमन्येषां तदङ्गत्वमिति सिद्धावप्युक्तदिशा सर्वप्राधान्यमस्त्विवति पूर्वोक्ताक्षेपेणेह पूर्वपक्षप्रवृत्तिरित्याहुः।

इत्येकादशमाघारादीनामङ्गताधिकरणम् (सूत्राणि २८-३७)

अथ द्वादशं ज्योतिष्टोमे दीक्षणीयादीनामङ्गताधिकरणम् (सूत्राणि ३८-४०)

ज्योतिष्टोमे तुल्यान्यविशिष्टं हि कारणम् ॥ ३८ ॥

(गुणानां तूत्पत्तिवाक्येन सम्बन्धात्कारणश्रुतिः तस्मात्सोमः प्रधानं स्यात् ॥ ३९ ॥ तथा चान्यार्थदर्शनम् ॥ ४० ॥)

पूर्ववैषम्येणात्र शङ्कनात्सङ्गतिः । ''ज्योतिष्टोमेन स्वर्गकामो यजेत'' इत्यस्य प्रकरणे ऐन्द्रवायवग्रहादयः सोमयागाः, दीक्षणीयादयः काश्चिदिष्टयः, अग्नीषोमीयादिपशवश्चाम्नाताः। तत्र किमिष्टिपशुसोमानां सर्वेषां फलसम्बन्धेन प्राधान्यमुत सोमयागस्यैव। अन्येषां तदङ्गत्वमिति **सन्देहः** ।

पूर्वपक्षस्तु, नाम्नः प्रसिद्धार्थकत्वेन यजेस्तदनुरोधेऽपि ज्योतिष्टोमनाम्नोऽप्रसिद्धार्थत्वात् राजसूयन्यायेन सामान्यवाचियजिपरतन्त्रतैव युक्तेति सर्वेषामेव फलसम्बन्धेन प्राधान्यमिति।

तदाह **सूत्रे,** ज्योतिष्टोमे सर्वाणि यागकर्माणि **तुल्यानि** समप्रधानानि स्यु, । कुतः ? **कारणं** फलवाक्यस्थयजिपदरूपं **अविशिष्टं** यत इति ।

सिद्धान्तस्तु, ''त्रिवृत् पञ्चदशः सप्तदश एकविंशस्तानि वा व ज्योतींषि, य एतस्य स्तोमाः'' इति वाक्यशेषे ''य एतस्य'' इति यागस्य ''संख्याचतुष्टययुताः स्तोमाः तानि ज्योतींषि'' इति स्तोत्रीयाणामृचां ज्योतिश्शब्दार्थत्वमुक्त्वा तत्सम्बन्धिनि यागे ज्योतिष्टोमपदस्य ''ज्योतिर्नामकास्त्रिवृदादिसंख्याचतुष्टययुक्ताः स्तेमाः स्तोत्रीयाः मन्त्रा यस्मिन् स ज्योतिष्टोमः'' इति व्युत्पत्त्या नामधेयस्य स्पष्टताऽवगम्यते । ज्योतिर्नामकस्तोमवत्त्वञ्च सोमयाग एव सम्भवति । ''ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकुर्यात्'' इति स्तोमनिर्वर्त्यस्तोत्र-सम्बन्धस्यावगामात् । अतस्तस्यैव वाक्येन फलसम्बन्धबोधनात्तस्यैव प्राधान्यम् । अन्यस्य तु तदङ्गत्वमिति ।

फलन्तु पूर्वपक्षे, दीक्षणीयादीनां प्राधान्याद्विकृतिष्वनतिदेशः । **सिद्धान्ते** त्वङ्गत्वाददतिदेश इति ।

इति द्वादशं ज्योतिष्टोमे दीक्षणीयादीनामङ्गताधिकरणम् (सूत्राणि ३८-४०)

इति श्रीभाट्टसंग्रहे सर्वतन्त्रस्वतन्त्रश्रीसुधीन्द्रतीर्थगुरुपादशिष्य
श्रीराघवेन्द्रतीर्थयतिसार्वभौमकृते चतुर्थाध्यायस्य चतुर्थः पादः

अस्मिन् पादे	अधिकरणानि	१२	सूत्राणि	४०
आदितः	अधिकरणानि	३०७	सूत्राणि	७१६

अथ भाट्टसंग्रहे पञ्चमेऽध्याये प्रथमः पादः

अथ प्रथमं श्रुतिबलीयस्त्वाधिकरणम् (क्रमनियमाधिकरणम्)

पूर्वाध्याये प्रयोज्यकर्मणां निर्णये सति तदुपजीवी प्रयोज्यकर्मणां क्रमोऽत्राध्याये निरूप्यत इति पूर्वानन्तर्यमस्याध्यायस्य ज्ञेयम् । क्रमे च श्रुत्यर्थपठनस्थानमुख्यप्रवृत्तयः षट् प्रमाणानि । तेषां स्वरूपमग्रे व्यक्तम् ।

श्रुतिलक्षणमानुपूर्व्यं तत्प्रमाणत्वात् ॥ १ ॥

वेदे पदार्थानां यः क्रमो विहितः स एव क्रम आश्रयणीयः, उतानियम इति **सन्देहे,** वेदविहितक्रमानुसरणेन तदनुसन्धानव्यग्रतया प्रयोगप्राशुभावानापत्तेरनियतक्रमेण पदार्थानामनुष्ठानमिति **प्राप्ते,**

वेदस्याप्रवृत्तप्रवर्तकत्वरूपविधायकत्वोपेतत्वात् तादृशवेदविहितक्रमस्यानादरे वेदस्याननुष्ठापनलक्षणाप्रामाण्यापत्तेस्तद्विहित एव क्रम आश्रयणीय इति **सिद्धान्तः** ।

तदाह **सूत्रे, श्रुतिलक्षणं** वेदविहितमेव **आनुपूर्व्यं** क्रम आश्रयणीयः । कुतः ? **तत्प्रमाणत्वात्** वेदस्य प्रमाणत्वादिति ।

फलन्तु, प्रयोगप्राशुभावोऽपि प्रमाणप्राप्तक्रमविशेषानुसारेणैव कर्तव्य इति ।

वर्णकान्तरम्

वर्णकान्तरन्तु, क्रमः किं विधेयः ? उताविधेय इति **सन्देहः** ।

पूर्वपक्षस्तु, किं क्रमो यज्यादिवद्भावार्थत्वेन विधेयः, किं वा सोमादिवद्भावार्थविशेषण-त्वेन, अथ ' वायव्यं श्वेतम् ' इत्यादौ श्वेतादिवत् विधेयद्रव्यादिधर्मत्वेन । नाद्यद्वितीयौ । तदभावात् । तृतीयेऽपि किमेकैकपदार्थधर्मः क्रमः, किं वा पदार्थसङ्घातधर्मः । नाद्यः ।

एकैकपदार्थधर्मत्वेनाप्रतीतेः। नान्त्यः। । सङ्घातस्याविधेयत्वात्। अतो विध्यन्वयासंभवादविधेयः क्रम इति।

सिद्धान्तस्तु, क्रमस्य भावार्थत्वभावेन स्वरूपेण यज्यादेरिवाविधेयत्वेऽपि दध्यादिवत्क्रियाविशेषणत्वेन विधेयत्वं भविष्यति। तदा जुहोतीत्यादावक्रियारूपदध्यादिद्रव्यं क्रियाविशेषणं सद्विधीयते ''दधिसाधनकं होमं कुर्यात्'' इति। एवं ''अनेन क्रमेण चरुं कुयात् '' इति क्रमोपलक्षिताः पदार्था एव क्रियाविशेषणत्वेन विधीयन्ते। पदार्थानां प्रत्येकं क्रमभाक्त्वाभावेप्यन्योन्यं मिलिताः संयोगादिवद्वितितिरूपेण क्रमभाक्त्वमस्त्येवेति विधेय एव क्रमः।

तदाह **सूत्रे, आनुपूर्व्यं क्रमः श्रुतिलक्षणं** श्रुतिविधेयः। न च केनापि शब्देनानभिहितत्वेनानुपस्थिततत्वादविधेयतेति वाच्यम्। **तत्प्रमाणकत्वात्** त्त्वाप्रत्ययादिश्रुति-प्रमाणकत्वादिति।

फलन्तु, पूर्वपक्षे येन केनापि क्रेमणानुष्ठानसिद्धेरविहितस्यानङ्गत्वेन तद्वैगुण्येऽपि क्रतोरवैगुण्यात्क्रमाध्यायोऽनारभ्य इति। **सिद्धान्ते** विहितस्य क्रमस्य त्यागे क्रतोर्वैगुण्येन क्रमस्यावश्यकत्वात्त**न्निरूपणार्थं** क्रमलक्षणारम्भो युक्त इति।

तृतीयं वर्णकम्

तृतीयवर्णकन्तु, क्रमप्रमाणेषु श्रुत्यादिषु श्रुत्याऽत्र क्रम उच्यते। द्वादशाहे सत्रे श्रूयते ''अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति, तत उद्गातारम्, ततो होतारम्'' इत्यादि। एतच्च विवृतं तृतीये सप्तमपादे **नियमस्तु दक्षिणाभिरित्यधिकरणे**।

तत्र **सन्देहः**, किमत्र क्रमः श्रुतिप्रमाणकोऽथ पाठप्रमाणक इति। यदि दीक्षाविधिस्तदा पाठप्रमाणकः, यदि क्रमस्यैव विधिस्तदा श्रुतिप्रमाणक इति किमत्र विधीयत इति चिन्त्यते इति।

पूर्वपक्षस्तु, दीक्षयतीति दीक्षा प्रकृतिश्रुत्युक्ता विधिप्रत्ययस्य सन्निहिता। क्रमस्तु त्त्वाप्रत्ययान्ताऽख्यातान्तपदसमभिव्याहाररूपवाक्यलभ्यः। सन्निहितश्रुत्यर्थविधिसम्भवे वाक्यार्थविधिरन्याय्यः। तस्माद्दीक्षाणामेवात्र विधिः। तासां क्रमस्तु पाठादेव लभ्य इति।

सिद्धान्तस्तु, '' ये यजमानास्ते ऋत्विजः '' इति वचनेन ब्रह्मादिऋत्विजां यजमानत्वेन तेषां दीक्षायाश्चोदकप्राप्तत्वेनाविधेयत्वात्। क्रमस्य त्वनन्यलभ्यत्वाद्वाक्यार्थभूतोप्यन्यगत्या स एव विधेयः। यद्यपि पाठतः प्राप्तः क्रमस्तथापि कर्तव्यत्वेनाप्राप्त एव। एकदाऽनेकपदार्थानुष्ठाना-योगात्क्रमस्यापि कर्तव्यतया प्राप्तिरस्तीति चेदेवमपि क्रमविशेषस्याप्राप्तत्वाद्व्युत्क्रमेणा-प्यनुष्ठानस्य प्रसक्तेश्च। अतः क्रम एव विधेय इति।

तदाह **सूत्रे**, '' अध्वर्युर्गृहपति '' इत्यादौ **आनुपूर्व्यं श्रुतिलक्षणं** श्रुत्यवगम्यम्। **तत्प्रमाणत्वात्** विधेयान्तराभावेन क्रममात्र एव श्रुतेः प्रमाणत्वादिति।

फलन्तु श्रुतिलक्षणोऽयं क्रम इति ज्ञात्वाऽनुष्ठानमभ्युदयकारि, नान्यथेति वदन्ति।

इति प्रथमं श्रुतिबलीयस्त्वाधिकरणम् (क्रमनियमाधिकरणम्)

अथ द्वितीयं क्रमस्य क्वचिदार्थिकत्वाधिकरणम्

अर्थाच्च॥ २॥

पूर्ववैषम्येण शङ्कनात्सङ्गतिः। ''अग्निहोत्रं जुहोति'' ''यवागूं पचति'' इत्यत्र होमयवागूपाकयोः किं क्रमानियमः, किं वा पूर्वं पाकस्ततो होम इति नियम इति **सन्देहे**, पूर्वत्रेवेह श्रुतिरूपनियामकप्रमाणाभावात्पाकहोमविध्योस्तावन्मात्रे विधिपर्यवसानान्नात्र क्रमविधिरित्यनियम इति **प्राप्ते**,

यवाग्वा होमद्रव्यत्वं तावत् ''यवाग्वा अग्निहोत्रं जुहोति'' इति तृतीययाऽवगम्यते। न च होमानन्तरं क्रियमाणो यवागूपाकोऽर्थवान्। न वा यवागूद्रव्येण विना होमनिष्पत्तिरस्ति। तस्मात्पक्त्वा होमः कार्य इति **सिद्धान्तः**।

तदाह सूत्रे अर्थाच्चेति । आनुपूर्व्यमित्यस्ति । न केवलं श्रुतिलक्षणम् । किन्त्वर्थात् क्रतुनिर्वृत्तिरूपप्रयोजनवशाच्चाऽनुपूर्व्यं गम्यत इत्यर्थः ।

फलन्तु, होमार्थं यवागूपाकः पूर्वमनुष्ठेय इति ।

इति द्वितीयं क्रमस्य क्वचिदार्थिकत्वाधिकरणम्

अथ तृतीयं क्रमस्य क्वचिदनियमाधिकरणम्

अनियमोऽन्यत्र ॥ ३ ॥

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः । दर्शपूर्णमासप्रकरणे यजमानकाण्डे पञ्चप्रयाजानामनुमन्त्रणमन्त्राः क्रमेण पठिताः ''वसन्तमृतूनां प्रीणामि । स मा प्रीतः प्रीणातु । ग्रीष्ममृतूनां प्रीणामि । स मा प्रीतः प्रीणातु'' इत्यादि तैत्तिरीयशाखायाम् । शाखान्तरे च ''एको ममैको तस्य, योऽस्मान् द्वेष्टि यं च वयं द्विष्मः'' ''द्वौ मम द्वे तस्य, योऽस्मान् द्वेष्टि यं च वयं द्विष्मः'' इत्यादि । तत्र शाखाद्वयाम्नातानामपि मन्त्राणामदृष्टार्थत्वात्समुच्चयोऽङ्गीकृतः । तत्र येन यजमानेन तैत्तिरीयगतेन ''वसन्तमृतूनां प्रीणामि '' इत्यनेन प्रथममनुमन्त्रितः, पश्चाच्च ''एको मम'' इत्यनेनानुमन्त्रितस्तेन यजमानेन तनूनपादपि द्वितीयः प्रयाजः तैत्तरीयगतेनैव ''ग्रीष्ममृतूनाम्'' इत्यनेनानुमन्त्र्य पश्चाच्छाखान्तरगतेन ''द्वौ मम'' इत्यनेनानुमन्त्रणीय इति नियमः , उत ''द्वौ मम'' इत्यनेनापि प्रथममनुमन्त्र्य पश्चात् ''ग्रीष्ममृतूनां प्रीणामि'' इत्यनेनानुमन्त्रयितुं शक्यत इत्यनियम इति सन्देहः ।

पूर्वपक्षस्तु, पूर्वत्र यथा प्रयोजनवशात्क्रमस्तथात्रापि श्रुत्यर्थपाठादिप्रमाणाभावेऽपि प्राजापत्यपशुषु यस्य पशोः पूर्वमुपाकरणं तस्यैव पूर्वं नियोजनादीति वक्ष्यमाणप्रमाणप्रवृत्ति-क्रमरूपप्रमाणादस्तु पूर्वोक्ता नियमकोटिरिति प्राप्ते,

पश्वङ्गानामुपाकरणादीनां प्रयोगवचनावगतान्योन्यप्रत्यासत्त्यनुग्रहाय प्रवृतिक्रमाश्र-यणेपीहैकशाखागतानुमन्त्रणमन्त्राणां न प्रत्यासत्तिबोधकमानमस्ति । तेषां भिन्नभिन्नप्रयाजा-ङ्गत्वेनैकत्र समावेशाभावात् । तस्मान्नियामकाभावादनियम इति सिद्धान्तः ।

तदाह सूत्रे, अन्यत्र श्रुत्यादिनियामकहीनस्थले अनियम इति। फलन्त्वनियमेनानुमन्त्रणम्।

इति तृतीयं क्रमस्य कचिदनियमाधिकरणम्

अथ चतुर्थं क्रमस्य कचित्पाठानुसारिताधिकरणम् (पाठक्रमन्यायः सूत्राणि ४-७)

क्रमेण वा नियम्येत क्रत्वेकत्वे तद्गुणत्वात् ॥ ४ ॥

(अशाब्द इति चेत्स्याद्वाक्यशब्दत्वात् ॥ ५ ॥ अर्थकृते वाऽनुमानं स्यात् , क्रत्वेकत्वे परार्थत्वात् स्वेन त्वर्थेन सम्बन्धस्तस्मात्स्वशब्दमुच्येत ॥ ६ ॥ तथा चान्यार्थदर्शनम् ॥ ७ ॥)

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः। दर्शपूर्णमासयोः ''समिधो यजति'' ''तनूनपातं यजति'' ''इडो यजति'' ''बर्हिर्यजति'' ''स्वाहाकारं यजति'' इति क्रमेण पठितानां पञ्चप्रयाजानामनियमेनानुष्ठानमुत पाठक्रमेणेति सन्देहे,

पूर्वत्रेव श्रुत्यर्थादिरूपक्रमनियामकप्रमाणाभावात्पाठक्रमस्य च प्रमाणधर्मत्वेन स्वयमप्रमाणत्वेनाविधायकत्वात्, यजतीत्याख्यातानाञ्च समिदादिपदार्थमात्रविधिपर्यवसानादनियमेनानुष्ठानमिति प्राप्ते,

सिद्धान्तः, अनुष्ठानक्रमो हि पदार्थावगतिक्रमाधीनः। तत्क्रमश्च वाक्यावगतिक्रमाधीनः। तत्क्रमश्च पाठक्रमाधीन इति भवति पाठक्रमादप्यनुष्ठानक्रमः। पाठक्रमादध्ययनकाले जातपदार्थप्रतिपत्तिक्रमस्यानुष्ठानकालेऽननुवृत्तावप्यध्ययनकालीनक्रमानुभवजन्यस्मरणानां क्रमभाविनां सम्भवात्। स्वाध्यायविधिविहितश्च क्रमो विध्यवस्थायामननुपयुक्तोऽपि स्मृतिकाल उपयुज्यत इति यथापाठक्रममनुष्ठाननियम इति।

तदाह सूत्रे, क्रत्वेकत्वे क्रतोरेकत्वे, कर्तृरप्येकत्वात् क्रमाकांक्षायां पाठक्रमेणैवानुष्ठानक्रमो नियम्येत। कुतः ? तद्गुणत्वात् पाठक्रमस्य अननुष्ठानक्रमार्थत्वादिति।

फलन्तु क्रमेणानुष्ठानम् ।

इति चतुर्थं क्रमस्य क्वचित्पाठानुसारिताधिकरणम् (पाठक्रमन्यायःसूत्राणि ४-७)

अथ पञ्चमं क्रमस्य क चित्प्रथमप्रवृत्त्यनुसारिताधिकरणम् (प्रावर्तिकक्रमन्यायः सूत्राणि ८-१२)

प्रवृत्त्या तुल्यकालानां गुणानां तदुपक्रमात् ॥ ८ ॥

(सर्वमिति चेत् ॥ ९ ॥ नाकृतत्वात् ॥ १० ॥ क्रत्वन्तरवदिति चेत् ॥ ११ ॥ नासमवायात् ॥ १२ ॥)

पूर्वत्रैवात्र क्रमनियमे श्रुत्याद्यन्यतमप्रमाणाभावादनियम इति शङ्कनात्सङ्गतिः । वाजपेये ''सप्तदश प्राजापत्यान् पशूनालभते'' इति श्रुतम् । ते च पशवः 'वैश्वदेवां कृत्वा प्राजापत्यैश्चरन्ति'' इति एककालकर्तव्यतया चोदिता इति सह क्रियन्ते । तत्राऽरादुपकारकाणां प्रयाजादीनां सकृदनुष्ठानेऽपि न सन्निपातिनां इति **सन्निपाते प्रधानानां** इत्येकादशे वक्ष्यमाणतयोपाकरणादयः सन्निपातित्वात्प्रतिपश्वावर्तनीयाः । तेषाञ्चावृत्तिरेकस्मिन् पशौ कात्स्न्र्येन कृत्वाऽन्यस्यापि तथैव क्रियन्त इति न भवति । किन्तु सर्वेषामुपाकरणं कृत्वा ततो नियोजन-मित्येवमुत्तरपादीयाद्यनये वक्ष्यते । तत्रास्मिन् पशावादावुपाकरणमुपक्रम्यास्मिन् पशौ समाप्यमित्यत्र नियामकप्रमाणाभावादिच्छया यत्र क्व च पशावुपाकरणमुपक्रम्य सर्वेषु तत्कृत्वा क्वचित् पशौ समाप्यत इति स्थितिः । तत्र नियोजनादिसंस्कारेषु **सन्देहः**, येन क्रमेणोपाकरणं प्रवृत्तं तेनैव क्रमेण नियोजनादिकं कार्यमुतानियम इति । तेनैव क्रमेण नियोजनादि कार्यमित्यत्र श्रुत्यर्थपाठेष्वन्यतमस्यापि प्रमाणस्याभावान्नस्ति नियम इति **प्राप्ते**,

सिद्धान्तः, एकैकस्य पशोरुपाकरणादयः संस्काररूपाः प्रयोगवचनानुसारात्प्रत्यासन्नाः कार्याः । तत्राद्यपशावनुष्ठितोपाकरणस्यान्यपशुसम्बन्धिभिः षोडशभिरुपाकरणैर्व्यवधानं ''प्राजापत्यैश्चरन्ति'' इति पशुसाहित्यवचनात्सह्यमपि । पश्वन्तरेषु नियोजनं कृत्वा पश्चादुपक्रान्तपशौ नियोजने कृते तत्रानुष्ठितस्योपाकरणस्यातिव्यवधानं स्यात् । तच्च प्रयोगविध्य-

वगतप्रत्यासत्तिभङ्गापातादसह्यम् । उपाकरणे प्रवृत्त्या बुद्धिस्थक्रमस्य त्यागे कारणञ्च नेति येन क्रमेणोपाकरणं तेनैव यूपे नियोजनादीति व्रवृत्तिक्रम एव नियोजनाद्यनुष्ठानक्रमे मानमिति।

तदाह **सूत्रे, तुल्यकालानाम्** एकस्मिन् काले विहितानां **गुणानां** उपाकरणादीनां क्रमः **प्रवृत्त्यिा** नियम्येत । कुतः ? **तदुपक्रमात्** प्रवृत्तिक्रमस्य प्रत्यासत्त्यनुग्रहाय प्रयोगविधिनोपक्रमादुपसंग्रहादिति ।

फलन्तु, उपाकरणक्रमेण नियोजनादीति व्यक्तम् ।

इति पञ्चमं क्रमस्य क्वचित्प्रथमप्रवृत्त्यनुसारिताधिकरणम् (प्रावृर्तिकक्रमन्यायः सूत्राणि ८-१२)

अथ षष्ठं क्रमस्य क्वचित्स्थानानुसारिताधिकरणम्

स्थानाच्चोत्पत्तिसंयोगात् ॥ १३ ॥

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः । साद्यस्क्राख्यः कश्चित्सोमयागः । स च ज्योतिष्टोमप्रकृतिकत्वात्ततश्चोदकप्राप्तत्रिपशुकः । तच्च पशुत्रयं "सह पशूनालभते" इति वचनात्सह क्रियते । सहकरणञ्च सवनीयस्थान एवेति तृतीयान्त्यपादीयोपान्त्याधिकरणे **तत्काले वा लिङ्गदर्शनादित्यत्र** स्थितम् । तत्र चोदकप्राप्तोपाकरणादयः प्रतिपशुकर्तव्यतया पूर्वोक्तदिशा प्राप्ताः । तत्रोपाकरणं किमनियमेन यत्र क्व च पशावादौ कार्यमुत अग्नीषोमीयपशावादावथ सरनीयपशाविति त्रेधा **सन्देहः** ।

पूर्वपक्षस्तु, यथा हि पूर्वत्र प्राजापत्यपशुषूपाकरणमादावत्रैव पशाविति नियामकाभावादिच्छया यत्र क्व च पशौ कतं तथेहापि सहाऽलभ्येष्वग्नीषोमीयसवनीयानुबन्ध्याख्यपशुष्वप्यादावत्रैवेत्यत्र नियामकाभावादनियम **इत्येकः** ।

यथा हि पूर्वत्र प्राजापत्यपशुषु प्रवृत्त्या नियोजनादिनियमस्तथात्रापि प्रकृतावग्नीषोमीयपशावादावुपाकरणानुष्ठानस्य दर्शनात्तस्यैव नियमामकत्वात्प्रकृतिगतप्रवृत्त्या अग्नीषोमीयपशावादावुपाकरणमित्यन्यः ।

सिद्धान्तस्तु, सवनीयपशुर्हि ''आश्विनं ग्रहं गृहीत्वा आग्नेयं सवनीयं पशुमुपाकरोति'' इति स्वस्थान एवाश्विनग्रहसमीपे वर्तते। अन्यौ तु पशुसहालम्भवचनात्सवनीय पशुस्थाने प्राप्तौ। तथा चाऽश्विनग्रहानन्तरं सवनीयपशुरेवोपस्थाप्यते । प्रकृतौ तदानन्तर्यस्य क्लृप्तत्वात् । ततः सवनीयस्य प्राथम्ये स्थानान्निश्चिते स्थानभ्रष्टयोरग्नीषोमीयानुबन्ध्ययोः प्रकृताविव यथाक्रमं पौर्वापर्यमिति।

तदाह **सूत्रे**, सवनीय आदावनुष्ठेयः । **स्थानात्** तस्य आश्विनग्रहानन्तरस्थानत्वात् । तस्य तत्कालता च ''आश्विनं ग्रहं गृहीत्वा'' **इत्युत्पत्तावेव** तेन कालेन **संयोगादिति** ।

फलन्तु सवनीयस्यादावनुष्ठानं व्यक्तम् ।

इति षष्ठं क्रमस्य क्वचित्स्थानानुसारिताधिकरणम्

अथ सप्तममङ्गक्रमस्य मुख्यक्रमानुसारिताधिकरणम्

मुख्यक्रमेण वाऽङ्गानां तदर्थत्वात् ॥ १४ ॥

पूर्ववैषम्येणात्र शङ्कनात्सङ्गतिः । चित्रायागे सप्तानां हविषां मध्ये चतुर्थपञ्चमे समाम्नायेते ''सारस्वतौ भवतः। एतद्वै दैव्यं मिथुनं यत्सरस्वती सरस्वांश्च'' इति। ''सरस्वती च सरस्वांश्च'' इति विगृह्य समसे कृते '' पुमान् स्त्रिया '' इत्येकशेषे सरस्वन्ताविति भवति। ते देवते ययोर्यागयोस्तौ सारस्वतौ यागौ। एतच्च मिथुनमिति वाक्यशेषादवसीयते। तयोर्यागयोर्निर्वापादयश्चोदकतः प्राप्ताः। तत्र निर्वापः किमनियमेन कर्तव्य उत स्त्रीदैवत्यं पूर्वं निरूप्य पश्चात्पुंदैवत्यं निर्वप्तव्यमिति **सन्देहे**,

पूर्वत्र सवनीयपशोः प्रकृताविव विकृतावपि साद्यस्क्रे आश्विनान्तर्यरूपस्वस्थानत्वेना अश्विनग्रहानन्तरं तस्यैवोपस्थित्या तस्मिन्नेवादावुपाकरणानुष्ठानेपीह स्त्रीदैवत्यस्य पुंदैवत्यस्य वा आदौ निर्वाप इत्यत्र पूर्वोक्तश्रुत्यर्थपाठस्थानादिप्रमाणेषु कस्याप्यभावादनियम इति **प्राप्ते**,

सिद्धान्त्यते, होत्रकाण्डे स्त्रीदेवतायाः पूर्वं याज्यानुवाक्ये समाम्नाते ''प्र णो देवी सरस्वती'' इति । पश्चात्पुंदेवतायाः ''पीपिवांसंसरस्वतः'' इति । तेन याज्यानुवाक्याक्रमेण

स्त्रीदैवत्ययागस्य प्राथम्यावगतेः, धर्माणां मुख्ययागार्थत्वात्, मुख्यशब्दितप्रधानक्रमेणैव क्रमे नियते सति स्त्रीयागस्यैव मुख्यस्य पूर्वं निर्वापः कार्य इति।

तदाह **सूत्रे**, **मुख्यस्य क्रमेणैव** प्रधानक्रमेणैवाङ्गानां क्रमः। कुतः ? **तदर्थत्वात्ते**षां प्रधानार्थत्वेन प्रधानप्रत्यासत्त्यवश्यंभावादिति।

फलन्तु, सरस्वतीदैवत्यस्य प्राङ् निर्वाप इति व्यक्तम्।

इति सप्तममङ्गक्रमस्य मुख्यक्रमानुसारिताधिकरणम्

अथाष्टममङ्गेषु मुख्यक्रमापेक्षया पाठक्रमस्य बलवत्त्वाधिकरणम्

प्रकृतौ तु स्वशब्दत्वाद्यथाक्रमं प्रतीयेत ॥ १९ ॥

एवं श्रुत्यर्थपाठस्थानमुख्यप्रवृत्तिरूपैः षड्भिः प्रमाणैः पदार्थानां क्रमे निरूपिते सतीदानीं ''श्रुत्यर्थपठनस्थानमुख्यप्रवृत्तीनां समवाये परदौर्बल्यं'' इति न्यायरत्नमालाद्युक्त्या तेषां विरोधे बलाबलमितः परं चिन्त्यते। तदुक्तं **तन्त्ररत्ने** ''क्रमप्रमाणेषु बलाबलं चिन्त्यते'' इति। तत्रादौ पाठक्र ममुख्यक्रमयोर्विरोधे पाठक्रमस्य मुख्यक्रमात्प्राबल्यमुच्यते। पूर्वत्र मुख्यक्रमात्क्रम इत्युक्ताविहापि तथैव स्यादिति शङ्कनात्पूर्वानन्तर्यमस्य ज्ञेयम्। दर्शपूर्णमासप्रकरणे उपांशुयाज आज्यहविष्कः, पुरोडाशद्रव्यकोऽग्नीषोमीययागश्चाम्नातः। आज्यस्य धर्मा उत्पवनचतुर्गृहीत-त्वादयः। पुरोडाशधर्मा निर्वापावघातादयः। एते च धर्मा आज्यधर्मेभ्यः पूर्वमाम्नाताः। तत्र किं पाठक्रमा त्पुरोडाशधर्माः पूर्वमनुष्ठेया उत मुख्यक्रमादाज्यधर्मा इति **सन्देहे,**

पूर्वोक्तदिशा मुख्यसम्बन्धिद्रव्यधर्माणामनुष्ठानस्य प्राप्तत्वादाज्यधर्माणां प्राथम्यमिति **प्राप्ते,**

मुख्यक्रमात्पाठक्रमस्य प्राबल्यात्पुरोडाशधर्मा निर्वापादय एव पूर्वं कार्या इति **सिद्धन्तः**। तदाह **सूत्रे**, **प्रकृतौ** प्रकृतियागे **यथाक्रमं** यथापाठक्रममङ्गानां क्र मः **प्रतीयेत**। कुतः ? स्वशब्दत्वात् पाठक्रमस्य प्रत्यक्षत्वादिति। पाठक्रमस्य प्राबल्यं मुख्यक्रमस्य दौर्बल्यञ्च

शीघ्रमन्थरत्वाभ्यां ध्येयम् । मुख्ययोः क्रमं केनापि प्रमाणेन प्रथमं ज्ञात्वा अङ्गाङ्गिनोः साहित्यसम्पत्तये अङ्गेषु कल्प्यमानः क्रमो विलम्ब्यते । पाटतस्त्वन्यानपेक्षतया अङ्गानामेव क्रमोऽवधार्यत इति ।

फलन्तु, निर्वापाद्यौषधधर्माणां पूर्वमनुष्ठानम् ।

इत्यष्टममङ्गेषु मुख्यक्रमापेक्षया पाठक्रमस्य बलवत्त्वाधिकरणम्

अथ नवमं ब्राह्मणपाठान्मन्त्रपाठस्य बलीयस्त्वाधिकरणम्

मन्त्रतस्तु विरोधे स्यात्प्रयोगरूपसामर्थ्यादुत्पत्तिदेशः सः ॥ १६ ॥

पूर्वन्यायेन शङ्कनाद्वा, पूर्वत्र मुख्यक्रमपाठक्रमयोर्बलाबलचिन्ता अत्र पाठयोरेव बलाबलचिन्तेति वा **सङ्गतिः** । अग्नीषोमीययागस्तैत्तिरीये द्वितीयकाण्डे पञ्चमप्रपाठके द्वितीयानुवाके पठितः ''ताभ्यामेतमग्नीषोमीयमेकादशकपालं पौर्णमासे प्रायच्छत्'' इति । आग्नेययागस्तु षष्ठे प्रपाठके तृतीयानुवाके समाम्नातः ''यदाग्नेयोऽष्टादशकपालोऽमावास्यायाञ्च पौर्णमास्याञ्चाच्युतो भवति'' इति । एतच्च विधायकं वाक्यद्वयं धात्वर्थस्य यागस्य साधनत्वेन विनियोजकत्वाद्ब्राह्मणमित्युच्यते । होतृकाण्डे हि ''अग्निर्मूर्धा दिवः'' इत्यादिके आग्नेययाज्यानुवाक्ये प्रथममाम्नते । पश्चात् ''प्रजापते न त्वदेतान्यन्यः'' इत्युपांशुयाज-याज्यानुवाक्ये । तदनन्तरम् ''अग्नीषोमा सवेदसा'' इत्यादिके अग्नीषोमीययाज्यानुवाक्ये पठिते ।

तत्र **सन्देहः** किं ब्राह्मणवाक्यक्रमादग्नीषोमीयस्य प्राथम्यं प्रकल्प्य मुख्यक्रमान्मन्त्रपाठक्रमं बाधित्वा याज्यानुवाक्ययोः क्रमः कल्प्यः , किं वा मन्त्रपाठक्रमाद् याज्यानुवाक्ययोः प्रथमं क्रमं कल्पयित्वा पश्चात्पाठक्रमाद्ब्राह्मणक्रमस्य बाध इति ।

पूर्वपक्षस्तु, विधिवाक्ये कर्मोत्पत्तिवेलायामेव विधिवाक्यपाठक्रमानुरोधेन क्रमस्यावगमोऽस्ति । मन्त्रपाठक्रमस्तु कर्मसूत्पन्नेषु तत्र विनियुक्तेषु मन्त्रेषु पश्चाज्ज्ञायत इति पूर्वत्रेव शीघ्रप्रवृत्तब्राह्मणक्रमानुरोधादेव मन्त्रक्रमः कल्पनीय इति ।

सिद्धान्तस्तु, उत्पत्तावेव विधिवाक्यक्रमात्कर्मणां क्रमावगतावपि तदानीन्तनावगमो नानुष्ठानोपयोगी । तावत्कालमनवस्थितेः । किन्त्वनुष्ठेयपदार्थस्मृतिक्रमादेवानुष्ठानक्रमः । तत्स्मृतिक्रमश्च स्मारकक्रमात् । ततश्च पूर्वो मन्त्रः प्रयुक्तः स्वोत्तरं मन्त्रं स्मारयति । स चोत्तरो मन्त्रः स्वार्थमुत्तरपदार्थमित्यनुष्ठानकालीनपदार्थस्मृतौ मन्त्रपाठक्रमः सन्निकृष्यते । ब्राह्मणपाठक्रमस्तु तत्र विप्रकृष्यत इति मन्त्रक्रमेणैवानुष्ठानमिति ।

तदाह **सूत्रे**, **विरोधे** पाठद्वयविरोधे **मन्त्रतः** क्रमनियमः स्यात् । कुतः ? **प्रयोगरूपे** प्रयुज्यमानपदार्थनिरूपणे स्मरणे । **सामर्थ्यात्** । न च विधीनामस्ति तत्र सामर्थ्यमिति वाच्यम् । **उत्पत्तिदेशः** उत्पत्तिं केवलं देशयति बोधयति इति कृतार्थत्वात्तस्य न स्मारकत्वकल्पनेति ।

फलन्तु, मन्त्रपाठक्रमानुरोधेनानुष्ठानमिति व्यक्तम् ।

इति नवमं ब्राह्मणपाठान्मन्त्रपाठस्य बलीयस्त्वाधिकरणम्

अथ दशमं प्रयोगवचनाचोदकस्य बलीयस्त्वाधिकरणम् (सूत्रे, १७-१८)

तद्वचनात्तु विकृतौ यथाप्रधानं स्यात् ॥ १७ ॥

(विकृतौ वा प्रकृत्यन्वयाद्यथाप्रकृति ॥ १८)

पूर्ववैषम्येणात्र शङ्कनात्सङ्गतिः । अध्वरकल्पाख्येष्टौ त्रीणि हवींषि श्रूयन्ते ''अग्नावैष्णवमेकादशकपालं निर्वपेदभिचरन्, सरस्वत्याज्यभागा स्यात्, बार्हस्पत्यश्चरुः'' इति । तत्र सारस्वत उपांशुयाजविकारः । आज्यद्रव्यकत्वात् । ओषधद्रव्यकत्वैकदैवत्यत्वाभ्यां बार्हस्पत्य आग्नेयविकृतिः । तत्र किमाज्यधर्माः पूर्वमनुष्ठेया उत बार्हस्पत्यचरुधर्मा इति **सन्देहः** ।

पूर्वपक्षस्तु, युक्तं पूर्वत्र प्रकृतौ विधिक्रमस्य मन्त्रक्रमाद्बाधेन विधिपाठक्रमानुरोधन अङ्गानामननुष्ठानम् । इह तु तादृशविरोधाभावाद्विधिक्रमेणैवाङ्गप्रधानसाहित्यबोधकप्रयोग-विध्यनुग्रहायाङ्गानामनुष्ठानं स्यात् । मुख्यक्रमेणैव धर्माणां क्रमस्योक्तत्वादिति ।

तदाह **सूत्रे**, **विकृतौ** धर्मानुष्ठानं **यथाप्रधानं** प्रधानक्रमानुसारेण **स्यात्**। कुतः ? तेषां धर्माणां **तद्वचनात्** प्रधानविधिविधेयत्वादिति।

सिद्धान्तस्तु, धर्मा हि नात्रोपदेशतः श्रुताः। किन्तु अतिदेशत उपांशुयाजादितश्चोदकेन प्रापितेष्वङ्गेषु पश्चात्क्रमचिन्ता। चोदकप्राप्तिवेलायामेव सक्रमका एव प्राप्यन्त इति पुनः क्रमे नैराकांक्ष्यात्, प्राकृतक्रमानुरोधेन चरुधर्माः पूर्वमनुष्ठेयाः। पश्चादाज्यधर्मा इति।

फलन्तु, प्राकृतक्रमानुरोधेनाङ्गानामनुष्ठनम्।

इति दशमं प्रयोगवचनाचोदकस्य बलीयस्त्वाधिकरणम् (सूत्रे १७-१८)

अथैकादशं विकृतौ क्वचित्प्रकृतिधर्माननतिदेशाधिकरणम् (साकमेधीयन्यायः सूत्राणि १९-२२)

विकृतिः प्रकृतिधर्मत्वात्तत्काला स्याद्यथाशिष्टम्॥ १९॥

(अपि वा क्रमकालसंयुक्ता सद्यः क्रियेत तत्र विधेरनुमानात्प्रकृतिधर्मलोपः स्यात्॥ २०॥ कालोत्कर्ष इति चेत्॥ २१॥ न तत्सम्बन्धात्॥ २२॥)

पूर्ववैषम्येणात्रापि शङ्कनात्सङ्गतिः। चातुर्मास्येषु साकमेधाख्ये तृतीये पर्वणि श्रूयते ''अग्नयेऽनीकवते प्रातरष्टाकपालं निर्वपेत्, मरुद्भ्यः सान्तपनेभ्यो माध्यन्दिने चरुम्, मरुद्भ्यो गृहमेधिभ्यः सर्वासां दुग्धे सायमोदनम्'' इति। ता एतास्तिस्र इष्टयो द्व्यहकालीना उत सद्यस्काला इति **सन्देहः**।

पूर्वपक्षस्तु, **दर्शपूर्णमासपकृतौ हि पूर्वेद्युः** पर्वण्यन्वाधानादिकं , परद्युः प्रतिपद्दिने त्विष्टिरिति द्व्यहकालीनता दृष्टा। सा च चोदकतोत्र प्राप्तेत्येतासामपीष्टीनां द्व्यहकालता स्यात्। पूर्वत्रेवेह विधिविरोधाभावात्। प्रातरादिकालस्याहर्द्वयेपि सम्भवात्। तथा च पूर्वेद्युः प्रातरादिस्वस्वकालेषूपक्रमः। परेद्युः प्रातरादिस्वस्वकालेषु समापनमिति।

तदाह **सूत्रे**, अनीकवदादिविकृतिः **यथाशिष्टं** यथातिदेशं **तत्काला स्यात्** प्रकृताविव द्व्यहकाला स्यात्। कुतः ? **प्रकृतिधर्मत्वात्** प्रकृतितो धर्मग्राहित्वादिति।

सिद्धान्तस्तु, स्यादेवं यद्यत्राङ्गप्रधानयुक्तभावनोद्देशेन कालो विधीयेत तदोद्देश्यभावनागतमङ्गसाहित्यमविवक्षितं स्यात्। न त्वेवम्। काल एव तादृशी भावना विधीयते। अतोऽतिदेशतः प्रबलोपदेशरूपविधिवाक्यावगताङ्गसाहित्यविरोधान्न चोदकप्राप्तद्व्यहकालता युक्ता। उक्तरूपविशिष्टभावनोद्देशेन प्रातरादिकालविधावपि कालो न साक्षाद्भावनाङ्गम्। किन्तु प्रयोगद्वारा। ततश्च कर्मणि चिकीर्षिते प्रयोगाय कालः संगृह्यते। चिकीर्षा च साङ्गप्रधानभावनायामेव। तादृश्या एव फलं प्रति पर्याप्तत्वात्। अतः सर्वदा चिकीर्षायां संगृह्यमाणः प्रातरादिकालो विशेषाग्रहात्तन्त्रेणाङ्गप्रधानरूपसर्वार्थः स्यादित्येककालतैव युक्ता। न द्व्यहकालतेति।

फलन्तु, अङ्गैः सहेष्टीनामेकैकशः स्वस्वकालेऽनुष्ठानम्।

इत्येकादशं विकृतौ कचित्प्रकृतिधर्मातिदेशाधिकरणम् (साकमेधीयन्यायः सूत्राणि १९-२२)

अथ द्वादशमनुयाजाद्युत्कर्षप्रयाजान्तापकर्षाधिकरणम् (तदादितदन्तन्यायः सूत्रे २३-२४)

अङ्गानां मुख्यकालत्वाद्यथोक्तमुत्कर्षः स्यात्॥ २३॥

(तदादि वाऽभिसम्बन्धात्तदन्तमपकर्षो वा स्यात्॥ २४॥)

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः। अग्नीषोमीयपशौ प्रयाजानामपकर्षः श्रुतः ''तिष्ठन्तं पशुं प्रयजन्ति'' इति। प्रकृतौ तु हविष्यासादिते पश्चात्तत्प्रयाजा इज्यन्ते इतीहापि पशुसंज्ञपनादूर्ध्वं हविष्यासादिते पश्चात्प्रयाजाश्चोदकेन प्राप्ताः। ते चात्र वचनाज्जीवत्येव पशावपकृष्यन्ते। तथा सवनीयपशावनुयाजानामुत्कर्षः श्रूयते ''अग्निमारुतादूर्ध्वमनुयाजैश्चरन्ति'' इति। तत्र प्रयाजानुयाजमात्रयोरेवापकर्षोत्कर्षावुत तदन्ततदाद्यङ्गकलापस्यापीति **सन्देहे**,

श्रुततावन्मात्रोत्कर्षापकर्षाभ्यामपि तद्विधिपरवचनस्योपपत्त्या न तदादितदन्ताङ्ग-कलापोत्कर्षापकर्षावप्रमाणकौ कल्प्यौ। यदि प्रयाजन्ताङ्गकलापस्यापकर्षः अनुयाजाद्यङ्गसमूहस्य चोत्कर्षः स्यात्तदा प्रयाजेभ्यः पूर्वभाविनामाघारसामिधेन्यादीनामप्यपकर्षापत्त्या प्रयोगवचनावगतप्रधानसान्निध्यं बाधितं स्यात्। एवमनुयाजोत्तरभाविनां सूक्तवाकशंयुवाका-दीनामप्युत्कर्षेण प्रधानसान्निध्यं बाध्येत। तस्मात्पूर्वत्रैव प्रयोगवचनावगतप्रधानप्रत्यासत्त्यनुग्रहाय न पूर्वोत्तरभाविनामङ्गानामपकर्षोत्कर्षौ। किन्तु तावन्मात्रयोरेवेति। तदाह सूत्रे, उत्कर्षश्रुतौ **यथोक्तमेवोत्कर्षः स्यात्। अपकर्षस्याप्युपलक्षणे तत्। कुतः? अङ्गानां प्रधानप्रत्यासन्नत्वादिति।**

सिद्धान्तस्तु, अङ्गकलापो ह्यत्र चोदकतः प्राप्नुवन् प्रकृतौ क्रमवानेव प्राप्नोति। स च प्रयाजमात्रापकर्षे तत्पूर्वभावितया चोदकप्राप्त आघाराद्यङ्गसमूहः प्रयाजोत्तरकाले अनुष्ठेयः सन् प्राकृतक्रमत्यागाद्विगुणः प्राप्नोति। तथा अनुयाजमात्रस्योत्कर्षे तदुत्तरभावी सूक्तवाकादिस्तत्पूर्व-भावित्वेनानुष्ठेयः सन् प्राकृतक्रमं जहद्विगुणः स्यत्। तस्मात्तदन्ततदाद्यपकर्षोत्कर्षाविति। तदाह सूत्रे, **तदादि वाऽभिसम्बन्धात्तदन्तमपकर्षो वा स्यादिति।**

फलन्तु, तदन्ततदाद्यङ्गकलापयोरपकर्षोत्कर्षाभ्यामनुष्ठानम्।

इति द्वादशमनुयाजाद्युत्कर्षप्रयाजान्तापकर्षाधिकरणम् (तदादितदन्तन्यायः सूत्रे २३-२४)

अथ त्रयोदशं प्रवृत्त्या प्रोक्षणादीनां सौमिकपूर्वभाविताधिकरणम् (सूत्रे २५-२६)

प्रकत्या कृतकालानाम्॥ २५॥

(शब्दविप्रतिषेधाच्च॥ २६॥)

पूर्ववैषम्येणात्र शङ्कनात्सङ्गतिः। सोमे हि प्रातरनुवाकः प्रथमं पठितः। ततः प्रचरणीयहोमादयः केचन सौमिकाः पदार्थाः। ततस्सवनीयपुरोडाशाः। ते च चोदकप्राप्तनिर्वापादिसर्वाङ्गयुक्ताः कार्याः। ततः सौमिकं बहिष्पवमानस्तोत्रं पठितम्।

तत्राध्वर्युर्होत्रे प्रातरनुवाकप्रैषं दत्वा, तदानीमेव प्रतिप्रस्थातारं प्रेष्यति ''प्रतिप्रस्थातः सवनीयान्निर्वपस्वेति प्रेष्यति'' इति। प्रैषविधिवशात्सवनीयपुरोडाशार्थो निर्वापोऽपकृष्ट इति प्रातरनुवाकप्रैषानन्तरं प्रतिप्रस्थात्रा कर्तव्यः। तथा बहिष्पवमाने स्तुते ''अग्नीदग्नीन् विहर, बर्हिः स्तृणीहि, पुरोडाशानलंकुरु इति प्रेष्यति'' इति प्रैषविधिसामर्थ्यादलङ्करणादयः पदार्था बहिष्पवमानानन्तरमुत्कृष्टा इति तदैव कर्तव्या इत्यविवादम्। ये तु निर्वापालङ्करणमध्यवर्तिनः प्रोक्षणादयस्ते किं प्रतिप्रस्थात्रा निर्वापे कृते अध्वर्युणा तदैव कार्याः, किं वा प्रचरणीयहोमादिकान् बहिष्पवमानान्तान् सौमिकपदार्थान् कृत्वा अलङ्करणप्रैषात्पूर्वं वा, निर्वापानन्तरं वा कार्या इत्यनियम इति **सन्देहः**।

पूर्वपक्षस्तु, युक्तं पूर्वत्रानुयाजानामुत्कर्षे तदुत्तरसूक्तवाकादीनामनुयाजैरुपस्थितत्वात्तदनन्तरमेवानुष्ठानम्। अत्र तु निर्वापस्य प्रोक्षणादेश्च यथाक्रमं प्रतिप्रस्थात्रध्वर्युरूपभिन्नकर्तृकत्वेन प्रतिप्रस्थातृकर्तृकेण निर्वापेणाध्वर्युकर्तृकप्रोक्षणादेरनुपस्थितेर्न निर्वापानन्तर्यनियमः। सौमिकानामप्यध्वर्युकर्तृकाणां भिन्नकर्तृकनिर्वापेणानुपस्थित्या सौमिकपदार्थानन्तरमित्यपि न नियम इतीच्छया अत्र वा तत्र वा प्रोक्षणादयः कार्या इति।

सिद्धान्तस्तु, प्रतिप्रस्थातृकर्तृकेऽपि निर्वापे अध्वर्योः प्रयोजककर्तृत्वेनाध्वर्युकर्तृकत्वस्यापि निर्वापे सत्त्वेन तेन प्रोक्षणादेरप्युपस्थितिसम्भवे प्रकृतौ क्लृप्तक्रमत्यागे हेत्वभावान्निर्वापानन्तरमेव प्रोक्षणादयः। ततः सौमिकाः कार्या इति।

तदाह **सूत्रे**, प्रकृत्या कृतकालानां निर्णीतकालानां प्राकृत एव क्रम इति।

फलन्तु, निर्वापानन्तरमेव प्रोक्षणाद्यनुष्ठानम्।

इति त्रयोदशं प्रवृत्त्या प्रोक्षणादीनां सौमिकपूर्वकालभाविताधिकरणम् (सूत्रे २५-२६)

अथ चतुर्दशं वैकृतयूपकर्ममात्रापकर्षाधिकरणम् (यूपकर्मन्यायः)

असंयोगात्तु वैकृतं तदेव प्रतिकृष्येत ॥ २७ ॥

प्रयाजापकर्षन्यायेनात्र शङ्कनात्सङ्गतिः । ज्योतिष्टोमे वैसर्जनहोमादूर्ध्वं प्राचीनवंशगतोऽग्निराग्नीध्रीये प्रणेतव्यः । सोमश्च पूर्वं प्राचीनवंशस्थापितस्तदा हविर्धाने प्रणेतव्यः । तयोरुभयोः प्रणयनादूर्ध्वं यूपच्छेद आम्नातः । तदेतत्सर्वं सुत्यादिनात्पूर्वस्मिन्नौपसथ्ये दिने प्राप्तम् । तत्र यूपछेदो दिनत्रयात्पूर्वं दीक्षाकालेऽपकृष्टः । ''दीक्षासु यूपं छिनत्ति'' इति तद्विधानात् । तत्र तदन्ताङ्गसमूहस्यापकर्षोऽथ तन्मात्रस्येति **सन्देहे,**

यथा प्रयाजापकर्षे तत्पूर्वभाविनामाघारादीनामपकर्षस्तथा यूपच्छेदापकर्षे तत्पूर्वभाविनामग्नीषोमीयप्रणयनादीनामपकर्षं इति **प्राप्ते,**

सिद्धान्तः, प्रयाजाघारादीनामेकं प्रधानं प्रत्यङ्गत्वेनैकप्रयोगान्तःपातित्वादाघाराद्युत्तरकालता प्रयाजादीनामङ्गमिति तद्बाधभिया तदन्तापकर्षोऽङ्गीकृतः । पाशुकस्य तु यूपच्छेदनस्य न सौमिकाग्नीषोमीयप्रणयनानन्तर्यमङ्गम् । येन प्रणयनमप्यपकृष्येत । तस्माच्छ्रुतस्य यूपच्छेदनामात्रस्यापकर्षः ।

तदाह **सूत्रे, असंयोगात्** अक्लृप्तक्रमात् **वैकृतं** यूपच्छेदादिकं **तदेव** श्रुतमात्रं **प्रतिकृष्येत** । न तु तदर्वाचीनोऽपि पदार्थ इति ।

फलन्तु, प्रणयनादेः स्वस्थान एवानुष्ठानम् ।

इति चतुर्दशं वैकृतयूपकर्ममात्रापकर्षाधिकरणम् (यूपकर्मन्यायः)

अथ पञ्चदशं दाक्षिणाग्निकहोमानपकर्षाधिकरणम्

प्रासङ्गिकश्च नोत्कर्षेदसंयोगात् ॥ २८ ॥

अत्रापि पूर्ववैषम्येण शङ्कनात्सङ्गतिः । सवनीयपशुर्हि ''वपया प्रातस्सवने चरन्ति, पुरोडाशेन माध्यन्दिने सवने, अङ्गैस्तृतीयसवने'' इति वचनात्सवनत्रयव्यापी । तत्पशुतन्त्रमध्ये सवनीयपुरोडाशे पिष्टलेपफलीकरणहोमौ चोदकेन प्राप्तौ । दृषदुपलकपालादिष्वाश्लिष्टो यः

पिष्टलेपस्तमुद्धृत्य जुह्वां चतुर्गृहीते आज्ये प्रक्षिप्य दक्षिणाग्नौ जुहोति। **फलीकरणपदेन** सूक्ष्मतण्डुलकरणा उच्यन्ते। तानपि तथा जुहोतीति। तावेतौ होमौ प्रकृताविवेहाप्यनुयाजोत्तरभाविनौ। अनुयाजोत्कर्षस्तदाद्यङ्गसमूहस्योत्कर्ष इत्युक्तम्। तथा चानुयाजानामुत्कर्षे तदुत्तरभाविनावेतावपि होमावुत्कृष्येते न वेति **सन्देहे,**

पूर्वत्र क्रमस्याक्लृप्तत्वादनपकर्षेऽपीह प्रकृतावनुयाजपरत्वेन दाक्षिणाग्निकयोस्तयोः क्लृप्तक्रमत्वात्तयोरप्युत्कर्ष इति **प्राप्ते,**

सिद्धान्त्यते, अनुयाजा हि पशुसम्बन्धिन पुरोडाशार्थतया नानुष्ठीयन्ते। नोत्कृष्यन्ते च। तत्र होमौ तु न पाशुकौ। किन्तु पौरोडाशिकावेव। न हि पाशुकैरनुयाजैः पौरोडाशिकयोः क्रमोऽङ्गम्। एकप्रयोगवचनापरिग्रहान्नोत्कृष्येयाताम्। तस्मात्तयोः स्वस्थान एवानुष्ठानम्।

तदाह **सूत्रे, प्रासङ्गिकं** अन्यार्थं कृतमन्यस्याप्युपकार्यनूयाजादिकं उत्कृष्यमप्यसंयोगात् पुरोडाशार्थत्वाभावात्पौरोडाशिकौ होमौ नोत्कर्षेदिति।

फलन्तु, उक्तहोमयोः स्वस्थान एवानुष्ठानम्।

इति पञ्चदशं दाक्षिणाग्निकहोमानपकर्षाधिकरणम्

अथ षोडशं पुरोडाशाभिवासनान्तस्य दर्शेऽनपकर्षाधिकरणम्

तथाऽपूर्वम्॥ २९॥

पूर्ववैषम्येणात्र शङ्कनात्सङ्गतिः। दर्शपूर्णमासयोः पुरोडाशस्य कपालेषु श्रपितस्य ''भस्मनाऽभिवासयति'' इति भस्मना आच्छादनमाम्नातम्। तत ऊर्ध्वं वेदिराम्नाता। तेनैव क्रमेण पौर्णमासीयागे प्रतिपद्यनुष्ठानं कृतम्। दर्शयागे तु वेदेरपकर्ष आम्नायते ''पूर्वेद्युरमावास्यायां वेदिं करोति'' इति। सा च वेदिरपकृष्यमाणा हविरभिवासनान्तान् पूर्वपदार्थानपकर्षत्युत नेति सन्देहः।

पूर्वपक्षस्तु, पूर्ववदिहैकप्रयोगवचनापरिग्रहाभावात् पाठतः पौर्णमासीयागे तथाऽनुष्ठानेन च क्रमस्य क्लृप्तत्वेन यूपच्छेदवदक्लृप्तक्रमत्वाभावाच्च पूर्वेद्युरपकृष्यमाणा वेदिरभिवासनान्तान् पूर्रपदार्थानपकर्षत्येव। अन्यथा क्लृप्तक्रमलोपेन विगुणा वेदिः स्यादिति।

सिद्धान्तस्तु, यदि दर्शयागः पौर्णमासीविकारः स्यात्तदा पौर्णमास्यां क्लृप्तः क्रमोऽतिदिश्येत। न त्वसौ तद्विकारः। समप्रधानत्वात्। वेदेरभिवासनोत्तरकालता दर्शपूर्णमासयोः सामान्यतः प्राप्ता। दर्शयागे अमावास्यायां विशेषविधानेनास्य पूर्वमक्लृप्तक्र मस्य श्रौतत्वेन पाठक्रमादपि बलवत्त्वेन श्रौतक्रमेण पाठतः प्राप्ताभिवासनोत्तरकालीनत्वक्रमो बाध्यत इति, दर्शयागे अमावास्याकाल एव स्वस्थानं वेदेरित्यपकर्ष एव नास्ति येन तत्पूर्वपदार्थापकर्षः स्यादिति।

तदाह **सूत्रे**, **अपूर्वं** पूर्वमक्लृप्तक्रममपि पूर्वेद्युर्वेद्या अनुष्ठानं **तथा**, न पूर्वतनानामपकर्षकमिति।

फलन्तु, श्रुतमात्रस्य वेदिरूपार्तस्यैव पूर्वेद्युरनुष्ठानमिति।

इति षोडशं पुरोडाशाभिवासनान्तस्य दर्शेऽनपकर्षाधिकरणम्

अथ सप्तदशं सान्तपनीयाया अग्निहोत्रानुत्कर्षकताधिकरणम् (सूत्राणि ३०-३४)

सान्तपनीया तूत्कर्षेदग्निहोत्रं सवनवद्वैगुण्यात् ॥ ३० ॥

(अव्यवायाच्च ॥ ३१ ॥ असम्बन्धात्तु नोत्कर्षेत् ॥ ३२ ॥ प्रापणाच्च निमित्तस्य ॥ ३३ ॥ सम्बन्धात्सवनोत्कर्षः ॥ ३४ ॥)

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः। चातुर्मास्येषु साकमेधाख्ये तृतीये पर्वणि सान्तपनेष्टिः श्रूयते ''मरुद्भ्यः सान्तपनेभ्यो माध्यन्दिने चरुम्'' इति। ताश्चेष्टिं समाप्य सायङ्कालेऽग्निहोत्रमनुष्ठीयते। यदि कदाचित्सेष्टिर्मध्यन्दिने प्रक्रान्ता दैवान्मानुषाद्वा प्रतिबन्धादासायमुत्कृष्टा तदा अग्निहोत्रस्याप्युत्कर्षोऽस्त्युत नेति **सन्देहः**।

पूर्वपक्षस्तु, सायङ्कालेप्यनुवृत्तामिष्टिमसमाप्य मध्ये स्वकाले अग्निहोत्रस्य करणे तदर्थं गार्हपत्यादाहवनीये यदग्निप्रणयनं तल्लुप्येत। प्रागिष्ट्यर्थं प्रणीताग्निनैव तज्जन्योपकारस्य प्रसङ्गादग्निहोत्रेऽपि सिद्धेः। साङ्गमिष्टिप्रयोगं समाप्यैव प्रणयनपूर्वमग्निहोत्रं पश्चात्कार्यम्। न च मध्ये क्रतौ प्रणयनरूपाङ्गलोपभियोत्कर्षे सति सायङ्कालरूपाङ्गलोपः प्राप्नोतीति वाच्यम्। पूर्वत्र जघन्यतया पाठक्रमस्येव जघन्यस्य सायंरूपस्वकालस्य प्रणयनानुग्रहाय बाधसम्भवादिति। तदाह **सूत्रे,** यथा प्रातस्सवनमुत्कृष्यमाणं माध्यंदिनं सवनमुत्कर्षति अन्यथा क्रमबाधेन वैगुण्यापातात्। तथा सान्तपनीयापीष्टिरग्निहोत्रमिति।

सिद्धान्तस्तु, कालस्याङ्गत्वेनोपदेशेप्यनुपादेयत्वेन ''तस्मिन् सति कर्म कर्तव्यम्'' इति निमित्तत्वेनाधिकारिविशेषणत्वान्निमित्ततैव भवतीत्यसति तस्मिन्नधिकाराभावात् कालवशेन स्वाङ्गप्रणयनाभावेऽपीष्ट्यर्थप्रणयनेनैव तज्जन्योपकारस्य प्रसङ्गात्सिद्धेः, अग्निहोत्रमिष्टिमध्ये स्वकाले कृत्वा पश्चादिष्टिः समाप्येति।

तदाह **सूत्रे, असम्बन्धात्तु नोत्कर्षेत्** इति। अङ्गाङ्गिभावरूपसम्बन्धाभावादित्यर्थः।

फलन्तु, स्वस्थान एवाग्निहोत्रानुष्ठानम्।

इति सप्तदशं सान्तपनीयाया अग्निहोत्रानुत्कर्षकताधिकरणम् (सूत्राणि ३०-३४)

अथाष्टादशमुक्थ्यानुरोधेन षोडश्युत्कर्षाधिकरणम्

षोडशी चोक्थ्यसंयोगात्॥ ३५॥

अत्रापि पूर्वन्यायेन शङ्कनात्सङ्गतिः। ज्योतिष्टोमे षोडशिग्रहं प्रकृत्य श्रूयते ''तं पराञ्चमुक्थ्येभ्यो गृह्णाति'' इति। तृतीयसवने सूर्यास्तमयात्प्रागेवोक्थ्यग्रहास्त्रयो गृह्यन्ते। तेभ्यः परस्तादयं षोडशिग्रहो विहितः। यदि कदाचिद्दैवादुक्थ्यग्रहा अस्तमयादूर्ध्वमुत्कृष्येरंस्तदा तत ऊर्ध्वं विहितस्य षोडशिन उत्कर्षोऽस्त्युत नेति **सन्देहः**।

पूर्वपक्षस्तु, यद्युक्थ्यग्रहोत्कर्षेण षोडशिग्रहयागाभ्यास उत्कृष्येत तर्हि प्रधानकालत्वादङ्गानां ''ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकुर्यात्'' इति वचनादङ्गभूतं स्तोत्रमप्युत्कृष्येत। तत्र ''समयाध्युषिते सूर्ये षोडशिनः स्तोत्रमुपाकरोति,'' इति समयोऽस्तमयस्तं प्राप्ते सूर्ये इति विहितः सूर्यास्तमयकालो बाध्येत। स च न युक्तः। पूर्वत्र यथाऽनुपादेयकालानुरोधादुपादेय-प्रणयनरूपाङ्गबाधेन अग्निहोत्रस्यानुत्कर्षस्तथा षोडशिस्तोत्राङ्गभूतानुपादेयसूर्यास्तमयरूपकालानु-रोधात् उक्थ्ये पराग्भावरूपोपादेयक्रमबाधेन षोडशियागाभ्यासस्यानुत्कर्ष एव युक्त इति।

सिद्धान्तस्तु, ''तं पराञ्चमुक्थ्येभ्यः'' इति वचनात्षोडशियागाभ्यासस्य उक्थ्य-परभागोऽङ्गत्वेन विधीयते। सचप्रधानस्याङ्गभूतः कालः षोडशिनोऽनुत्कर्षे बाध्येत। स च न युक्तः। प्रधानस्याङ्गभूतस्तोत्रस्याङ्गरूपकालानुरोधेन प्रधानाङ्गभूतकालभाधस्यानुचितत्वात्। तस्मात्प्रधानाङ्गभूतपरभागरूपकालानुरोधात्स्तोत्राङ्गकालस्य बाधेन सस्तोत्रकस्य षोडशिग्रहाभ्यासस्योक्थ्यग्रहपरभागे उत्कर्ष इति।

तदाह **सूत्रे, षोडशिग्रहयागाभ्यासोप्युक्थ्यसंयोगादुत्कृष्यत** इति। **फलन्तु**, उक्थ्यपरभागे षोडशिग्रहयागाभ्यासानुष्ठानम्।

इत्यष्टादशमुक्थ्यानुरोधेन षोडश्युत्कर्षाधिकरणम्

इति श्रीभाट्टसंग्रहे सर्वतन्त्रस्वतन्त्रश्रीसुधीन्द्रतीर्थगुरुपादशिष्य श्रीराघवेन्द्रतीर्थयतिसार्वभौमकृते पञ्चमाध्यायस्य प्रथमः पादः

अस्मिन् पादे	अधिकरणानि	१८	सूत्राणि	३५
आदितः	अधिकरणानि	३२५	सूत्राणि	७५१

अथ पञ्चमाध्याये द्वितीयः पादः

अथ प्रथमं वाजपेयपशूनां सर्वेषामेकदोपाकरणादिधर्मानुष्ठानाधिकरणम् (सूत्राणि १-३)

हरिः ॐ । सन्निपाते प्रधानानामेकैकस्य गुणानां सर्वकर्म स्यात् ॥ १ ॥

(सर्वेषां वैकजातीयं कृतानुपूर्वत्वात् ॥ २ ॥ कारणादभ्यावृत्तिः ॥ ३ ॥)

पूर्वपादे श्रुत्यर्थादिभिः क्रमे सामान्यतश्चिन्तिते सतीह पादे तद्विशेषचिन्तेति तदानन्तर्यमस्य पादान्तरता चेति ध्येयम् ।

वाजपेये ''सप्तदश प्राजापत्यान् पशूनालभते'' इति श्रुतपशूनां '' वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्ति'' इति त्त्वाप्रत्ययेन वैश्वदेव्यानन्तर्यस्य सर्वपशुप्रयोगाङ्गत्वावगमेनैककाल-कर्तव्यता सिद्धा । तेषामग्नीषोमीयतश्चोदकतः पशुधर्माः प्राप्ता उपाकरणनियोजनादयः पशुसंस्काररूपाः प्रतिपशुभेदेन कर्तव्याः । ते किमेकैकस्य कात्स्न्येन कृत्वा ततोऽपरस्य कर्तव्याः, किं वोपाकरणं सर्वेषां कृत्वा ततो नियोजनादीति संशयः ।

पूर्वपक्षस्तु, साङ्गं प्रधानं कर्तव्यमिति प्रयोगवचनावगताङ्गप्रधानसाहित्यबलेन, प्रकृतौ क्लृप्ताङ्गप्रधानसाहित्यस्य चोदकेन प्राप्तत्वेन चैकैकस्य पशोः प्रधानस्य कात्स्न्येन तदङ्गसर्वसंस्कारान् कृत्वा ततोऽपरस्य कर्तव्या इत्येवं काण्डानुसमयः । काण्डेन गुणकाण्डेन समयः सम्बन्धः काण्डानुसमय इति ।

तदाह **सूत्रे**, **प्रधानानां सन्निप्राते** समवाये **चैकैकस्य** प्रधानस्य **गुणानां** मध्ये **सर्वकर्म** सर्वेषां क्रियानुष्ठानं स्यादिति ।

सिद्धान्तस्तु, ''वैश्वदेवीं कृत्वा'' इत्यादिप्रत्यक्षवचनावगतस्य प्रधानभूतपशूनां साहित्यस्य प्रयोगवचनकल्प्येनाङ्गप्रधानप्रत्यासत्तिमात्रेण बाधायोगादङ्गानां स्वसमानजातीयैः षोडशभिरितरपश्वीयैरङ्गैर्व्यवधानेनैव प्रत्यासत्तिं प्रयोगवचनं कल्पयेत् । तथाऽऽनुमानिकमपि

चोदकं पशूनां साहित्यबोधकप्रत्यक्षवचनाविरुद्धांशमेव प्रापयतीति उत्तरस्य नियोगरूपाङ्गस्य पूर्वस्मादङ्गात् षोडशक्षणव्यवहितमेवानन्तर्यं प्रापयतीति सर्वेषामुपाकरणं कृत्वा ततो नियोजनादीति पदार्थानुसमयो न काण्डानुसमय इति । तदाह सूत्रे, **सर्वेषां वैकजातीयं कृतानुपूर्वत्वादिति** ।

फलन्तु, सर्वेषामुपाकरणं कृत्वा पश्चान्नियोजनादीति ।

इति प्रथमं वाजपेयपशूनां सर्वेषामेकदोपाकरणादिधर्मानुष्ठानाधिकरणम्

पदार्थानुसमयन्यायः सूत्राणि १-३)

अथ द्वितीयं मुष्टिकपालादीनां समुदायानुसमयाधिकरणम् (सूत्राणि ४-५)

मुष्टिकपालावदानाञ्जनाभ्यञ्जनवपनपावनेषु चैकेन ॥ ४ ॥

(सर्वाणि त्वैककर्म्यादितेषां तद्गुणत्वात् ॥ ५ ॥)

पदार्थेनानुसमय इति स्थिते प्रसङ्गात्कियानेकः पदार्थः ? इति चिन्तनात्सङ्गतिः । दर्शपूर्णमासप्रकरणे आग्नेयाग्नीषोमीयपुरोडाशाङ्गतया ''चतुरो मुष्टीर्निर्वपति'' इति निर्वापौ श्रुतौ । तत्राऽऽग्नेयनिर्वापानन्तरमग्नीषोमीयस्य तेनैव च क्रमेण प्रोक्षणावघातादय इति पदार्थानुसमयो न काण्डानुसमय इति पूर्वन्यायेन सिद्धे सति किं निर्वाप एकैकमुष्टिना निर्वापः, किं वा मुष्टिचतुष्टयनिर्वापमाग्नेयस्य कृत्वा पश्चादग्नीषोमीयस्य चतुर्मुष्टिनिर्वाप इति **सन्देहः** ।

पूर्वपक्षस्तु, एकमुष्टिग्रहणे कृते तावतैव निर्वापविषयः प्रयत्नः पर्यवसितो दृश्यते । मुष्ट्यन्तरं तु प्रयत्नान्तरेणारभ्यते । ततश्च प्रयत्नभेदान्निर्वापरूपपदार्था भिद्यन्त इत्यैकैकमुष्टिः पृथक्पदार्थ इत्येकैकेन पदार्थेनानुसमयः । एवं ''कपालान्युपदधाति'' इत्युक्तोपधानमप्यष्टाकपालपुरोडाशकाग्नेये एककपालोपधानं कृत्वा अग्नीषोमीयकपालस्योपधानं, पुनर्द्वितीयादेरित्येकैककपालानुसमयः । तथा ''द्विर्हविषोऽवद्यति'' ''त्रिरंक्ते'' ''त्रिरभ्यंक्ते'' ''क्षुरेण त्रिर्वपति'', ''एकविंशत्या पावयति'' इत्युक्तद्विरवदानादेरेकैकावदानेनानुसमयः ।

तथाञ्जनाभ्यञ्जनादेर्यजमानसंस्कारस्य बहुयजमानके सत्रे एकैकेनानुसमयो न त्रित्वसंख्या-विशिष्टेनेति । तदाह **सूत्रे, मुष्ट्यादिष्वेकैकेनानुसमय** इति ।

सिद्धान्तस्तु, स्यादेवं यदि पदार्थस्वरूपं लौकिकं स्यात् । न त्वेवम् । पदार्थत्वमिहाङ्गत्वमभिमतम् । तच्च विधिगम्यम् । विधिश्च संख्यामुष्टिभ्यां विशिष्ठस्यैव निर्वापस्यावगम्यत इति विशिष्टनिर्वाप एवैकः पदार्थः । एकैकमुष्टिस्तदवयवो न पदार्थः । यश्च पदार्थः स एव प्रधानानां सह कर्तव्य इति नैकैकेनानुसमयः । किन्तु विशिष्टेनैव । एवमाग्नेय-पुरोडाशेऽष्टाकपालोपधानमेकः पदार्थः । अगनीषोमीये त्वेकादशकपालोपधानमेकः पदार्थः । एवमवदानाञ्जनादावप्येकविधिविहितस्य द्वित्वत्रित्वसंरव्याविशिष्टस्यैकपदार्थत्वमिति विशिष्ट-पदार्थेनानुसमयो नैकैकेनेति ।

तदाह **सूत्रे, सर्वाणि त्वैककर्म्यादेतेषां तद्गुणत्वादिति । फलन्तु**, विशिष्टपदार्थेनानुसमय इति ।

इति द्वितीयं मुष्टिकपालादीनां समुदायानुसमयाधिकरणम् (सूत्राणि ४-५)

अथ तृतीयमवदानस्य प्रदानान्तानुसमयाधिकरणम्

संयुक्ते तु प्रक्रमात्तदन्तं स्यादितरस्य तदर्थत्वात् ॥ ६ ॥

पूर्वत्र द्वित्वविशिष्टावदानेनानुसमय इति स्थिते, किं तावतैवानुसमयः किं वा तदादिप्रदानान्तेनानुसमय इति चिन्तनात्सङ्गतिः । द्वित्वविशिष्टावदानस्यैवैकपदार्थत्वेन विधानात्तावन्मात्रेणानुसमयः । आग्नेयस्य द्विरवदानं कृत्वा तद्धोमात्प्रागेवाग्नीषोमीयस्य द्विरवदानमिति **प्राप्ते**,

सिद्धान्तः, स्यादेवं यद्यत्र द्वित्वविशिष्टमवदानं विधीयते । न त्वेवम् । किन्तु, ''चतुरवत्तं जुहोति'' इति वाक्येऽवदानविशिष्टहोमविधानाद्धोमस्यावदानमन्तरेणानुपपत्तेर्होम-विधिनैवाऽक्षिप्तेन विशेषणविधिनाऽवदानप्राप्तेः । द्विरवदानवाक्यन्तूपस्तरणाभिघारणाभ्यां यच्चतुरवत्तं

तस्मिन् हविर्विषयं द्विरवदानमिति अवदानानुवादेन हविषो द्विरिति विशेषमात्रनियमनार्थम्। ततश्च न द्व्यवदानमात्रमेकपदार्थः। अपि तु होमपर्यन्तमेकः पदार्थ इति होमान्तेनावदानेनानुसमय इति।

तदाह **सूत्रे**, अवदानसंयुक्ते होमे विधीयमाने होमप्रक्रमत्वात् **तदन्तमवदानात्मेकः पदार्थः स्यात्। इतरस्य द्विरवदानादेस्तदर्थत्वादिति।**

फलन्तु, होमान्तेनानुसमय इति व्यक्तम्।

इति तृतीयमवदानस्य प्रदानान्तानुसमयाधिकरणम्

अथ चतुर्थमञ्जनादेः परिव्याणान्तानुसमयाधिकरणम् (सूत्राणि ७-९)

वचनात्तु परिव्याणान्तमञ्जनादि ॥ ७ ॥

कारणाद्वाऽनवसर्गः स्याद्यथा पात्रवृद्धिः ॥ ८ ॥

न वा शब्दकृतत्वन्न्यायमात्रमितरदर्थात्पात्रविवृद्धिः ॥ ९ ॥

पूर्ववैषम्येण शङ्कनात्सङ्गतिः। ज्योतिष्टोमे अग्नीषोमीयपशौ यूपस्य घृतेनाञ्जनमुच्छ्रयणम्, अवटस्य पर्यहणम्, यूपमूलस्य परिबृंहणम्, मध्ये रशनया परिव्याणमित्येते पदार्था आम्नाताः। ते चैकयूपपक्षे तथैव कर्तव्याः। ते यूपगणे चोदकप्राप्ताः किमेकैकेनानुसमेतव्याः, किं वा परिव्याणान्तेन धर्मसमूहेनेति **सन्देहः**।

पूर्वपक्षस्तु, पूर्वत्र द्व्यवदानमात्रस्याविधेयत्वेन पदार्थत्वाभावेऽप्यञ्जनादेः "यूपमनक्ति" इत्यादिना पृथग्विधेयत्वाविवादात्तावानेकः पदार्थ इति पशूपाकरणन्यायेन निर्वापन्यायेन चैकैकेनाञ्जनादिना पदार्थेनानुसमेतव्या इति।

सिद्धान्तस्तु, प्रत्येकं पदार्थत्वेप्यन्येन धृते यूपे अञ्जनादेः सुकरत्वादध्वर्युणाऽञ्जनादिकं कर्तुं यजमानस्य "अञ्जनादिपरिव्याणान्तं यजमानो यूपं नावसृजेत्" इति वचनेन परिव्याणपर्यन्तं

यूपानवसर्गो विधीयते। तदन्यथानुपपत्त्या अञ्जनादिपरिव्याणान्तसंस्कारस्य प्रकृताविव यूपगणेऽपि चोदकबाधायैकत्र सर्वं कृत्वा पश्चद्यूपान्तर इति संस्कारसङ्केनानुसमेतव्य इति काण्डानुसमयो न पदार्थानुसमयः । न च पुरुषान्तरप्रतीक्षणे विलम्बापत्तेर्यजमानस्य झडिति स्वयागप्रयोगसमाप्तिसमुत्सुकतया यूपानवसर्गस्य प्राप्ततयाऽनुवादमात्रं तद्वचनं, न विधिरिति शंक्यम् । कार्यान्तरव्यापृते यजमाने पुरुषान्तरेणाप्यध्वर्युसाहाय्यकरणसम्भवेन नित्यप्राप्तेर-भावेनानुवादत्वायोगात्।

तदाह **सूत्रे, वचनात् अञ्जनादि परिव्याणान्तं** पदार्थजातमनुसमेतव्यमिति ।

फलन्तु, काण्डेनानुसमय इति ।

इति चतुर्थमञ्जनादेः परिव्याणान्तानुसमयाधिकरणम् (सूत्राणि ७-९)

अथ पञ्चमं दैवताद्यवदानेषु पदार्थानुसमयाधिकरणम् (सूत्राणि १०-१२)

पशुगणे तस्य तस्यापवर्जयेत्पश्वेकत्वात् ॥ १० ॥

(दैवतैर्वैककर्म्यात् ॥ ११ ॥ मन्त्रस्य चार्थवत्त्वात् ॥ १२ ॥)

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः । अग्नीषोमीयपशाववदानानन्तरं प्रदाने प्राप्ते, वचनमिदमाम्नायते ''दैवतान्यवदाय न तावत्येव होतव्यम् । सौविष्टकृतान्यवद्यति । सौविष्टकृतान्यवदाय न तावत्येव होतव्यम् । ऐडान्यवद्यति'' इति । तत्र प्रधानदेवतार्थानि स्विष्टकृदर्थानि इडाभक्षणार्थानीति त्रिविधान्यवदानानि प्रकृतौ क्रमेणानुष्ठीयन्ते । ''सप्तदश प्राजापत्यान् पशूनालभते'' इति वाक्योक्ते प्रजापतिरूपैकदैवताके सप्तदशपशूनां गणे चोदकप्राप्तानि किमेकस्य पशोस्त्रीण्यप्यवदानानि कृत्वा परस्य त्रयं कर्तव्यमुत सर्वेषां दैवतावदानं कृत्वा ततः स्विष्टकृदर्थानि तत ऐडानीति ।

पूर्वपक्षस्तु, प्रकृतौ तु त्रयाणामवदानानामग्नीषोमीयपशावानन्तर्येणानुष्ठानं कृतम् । इहापि पशुगणे तथैव चोदकप्राप्तानि । पूर्वत्रेवेहापि चोदकाबाधायैकपशाववदानत्रयं कृत्वा पुनः पश्वन्तरे

तत्त्रितयं कर्तव्यमिति काण्डानुसमयो न पदार्थानुसमय इति । तदाह **सूत्रे, पशुगणे तस्य तस्य** पशोरवदानत्रयम**पवर्जयेत्** समापयेत् । कुतः ? **पश्वेकत्वात्** पशुत्वेन साजात्यात्प्रतिपश्ववदानत्रयम् । नैरन्तर्यस्य चोदकतः प्राप्तेरिति ।

सिद्धान्तस्तु, प्रकृतौ पशोरेकत्वेन पदार्थानुसमयप्राप्त्यभावात्काण्डानुष्ठानं प्राप्तमिति स्विष्टकृदवदानस्य दैवतावदानानन्तर्यमर्थप्राप्तम् । इह त्वनेकपशुसाहित्यसम्पत्तये समानजातीयैः समानजातीयानामनुसमय एव । एवञ्च सत्युपाकरणादिष्विव पशूनां साहित्यं सम्पादितं भवति । अतो दैवतावदानरूपमेकं पदार्थं सर्वेषु पशुषु कृत्वा पश्चात्सौविष्टकावदानम् । तदपि सर्वेषु कृत्वा पश्चादैडावदानमित्येवं पदार्थानुसमयो न काण्डानुसमय इति ।

तदाह **सूत्रे, दैवतैर्वैककर्म्यादिति । फलन्तु,** पदार्थानुसमयेनानुष्ठानम् ।

इति पञ्चमं दैवताद्यवदानेषु पदार्थानुसयाधिकरणम् (सूत्रामि १०-१२)

अथ षष्ठं नानाबीजेष्टावुलूखलादीनां तन्त्रताधिकरणम् (सूत्राणि १३-१५)

नानाबीजेष्वेकमुलूखलं विभवात् ॥ १३ ॥

(विवृद्धिर्वा नियमानुपूर्व्यस्य तदर्थत्वात् ॥ १४ ॥ एकं वा तण्डुलभावाद्धन्तेस्तदर्थत्वात् ॥ १५ ॥)

अत्रापि पूर्वन्यायेन शङ्कनात्सङ्गतिः । राजसूये नानाबीजप्रकृतिकहविष्केष्टिराम्नाता ''अग्नये गृहपतये पुरोडाशमष्टाकपालं निर्वपति कृष्णानां व्रीहीणाम्'' ''सोमाय वनस्पतये श्यामाकं चरुम्'' इत्यादिना । तेषां नानाबीजानामवघातायाजिनास्तरणोलूखलाधिवर्तनबीजावापावघातपरावपनविवेचनफलीकरणरूपाः पदार्थाश्चोदकतः प्राप्ताः । कृष्णाजिनमास्तीर्य तत्रोलूखलमधिवर्त्य तत्र बीजानिरूप्य मुसलेनावहत्य शूर्पेण परावपनशब्दितं तुषशोधनं कणेभ्यो विवेचनं कृत्वा फलीकरणशब्दितं तुषशोधनञ्च कर्तव्यमित्येते धर्माः किं प्रत्येकं पदार्थत्वादेकैकशोऽनुसमेतव्याः, उत कृष्णाजिनास्तरणादिः फलीकरणान्त एकः पदार्थस्तावताऽनुसमय इति **सन्देहः** ।

पूर्वपक्षस्तु, ''कृष्णाजिनमधस्तादास्तृणाति'' ''शूर्पेण विविनक्ति'' इत्यादिपृ तग्विधिभिर्विहितत्वात्प्रत्येकमेव पदार्थ इत्येकैकशोऽनुसमेतव्याः। तथा च यावत्यो बीजजातयस्तावन्ति कृष्णाजिनान्यास्तरणीयानि। तावन्त्युलूखलनि क्रमात्तत्र स्थाप्यानि। ततः क्रमात्तेषु नानाबीजानि स्थाप्यानि। क्रमादवहननपरावपनादीनि कर्तव्यानि। एवञ्च पूर्वत्र पश्वैक्यादार्थिकमवदानानां प्राकृतं नैरन्तर्यमिवेहापि प्रकृतौ बीजानामेकजातीयत्वेनार्थात्प्राप्त-मुलूखलादेरेकैकत्वं बाधित्वा नानात्वानि सम्पाद्यानीति।

सिद्धान्तस्तु, ''व्रीहीनवहन्ति'' इत्यस्य हि ''अवधातेन व्रीहींस्तण्डुलान् कुर्यात्'' इत्यर्थः। तेनावघातकरणिकया तण्डुलभाव्यकया भावनया आक्षिप्ताः परावपनादयो न स्वतन्त्रपदार्था भवितुर्मन्ति। न हि तैर्विना तण्डुलनिष्पत्तिर्भवति। अतः आस्तरणादिविधयोऽपि तण्डुलनिष्पत्तिपर्यन्तो योऽवघातपदार्थस्तदवयवविधायितया दृष्टार्थाः सन्तो न स्वातन्त्र्य-परिकल्पनाय प्रभवन्तीत्यास्तरणादिफलीकारणान्तमेकः पदार्थ इति सर्वेणानुसमयो नैकैकेनेति। तथा च कृष्णाजिनोलूखलादिकं सर्वेषु बीजेषु पर्यायेणान्वेतुं शक्नोतीति कृष्णाजिनोलूखलशूर्पमुसलानां न नानात्वमिति।

तदाह **सूत्रे, नानाबीजेष्वेकमुलूखलम्**। कुतः ? विभवात् पर्यायेण सर्वकार्यसाधन-सामर्थ्यादिति। उलूखलमुपलक्षणम्। **फलन्तु**, अनेकसम्पादनाभावः।

इति षष्ठं नानाबीजेष्टावुलूखलादीनां तन्त्रताधिकरणम् (सूत्राणि १३-१५)

अथ सप्तमग्नीषोमीयपशौ प्रयाजानुयाजयोः पात्रभेदाधिकरणम्

विकारे त्वनुयाजानां पात्रभेदोऽर्थभेदे स्यात् ॥ १६ ॥

अत्रापि पूर्वन्यायेन शङ्कनात्**सङ्गतिः**। प्रकृतौ दर्शपूर्णमासयागे ''अष्टावुपभृति गृह्णाति। प्रयाजानुयाजार्थं तत्'' इति वचनात् प्रयाजानुयाजार्थमुपभृति **तदष्टसंख्याकं श्रवणादिति** पूर्वाध्यायाद्यपादीयान्त्यनयोक्तदिशा चतुर्गृहीतद्वयमेकस्यामुपभृति युगपद्ग्राह्यम्। तथैव च

विकृतावग्नीषोमीयपशौ प्राप्तम्। तत्र चानुयाजानां चोदकप्राप्तशुद्धाज्यद्रव्यविकारभूतं पृषदाज्यशब्दितं दधिमिश्रमाज्यं श्रूयते ''पृषदाज्येनानुयाजान् यजति'' इति। प्रयाजाज्यन्त्वविकृतमेव वर्तते। तत्र शुद्धाज्यपृ षदाज्ययोरसंकरेऽवश्यम्भाविनि किमौपभृतेन प्रयाजहोमानन्तरं तस्यामेवोपभृति पृषदाज्यग्रहणमुतैकस्मिन्नेव काले पात्रभेदेनेति **सन्देहः**।

पूर्वपक्षस्तु, प्रकृताविव पात्रैक्यास्य विकृतावपि पशौ चोदकेन प्राप्तत्वात्तत्त्यागे हेत्वभावात्प्रयाजहोमानन्तरं रिक्तायामुपभृति पृषदाज्यग्रहणसम्भवात् पूर्वत्रोलूखलमिव पात्रैक्यमेव युक्तमिति।

सिद्धान्तस्तु, प्रकृतौ प्रयाजार्थाज्यग्रहणकाल एवानुयाजार्थाज्यग्रहणस्य दृष्टत्वेन चोदकेन विकृतावेककाल एव प्रापितत्वात्तत्त्यागे हेत्वभावात्तदैव पात्रान्तरं सम्पाद्यानुयाजार्थं पृषदाज्यं ग्राह्यमिति। तदाह **सूत्रे**, विकारे विकृतौ पशावनुयाजानामर्थभेदे द्रव्यभेदे पात्रभेदः स्यादिति।

फलन्तु, पात्रान्तरसम्पादनम्।

इति सप्तममग्नीषोमीयपशौ प्रयाजानुयाजयोः पात्रभेदाधिकरणम्

अथाष्टमं नारिष्टहोमस्योपहोमपूर्वताधिकरणम् (सूत्राणि १७-२०)

प्रकृतेः पूर्वोक्तत्वादपूर्वमन्ते स्यान्न ह्यचोदितस्य शेषाम्नानम्॥ १७॥
(मुख्यानन्तर्यमात्रेयस्तेन तुल्यश्रुतित्वादशब्दत्वात्प्राकृतानां व्यवायः स्यात्॥ १८॥ अन्ते तु बादरायणस्तेषां प्रधानशब्दत्वात्॥ १९॥ तथा चान्यार्थदर्शनम्॥ २०॥)

पूर्ववैषम्येण शङ्कनात्सङ्गतिः। अग्न्यादिदेवताककृत्तिकादिनक्षत्राणामिष्टयः काम्या विधीयन्ते ''अग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निर्वपेत्'' इत्यादयः। तत उपहोमा विहिताः ''सोत्र जुहोति। अग्नये स्वाहा। कृतिकाभ्यः स्वाहा। अम्बायै स्वाहा'' इत्यादिना। प्रकृतौ प्रधानानन्तरं नारिष्टहोमाः श्रुताः। ता इह चोदकप्राप्ताः। ''दश ते तनवो यत्र यज्ञियाः'' इत्यादिभिर्मन्त्रैराज्याहुतयो **नारिष्टहोमाः**। तत्र किमुपहोमान् कृत्वा नारिष्टहोमाः कार्या किं

वा विपरीतमिति **सन्देहे,** पूर्वत्र प्राकृतक्रमाबाधेऽपीह प्रत्यक्षपाठविरोधेन न प्राकृतक्रमादरो युक्तः। तस्मात् प्रत्यक्षपाठेन प्रधानानन्तरं श्रुतानुपहोमाननुष्ठाय पश्चान्नारिष्टहोमाः कार्या इति **प्राप्तम्**। तदाह **सूत्रे, मुख्यनान्तर्यमात्रेय** इति। उपहोमानां प्रधानानन्तर्यमात्रेयो मन्यत इत्यर्थः।

सिद्धान्तस्तु, नक्षत्रेष्टिरूपा विकृतिर्विधीयमाना स्वोपकारकमङ्गजातमपेक्षमाणा प्रत्यक्षवाक्यबोधितं सन्निहितमपि वैकृतमुपहोमादिकमक्लृप्तोपकारतया कल्प्योपकारत्वेन तदन्वया-त्प्रागेव चोदकेन वैकृतविधिवाक्यैकवाक्यतापन्नेन प्रापितं , प्रकृतौ क्लृप्तोपकारकं प्राकृताङ्गभूतं नारिष्टहोमादिकमादाय निराकांक्षा सती पश्चादुत्थापिताकांक्षया वैकृतहोमादिकं गृह्णातीति, तथा प्राकृतक्रमानुरोधेनैव नारिष्टहोमानन्तरमुपहोमाः कार्या इति।

तदाह **सूत्रे, प्रकृतेः** प्राकृताङ्गस्य **पूर्वोक्तत्वादपूर्वमङ्गमन्ते स्यात्**। कथं प्राकृताङ्गस्य पूर्वत्वमिति चेत् प्राकृताङ्गैरंशत्रयविशिष्टतया भावनायाः पविपूर्णत्वेन **अचोदितस्य** वैकृतपदार्थरूपशेषाम्नानं न हीति।

सूत्रान्तरञ्च **अन्ते तु बाधरायणस्तेषां प्रधानशब्दत्वादिति**। प्रधानवैकृतविधिना तेषां प्राकृताङ्गानां गृहीतत्वादित्यर्थः। **फलन्तु,** प्राकृतक्रमेणानुष्ठानमिति।

इत्यष्टमं नारिष्टहोमस्योपहोमपूर्वताधिकरणम् (सूत्राणि १७-२०)

अथ नवमं विदेवनादीनामभिषेकपूर्वताधिकरणम्

कृतदेशात्तु पूर्वेषां स देशः स्यात्तेन प्रत्यक्षसंयोगान्न्यायमात्रमितरत्॥ २१॥

अन्ते तु बादरायण इति पूर्वोक्तन्यायापवादात्सङ्गतिः। राजसूयेऽभिषेचनीयाख्यसोमयागं विधायानन्तरं विदेवनराजन्यजयशौनः शेफाख्यानाभिषेषाः ''अक्षैर्दीव्यति'' ''राजन्यं जिनाति'' ''शौनःशेफमाख्यापयति'' ''अभिषिच्यते'' इति विधिभिः क्रमेणाम्नाताः।

तत्राभिषेकोऽभिषेचनीयाख्यसोमयागे चोदकप्राप्तप्राकृताङ्गमध्ये ''माहेन्द्रस्तोत्रं प्रत्यभिषिच्यते'' इत्यपकृष्टः । सोऽपकृष्यमाणः प्राचो विदेवनादीनपकर्षत्युत नेति **सन्देहः** ।

पूर्वपक्षस्तु, पूर्वपादे **अङ्गानां मुख्यकालत्वादि**त्यत्र प्रकृतौ क्लृप्तक्रमाबाधाय प्रयाजापकर्षस्तदन्तापकर्ष इत्युक्तावपि **तथाऽपूर्वमि**त्यत्र पूर्वेद्युरमावास्यायामपकृष्यमाणा वेदिरपूर्वतया प्रागक्लृप्तक्रमत्वेन तन्मात्रापकर्षः साधितः । तथेहाप्यपूर्वत्वेन प्रागक्लृप्तक्रमतया तन्मात्रापकर्षः । अन्येषां विदेवनादीनां **अन्ते बाधरायण** इति प्रागुक्तन्यायेनाभिषेचनीयप्राकृत-सर्वाङ्गोत्तरकालं कर्तव्यतेति ।

सिद्धान्तस्तु, अभिषेकापकर्षवेलायां प्रयाजवद्विदेवनादीनां क्रमस्य प्रागक्लृप्तत्वेऽपीहैव क्रमस्य कल्प्यत्वात्तेषाञ्चाभिषेकात्पूर्वभावित्वरूपक्रमस्य प्रत्यक्षपाठेन क्लृप्तस्य नारिष्टन्यायेन प्राप्तादानुमानिकात् प्राकृताङ्गपश्चाद्भावित्वरूपक्रमादपि प्रबलस्य त्यागायोगात्प्रयाज-वत्तदन्तापकर्षः ।

तदाह **सूत्रे, कृतदेशात्** ''माहेन्द्रस्तोत्रं प्रत्यभिषिच्यते'' इति विहितदेशा-दभिषेकात्**पूर्वेषां** विदेवनादीनां **स एवा**भिषेकदेश एव **देशः स्यात्** । तेन अभिषेकेण **प्रत्यक्षसंयोगात्** । इतरत् प्राकृताङ्गपश्चाद्भावित्वं **तु न्यायमात्रं** न्यायप्राप्तम् । न प्रत्यक्षापाठप्राप्तमिति ।

फलन्तु, विदेवनादेरभिषेकदेश एव तत्पूर्वमनुष्ठानमिति ।

इति नवमं विदेवनादीनामभिषेकपूर्वताधिकरणम्

अथ दशमं सावित्रहोमादीनां दीक्षणीयात्पूर्वप्रयोगाधिकरणम्

प्राकृताच्च पुरस्ताद्यत् ॥ २२ ॥

पूर्ववैषम्येणात्र शङ्कनात्सङ्गतिः ॥ ''य एवं विद्वानग्निं चिनुते'' इत्युक्ताग्निचयनप्रकरणे

''सावित्राणि जुहोति'' इति सावित्रहोममुक्त्वा ततो महता प्रबन्धेन उखासंभरणाद्यपूर्वपदार्थानाम्नाय पश्चात् ''अग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाणः'' इत्यदिना दीक्षणीयादयः प्राकृताः सगुणाः श्रुताः। तत्र दीक्षमीयादीन् कृत्वा सावित्रादयः कार्याः, उत विपरीतमिति **सन्देहः**।

पूर्वपक्षस्तु, पूर्वत्र विदेवनादीनामनन्यथासिद्धप्रत्यक्षपाठेनाभिषेकेणैव क्रमकल्पनेऽपीह दीक्षणीयादीनां पश्चात्पाठेपि तस्य गुणविध्यर्थत्वेनान्यथासिद्धतया पश्चात्कर्तव्यत्वाप्रापकत्वात्क्लृप्तोकारप्राकृताङ्गप्रापकवाक्येन प्रधानवाक्येनैकवाक्यतापन्नेन प्रापितैः क्लृप्तोपकारैरङ्गैः प्रागन्वयात्तेषां पूर्वमनुष्ठानम्। सावित्रादीनां अन्ते बादरायणः इति न्यायेन पश्चादनुष्ठानमिति।

सिद्धान्तस्तु, गुणार्थत्वेपि पाश्चात्यप्रत्यक्षपाठस्याऽनुमानिकचोदकादपि प्रबलत्वेन तदवगतक्रमस्य बाधायोगात्सावित्रहोमानन्तरमेव दीक्षणीयादेरनुष्ठानमिति।

तदाह **सूत्रे, यत्** प्राकृतादङ्गात्पुरस्तात्पठ्यते तत्प्राकृतात्पुरस्तादनुष्ठेयमिति। **फलन्तु** यथापाठक्रममनुष्ठानमिति।

इति दशमं सावित्रहोमादीनां दीक्षणीयात्पूर्वप्रयोगाधिकरणम्

अथैकादशं याजमानसंस्काराणां रूक्मप्रतिमोकात्पूर्वभाविताधिकरणम्

सन्निपातश्चेद्यथोक्तमन्ते स्यात्॥ २३॥

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः। अग्निचयन एव दीक्षणीयादेरूर्ध्वं ''रुग्ममन्तरं प्रतिमुञ्चतेऽमृतमेव'' इत्यादिना रुग्मप्रतिमोचनशब्दितरुग्मधारणादिकमाम्नातम्। उरवास्थितोऽग्निः शिक्ये स्थापितः कण्ठे धार्यमाणो यथोरःप्रदेशं न दहति तथा व्यवधायकत्वेन वक्षसि लम्बमानः कण्ठे धृतः सौवर्णाभरणविशेषो रूग्मशब्दार्थ। प्रतिमोचनं तद्धारणम्। प्रकृतौ च दीक्षणीयानन्तरं वपनादयो यजमानसंस्काराः क्रियन्ते। ते चेह चोदकप्राप्ताः। तत्र सन्देहः, रुग्मप्रतिमोचनादि कृत्वा दीक्षितसंस्काराः कार्याः, उत विपरीतमिति।

पूर्वपक्षस्तु, पूर्वन्यायेन प्रत्यक्षपाठस्य बलवत्त्वाच्चोदकप्राप्तं वपनादेर्यजमानसंस्कारस्य दीक्षणीयानन्तर्यं बाधित्वा रुग्मप्रतिमोचनादयः कार्यतया प्राप्ता इति।

सिद्धान्तस्तु, प्रकृतौ यजमानसंस्काराणां दीक्षणीयानन्तर्यं क्लृप्तम्। रुग्मप्रतिमोचनादेः पाठेन कल्प्यं तदानन्तर्यम्। दीक्षणीयानन्तरश्चेह प्रकृताविव संस्कारा एवोपस्थाप्यन्ते, चोदकेन यथाप्रकृति प्राप्यन्ते चेति दीक्षणीयानन्तरं यजमानसंस्काराः कार्याः। पश्चात्तु रुग्मप्रतिमोचनादिकं कार्यम्। तावतापि दीक्षणीयानन्तरपाठस्य व्यवधानेनानुष्ठानेप्युपपत्तेः। सावित्रहोमादेस्तु पश्चादनुष्ठाने पूर्वपाठो बाधितः स्यादिति पूर्ववैषम्यान्नात्र पूर्वन्यायः।

तदाह **सूत्रे**, प्रकृतिक्लृप्तक्रमैर्दीक्षणीयादिभिर्दीक्षितसंस्कारादीनां **सन्निपात उपस्थितिश्चेद्यथोक्तं** प्रकृतौ श्रुतं रुग्मप्रतिमोचनादिकम**न्ते स्यादिति**।

फलन्तु, यजमानसंस्कारकरणानन्तरं रुग्मधारणम्।

इत्येकादशं याजमानसंस्काराणां रुग्मप्रतिमोक त्पूर्वमाविताधिकरणम्

इति श्रीभाट्टसंग्रहे सर्वतन्त्रस्वतन्त्रश्रीसुधीन्द्रतीर्थगुरुपादशिष्य
श्रीराघवेन्द्रतीर्थयतिसार्वभौमकृते पञ्चमाध्यायस्य द्वितीयः पादः

अस्मिन् पादे	अधिकरणानि	११	सूत्राणि	२३
आदितः	अधिकरणानि	३३६	सूत्राणि	८७४

अथ भाट्टसंग्रहे पञ्चमाध्याये तृतीयः पादः

अथ पथमं प्रयाजादीनामेकादशादिसंख्यायाः सर्वसम्पाद्यताधिकरणम् (सूत्रे १-२)

हरिः ॐ । पूर्वपादे प्रकृतिविकृतिसाधारण्येनानेकप्रधानसमवाये क्रमविशेषश्चिन्तितः । अत्र पादे विकृतिषु प्राकृतानां पदार्थानां विवृद्धिश्रुतौ फलविशेषश्चिन्त्यत इति **पादभेदः** पूर्वानन्तर्यलक्षण**सङ्गति**श्चेति ध्येयम् ।

विवृद्धिः कर्मभेदात्पृषदाज्यवत्तस्य तस्योपदिश्येत ॥ १ ॥

(अपि वा सर्वसंख्यत्वाद्विकारः प्रतीयेत ॥ २ ॥)

उत्तराधिकरणचिन्तोपयुक्ततयेदमारभ्यत इत्यौपोद्घातिकी **सङ्गति**रस्य ध्येया । अग्नीषोमीयपशौ चोदकप्राप्तेषु पञ्चसु प्रयाजेषु ''एकादश प्रयाजान् यजति'' इति संख्याविवृद्धिः श्रूयते । तत्र किमेकैकस्य एकादशत्वसङ्ख्या सम्पाद्या किं वा प्रत्येकं द्विर्द्विरावृत्तिश्चरमस्य त्रिरित्येवमेकादशत्वसंख्या सम्पाद्येति **सन्देहः** ।

पूर्वपक्षस्तु, प्रयाजोद्देशेन हि संख्या विधीयते ''ये प्रयाजास्ते एकादश भवन्ति'' इति । उद्देश्यविशेषणञ्च साहित्यं ग्रहैकत्ववदविवक्षितमिति प्रतिप्रधानं गुणस्याङ्गीकार्यत्वात्प्रत्येकमेव तावती संख्या सम्पाद्येति ।

तदाह सूत्रकारः, **कर्मणां भिन्नत्वत्** उद्देश्यसाहित्यस्य चाविवक्षितत्वात्**तस्य तस्य** प्रत्येकमेव **विवृद्धिः** संख्याभिवृद्धिरुपदिश्येत । पृषदाज्यवत् यथा '' पृषदाज्येनानुयाजान् यजति'' इति पृषदाज्यमनुयाजानां प्रत्येकमेवोपदिश्यते । न समुदाये । तद्वदिति ।

सिद्धान्तस्तु, नात्र प्रयाजानां स्वरूपोद्देश्येन संख्या विधीयते । एकैकशः समुदितानां वैकादशत्वसम्पादनायोगात् । किन्तु प्रयाजलक्षितप्रयोगोद्देशेन । ते च तन्त्राभिधानेन सहावगताः सहिता एव प्रयोगं लक्षयन्ति । न प्रत्येकम् । तावतापि संख्यान्वयसिद्धेः । तस्मात्पञ्चप्रयाजान्

द्विरावृत्त्य पुनश्चरमस्य सकृदावृतावेकादशत्वं सम्पाद्यते इति , सर्वसम्पादिनी संख्या न प्रत्येकम् । न चैवं पृषदाज्येप्येवं स्यादिति शंक्यम् । सङ्ख्याया अनेकवृत्तिस्वभावतया समस्तोप-लक्षितैकप्रयोगद्वारा समस्तोपकारकत्वसम्भवात् पृषदाज्यस्यानेकवृत्तिस्वभावत्वाभावेन तन्त्रेण समस्तोपकारकत्वासम्भवादिति । एवं ''एकादशानुयाजान् यजति'' इत्यत्रापि ध्येयम् । तथा ''चातुर्मास्येषु नव प्रयाजान् यजति । नवानुयाजान् यजति'' इत्यत्र । तथा अग्नौ श्रुते ''षडुपसदः'' इत्यत्रापि चोदकप्राप्तानां तिसृणामुपसदां षट्कसंख्या द्विर्द्विरावृत्त्या समुदायसम्पाद्या, न प्रत्येकश इति ध्येयम् ।

फलन्तु, प्रयाजानां प्रत्येकं एकादशकृत्वोऽभ्यासः **पूर्वपक्षे** । **सिद्धान्ते** तु समस्तानामेवेति ।

इति प्रथमं प्रथमादीनां तिसृणामुपसदां स्वस्थानाऽवृत्त्यधिकरणम्

स्वस्थानात्तु विवृध्येरन् कृतानुपूर्व्यत्वात् ॥ ३ ॥

पूर्वत्राग्नौ श्रुते '' षडुपसदः '' इति वाक्ये प्रतीतोपसदां षट्कसंख्या सर्वसम्पादिनीत्युक्तम् । अत्र चोदकप्राप्तानां तिसृणामुपसदामभ्यासः किं दण्डकलितवदावृत्तिरुत स्वस्थान एव विवृद्धिरिति चिन्तनात्सङ्गतिसन्देहौ ।

पूर्वपक्षस्तु, यथा दण्डेन भूप्रदेशं संमिमानः पुरुष आमूलाग्रं कृत्स्नं दण्डं पुनः पुनः पातयति तथा तिस्र उपसदः सकृदावृत्त्य पुनर्द्वितीयवारमप्यावर्त्या इति दण्डकलितवदावृत्तिः । लोके ''त्रिवारमनुवाकः पाठ्यताम्'' इत्यादौ दण्डकलितवदावृत्तेर्दर्शनादिति ।

सिद्धान्तस्तु, प्रकृतौ हि दीक्षानन्तरभाविनि दिने होतव्या प्रथमोपसत् । तत ऊर्ध्वदिने द्वितीया । ततोप्यूर्ध्वदिने तृतीया । तदनन्तरं प्रवर्ग्योद्वासनादीति क्रमः । स एव च क्रमोऽत्र चोदकेन प्राप्तः । ता एता उपसदः सकृदनुष्ठाय पुनरप्यादितोऽनुष्ठाने प्राकृतक्रमो बाध्येत । प्रथमायाश्चतुर्थत्वस्य प्रवर्ग्योद्वासनादेस्तत्पूर्वभवित्वस्य प्राप्तेः । अतः स्वेस्थान एव

द्विर्द्विरभ्यसितव्येति स्वस्वस्थानविवृद्धिरेव । न दण्डकलितवदावृत्तिः । तदाह **सूत्रे, स्वस्थान** एवोपसदो विवर्धेरन् । **कृतानुपूर्व्यत्वात्** प्रकृतौ क्लृप्तक्रमत्वादिति ।

फलन्तु, स्वस्थान एव द्विर्द्विरनुष्ठानम् । पूर्वत्र प्रयाजानुयाजानामपि प्रकृतत्वे उपसदामेवात्र चिन्तायोग्यत्वम् । नान्येषामिति **तन्त्ररत्ने** व्यक्तम् ।

इति द्वितीयं प्रथमादीनां तिसृणामुपसदां स्वस्थानाऽवृत्त्यधिकरणम्

अथ तृतीयं सामिधेनीष्वागन्तूनामन्ते निवेशाधिकरणम् (सूत्राणि ४-६)

समिध्यमानवतीं समिद्धवतीञ्चान्तरेण धाय्याः स्युर्द्यावापृथिव्योरन्तरालसमर्हणात् ॥ ४ ॥

(तच्छब्दो वा ॥ ५ ॥ उष्णिक्ककुभोरन्ते दर्शनात् ॥ ६ ॥)

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः । दर्शपूर्णमासयोः सामिधेनीषु ''एकविंशतिमनुब्रूयात् प्रतिष्ठाकामस्य'' इति संख्याविवृद्धिः श्रूयते । तत्र पठिताः सामिधेन्य ऋचः ''प्र वो वाजा अभिद्यवः'' इत्याद्या एकादशैव ''त्रिः प्रथमामन्वाह । त्रिरुत्तमाम्'' इति विधानादाद्यन्तयोस्त्रिरावृत्त्या ''पञ्चदश सामिधेनीरनुब्रूयात्'' इति वचनविहितं पाञ्चदश्यं सम्पाद्यते । अवशिष्टानां षण्णामृचां दाशतयीपठितानामागमनेन संख्यापूरणमिति दशमे **अभ्यासेन संख्यापूरणं सामिधेनीष्विति** पञ्चमपादीयनये वक्ष्यते । तत्राऽगन्तूनां षण्णामप्यन्ते निवेशः, किं वा सामिधेनीनामृचां मध्यस्थयोः समिध्यमानवतीसमिद्धवतीशब्दितयोः ''समिध्यमानो अध्वरे'' इति ''समिद्धो अग्न आहुतः'' इति ऋचोर्मध्ये निवेशः, उत आगन्तूनां मध्ये धाय्याशब्दितानामेव तयोर्मध्ये निवेशोऽन्यासामन्ते निवेश इति त्रेधा **सन्देहः** ।

पूर्वपक्षस्तु, यथा पूर्वत्र प्रकृतौ क्लृप्तक्रमानुरोधेनोपसदां स्वस्थानविवृद्धिरेवमत्रापि प्रकरणपठितानामृचां क्लृप्तक्रमानुरोधेन आनीयमानानां **अन्ते बादरायण** इति न्यायेन तेभ्योऽन्ते निवेश इत्येकः । ''इयं वै समिध्यमानवती , असौ समिद्धवती, यदन्तरा धाय्या'' इति वाक्ये

समिध्यमानवतीसमिद्धवतीशब्दितयो ऋचोरियमिति असाविति पदाभ्यां पृथिवीत्वेन द्युत्वेन स्तुतिं कृत्वा धाय्यमानतया धाय्यानामकानामागन्तूनामृचामन्तरापदेनाऽकाशत्वेन श्रुतस्तवनान्वयार्थं ''समिध्यमानवतीसमिद्धवत्योरन्तराले धाय्या निवेशनीया'' इति विधिकल्पनात्, आगन्तूनां षण्णामप्यासां पाय्यसान्नाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीष्विति पाणिनीसूत्रे सामिधेनीष्विति सामान्यशब्देन धाय्यमानत्वयोगेन धाय्याशब्दार्थत्वप्रतीत्या सर्वासामप्यागन्तूनां समिध्यमानवतीसमिद्धवतीनामकर्चोर्मध्ये निवेश इति **द्वितीयः** ।

तदाह **सूत्रे, समिध्यमानवतीमित्यादि** । ''अन्तराऽन्तरेण युक्ते'' इति द्वितीया । तयोर्मध्ये **धाय्या स्युरन्तरालसमर्हणात्** अन्तरालत्वेन संस्तवादिति ।

सिद्धान्तस्तु, धाय्याशब्दो न धाय्यामानत्वनिमित्तकः । स्तुतशस्त्राद्यर्थतयाऽधीयमानास्वृक्षु धाय्याशब्दाभावात् । येन षण्णामप्यागन्तुकानां धाय्यात्वं स्यात् । किन्तु ''पृथुपाजवत्यौ धाय्ये'' ''उष्णिगनुष्टुभौ धाय्ये'' इति वेदे धाय्याशब्दार्थत्वेनोक्तानां ''पृथुपाजा अमर्त्यवः'' इत्यादिकानामेव । तथा च धाय्याशब्दितानामेव तयोरष्टमीनवमीऋचोर्मध्ये निवेशः । अन्यासां सर्वान्त इति । तदा पाणिनिस्मृतिरपि नागन्तुकसामिधेनीमात्रपरा । अपि तु ''पृथुपाजवत्यौ धाय्ये'' इति वैदिकप्रयोगानुसाराद्विशेषनिष्ठैव । उक्तं हि तत्र **सूत्रे वृत्तौ** ''धाय्येति न सर्वसामिधेन्युच्यते । किं तर्हि, काश्चिदेव'' इत्यादि । **मञ्जर्यांश्च**, समिध्यमानवन्तीं समिद्धवतीमन्तरेण विकृतिषु प्रक्षिप्यमाणा ''पृथुपाजा अमर्थ्यवः'' इत्यादिका इति ।

फलन्तु, धाय्याशब्दितानामेवोक्तयोः समिध्यमानवत्यादिकयो ऋचोर्मध्येऽनुवचनम् । अन्यासामन्त इति व्यक्तम् ।

इति तृतीयं सामिधेनीवागन्तूनामन्ते निवेशाधिकरणम् (सूत्राणि ४-६)

अथ चतुर्थं बहिष्पवमाने आगन्तूनां पर्यासोत्तरकालताधिकरणम् (सूत्राणि ७-१२)

स्तोमविवृद्धौ बहिष्पवमाने पुरस्तात्पर्यासादागन्तवः

स्युस्तथा हि दृष्टं द्वादशाहे ॥ ७ ॥

(पर्यास इति चान्ताख्या ॥ ८ ॥ अन्ते वा तदुक्तम् ॥ ९ ॥ वचनात्तु द्वादशाहे ॥ १० ॥ अतद्विकारश्च ॥ ११ ॥ तद्विकारेप्यपूर्वत्वात् ॥ १२ ॥)

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः। ज्योतिष्टोमे हि पकृतौ बहिष्पवमानस्तोत्रे क्रमात् स्तोत्रीयेति अनुरूपेऽति पर्यासेतिनामकास्त्रयस्त्यृचा भवन्ति। "उपास्मै गायता" इत्यादिरेकः। "दविद्युतत्या रुचा" इत्यादिर्द्वितीयः। "पवस्व" इत्यादिस्तृतीयः। ते, त्र्यृचेषूपरि गानेन त्रिवृत्स्तोमोपि भवति। स च बहिष्वमानो विकृतावतिरात्रे चोदकेन प्राप्तः। तत्र प्राकृतं त्रिवृत्स्तोमं बाधितुमेकविंशादिस्तोमा विहिताः "एकविंशेनात्रिरात्रेण प्रजाकामं याजयेयुस्त्रिणवेनौजस्कामं, त्रयस्त्रिंशेन प्रतिष्ठाकामम्" इति। तत्राद्ये चत्वारस्त्यृचा आनेयाः। द्वितीये षट् त्यृचाः। त्रयस्त्रिंशत्स्तोमपूरणायाष्टौ त्र्यृचा इति ऋगागमनेन संख्यापूरणमिति दशमपञ्चमपादे बहिष्पवमाने ऋगागमः सामैकत्वादित्यत्र वक्ष्यते। तथा च तत्र सन्देहः, किमागन्तूनामृचामन्ते निवेशः किं वा पर्यासनामकात्प्राकृतात्प्राक् त्र्यृचादिति।

पूर्वपक्षस्तु, द्वादशाहावयवभूतस्य पृष्ठ्यषडहस्य द्वितीयेऽहनि पञ्चदशस्तोमके वृषन्शब्दवतीनामागन्तूनामृचां पर्यासाख्यप्राकृतोत्तमत्र्यृचात्प्राक्तनत्वदर्शनादत्रापि विवृद्धस्तोमकेऽतिरात्रे आगन्तूनामृचां प्राक्पर्यासान्निवेशः स्यात्। यथा हि पूर्वत्र "इयं समिध्यमानवती" इत्याद्यर्थवादकल्पितविधिबलेन धाय्यानां समिद्धवत्याः प्राङ्निवेशस्तथेति। तथा च **सूत्रं, स्तोमेत्यादि**। निगदव्याख्यानमेतत।

सिद्धान्तस्तु, द्वादशाहेपर्यासात्प्रागागन्तूनां दर्शनादिहापि तथेति यदुक्तं तन्न। वैषम्यात्। द्वादशाहे हि स्तोत्रीयानुरूपौ क्लृप्तौ हि भवतः। "वृषण्वन्तस्त्यृचा भवन्ति, त्रयृच उत्तमः पर्यासः" इत्याम्नातवचनेन "चोदकप्राप्तानुरूपपर्याससंज्ञकयोस्त्र्यृचयोर्मध्ये वृषन्शब्दयुक्तास्त्यृचाः कर्तव्याः। पश्चात्पर्याससंज्ञकस्त्र्यृचः" इति विधानेन तत्र तथात्वेपीहातिरात्रे चोदकप्राप्तबहिष्पवमानमध्ये निवेशे विधेरभावात् **अन्ते तु बादरायण** इति न्यायेनाऽगन्तूनामन्ते निवेशः। तदाह **सूत्रे, वचनाद्द्वादशाहे** इति।

फलन्तु, आगन्तूनामन्तेऽनुष्ठानम् ।

इति चतुर्थं बहिष्पवमाने आगन्तूनां पर्यासोत्तरकालताधिकरणम् (सूत्राणि ७-१२)

अत पञ्चमं तत्रैवागन्तूनां साम्नां मध्ये निवेशाधिकरणम् (सूत्रे, १३-१४)

अन्ते तूत्तरयोर्दध्यात् ॥ १३ ॥

(अपि वा गायत्रीबृहत्यनुष्टुप्सु वचनात् ॥ १४ ॥)

पूर्वन्यायेन शङ्कनात्सङ्गतिः । पूर्वोदाहृतेऽतिरात्रे माध्यन्दिनपवमानार्भवपवमानयोश्चोदकप्राप्तौ पञ्चदशसप्तदशस्तोमौ बाधितुमेकविंशादिविवृद्धस्तोमो वचनादनुष्ठीयते । तत्र बहिष्पवमान इव ऋगागमनेन न संख्यापूरणम् । किन्तु सामागमनेन । तथैव दशमे पञ्चमे पादे **स्तोमविवृद्धौ प्राकृतानामित्यत्र** वक्ष्यते । तत्र **सन्देहः**, आगम्यमानानां साम्नामन्ते त्र्यृचे निवेशेन गानमुत मध्ये गायत्रीबृहत्यनुष्टुप्स्विति ।

पूर्वपक्षस्तु, यथा बहिष्पवमाने आनीयमानानामृचामन्ते निवेशस्तथा तदुत्तरयोर्माध्यन्दिनार्भवपवमानयोरप्यानीयमानानां साम्नामन्ते त्र्यृचे निवेशः । **अन्ते तु बादरायण** इति न्यायादिति ।

तदाह **सूत्रे**, बहिष्पवमानादुत्तरयोर्माध्यन्दिनार्भवपवमानयोरानीयमानानि सामानि **अन्ते** त्र्यृचे **दध्यादिति** ।

सिद्धान्तस्तु, ''त्रीणि ह वै यज्ञस्योदराणि गायत्री बृहत्यनुष्टुप्च । अत्र ह्येवावपन्ति । अत एवोद्वपन्ति'' इत्यनारभ्याधितवचने ''सोमस्य विवृद्धये साम्नामावापः ह्रासायोद्वापश्चेत्येतावावापोद्वापौ गायत्र्यादिच्छन्दस्कास्वृक्षु । नान्यत्र'' इत्युक्तत्वान्माध्यन्दिनार्भपवमानयोर्यथाक्रमं ''उच्चा ते जातमन्धसः'' इति ''स्वादिष्ठया'' इति श्रुयोर्गायत्रीछन्दस्क-योर्गानमिति । तदाह **सूत्रे, अपि वा गायत्रीबृहत्यनुष्टुप्सु वचनादिति** ।

फलन्तु, गायत्र्यादिषु गानम्।

इति पञ्चमं तत्रैवागन्तूनां साम्नां मध्ये निवेशाधिकरणम् (सूत्रे १३-१४)

अथ षष्ठं ग्रहेष्टकादीनां क्रत्वग्निशेषताधिकरणम् (सूत्रे १५-१६)

ग्रहेष्टकमौपानुवाक्यं सवनचितिशेषः स्यात् ॥ १५ ॥

(क्रत्वग्निशेषो वाचा चोदितत्वादचोदनानुपूर्वस्य ॥ १६ ॥)

उत्तरचिन्तोपयुक्ततयेदमारभ्यते। ''अंशुं गृह्णाति'' ''अदाभ्यं गृह्णाति'' इति ''चित्रिणीरुपदधाति'' ''वज्रिणीरुपदधाति'' इत्यनारभ्य श्रुतं ग्रहेष्टकं यथाक्रमं सवनचित्योः शेष उत यागाग्न्योरङ्गमिति **सन्देहे**, ग्रहैः सवननिष्पादनस्येष्टकाभिरग्निनिष्पादनस्य प्रत्यक्षतया तदुपकारकत्वेन तच्छेषतेति **प्राप्तम्**।

तदाह **सूत्रे**, औपानुवाक्यं उपानुवाक्यसमाख्याने तृतीयकाण्डे पठितं **ग्रहेष्टकं सवनचितिशेषस्स्यादिति**।

सिद्धान्तस्तु, सवनचित्योर्निष्फलत्वेन क्रतोरग्नेश्च फलवत्त्वेन फलवत एवाङ्गाकांक्षायां फलवदफलन्यायेन क्रत्वग्न्योरेवाङ्गं ग्रहेष्टकम्। ''इष्टकाभिरग्निं चिनुते'' इति वाचनिकमेव चितिसमुदायरूपाग्न्यङ्गत्वमिष्टकानाम्। तथा **सूत्रम्, क्रत्वग्निशेषो वाचा चोदितत्वादिति**।

फलन्तु, पूर्वपक्षे प्रतिचिति ग्रहेष्टकस्याऽवृत्तिः। **सिद्धान्ते तु**, क्रत्वग्न्यङ्गत्वात् सकृदेवानुष्ठेयमिति।

इति षष्ठं ग्रहेष्टकादीनां क्रत्वग्निशेषताधिकरमम् (सूत्रे १५-१६)

अथ सप्तमं चित्रिण्यादीनां मध्यमचितावुपधानाधिकरणम् (सूत्राणि १७-१९)

अन्ते स्युरव्यवायात् ॥ १७ ॥

(लिङ्गदर्शनाच्च ॥ १८ ॥ मध्यमायां तु वचनाद्ब्राह्मणवत्यः ॥ १९ ॥)

पूर्वत्र सकृदेवानुष्ठानमिति स्थितावत्र क्रमचिन्तनात्**सङ्गतिः**। किं चित्रिण्यादीनामिष्टिकानामुत्तमायां पञ्चम्यां चितावुपधानमुत मध्यमायामिति **सन्देहे**, अनारभ्याधीतानां चित्रिण्यादीनां मध्ये उपधाने कृते सति प्रकरणाधीतानां क्लृप्तप्रमाणानामिष्टकानामन्योन्यं व्यवधानं स्यात्। अतोन्तिमचितावेव निवेश इति **प्राप्तम्**। तदाह **सूत्रे, अन्ते** स्युरव्यवायादिति।

सिद्धान्तस्तु, ''यां काञ्चिद्ब्राह्मणवतीमिष्टकामभिजानीयात्तां मध्यमायां चितौ'' इत्यनारभ्याधीतवाक्येन ''चित्रिणीरुपदधाति'' इत्यादिब्राह्मणशब्दितविधायकवाक्यवर्ती तद्विहितामिति यावत्। मध्यमायां चितौ निदध्यादित्युक्तत्वाद्वचनबलात्क्लृप्तक्रमबाधेन मध्यमायां चितौ निधानमिति। तदाह **सूत्रे, मध्यमायान्तु वचनाद्ब्राह्मणवत्य इति**।

फलन्तु, मध्यमचितौ चित्रिण्यादरुपधानम्।

इति सप्तमं चित्रिण्यादीनां मध्यमचितावुपधानाधिकरणम् (सूत्राणि १७-१९)

अथाष्टमं लोकम्पृणातः पूर्व चित्रिण्याद्युपधानाधिकरणम्

प्राग्लोकम्पृणायास्तस्याः सम्पूरणार्थत्वात्॥ २० ॥

पूर्वत्र चित्रिण्यदीनां मध्यमायां चिताविति स्थितौ तत्रापि क्रमविशेषचिन्तात्रेति **सङ्गतिः**। किं तासां प्राकरणिकीनामिष्टकानामन्ते निधानमुत लोकम्पृणाख्येष्टकायाः पूर्वमिति **सन्देहे**, प्राकरणिकक्लृप्तक्रमाबाधाय **अन्ते बादरायण** इति न्यायेन लोकम्पृणायाः प्रकरणपठितासु चरमाया ऊर्ध्वं चित्रिण्यादीष्टकानामुपधानमिति **पूर्वपक्षः**।

सिद्धान्तस्तु, ''लोकं पृण, छिद्रं पृण'' इति मन्त्रेणोपधीयमानेष्टकाया लोकम्पृणायास्तस्याः कर्मण्यूनत्वादिदोषपरिहारेण सम्पूर्तिहेतुत्वमुक्तमन्त्रलिङ्गादवगम्यते। ब्राह्मणेप्येवं पठ्यते ''यदेवास्योनं यच्छिद्रं तदेतया परिपूरयति, लोकं पृण च्छिद्रं पृण'' इति। यद्येतस्य इष्टकाया

ऊर्ध्वं चित्रिण्यादय उपधीयेरंस्तदा चित्रिण्यादिगते ऊनत्वछिद्रत्वे न परिपूर्येयाताम् । तस्माल्लोकम्पृणेष्टकातः पूर्वं चित्रिण्यादेर्निवेश इति ।

तदाह **सूत्रे, लोकम्पृणायाः प्रक्** चित्रिण्यादेर्निवेशस्स्यात् । **कुतः ? सम्पूरणार्थत्वादिति । फलन्तु,** व्यक्तम् ।

इत्यष्टमं लोकम्पृणातः पूर्वं चित्रिण्याद्युपधानाधिकरणम्

अथ नवमं इष्टिसंस्कृताग्नावग्निहोत्राद्यनुष्टानाधिकरणम् (सूत्राणि २१-२५)

संस्कृते कर्म संस्काराणां तदर्थत्वात् ॥ २१ ॥

(अनन्तरं व्रतं तद्भूतत्वात् ॥ २२ ॥ पूर्वश्च लिङ्गदर्शनात् ॥ २३ ॥ अर्थवादो वाऽर्थस्य विद्यमानत्वात् ॥ २४ ॥ न्यायविप्रतिषेधाच्च ॥ २५ ॥)

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः । अग्न्याधानप्रकरणे सन्ति पवमानेष्टयोऽग्निसंस्कारार्थाः । ताश्चाधानादूर्ध्वमुत्कृष्यन्ते । ''द्वादशसु रात्रिष्वनुनिर्वपेत्'' इति कालविधिश्रवणात् । ताभ्यः पुरा द्वादशसु दिनेष्वग्निहोत्रादिकमनुष्ठेयमुत नेति **सन्देहे,** चित्रिण्यादयो लोकम्पृणायाः पूर्वं यथा क्रियन्ते तथाग्निहोत्रादिकमपि पूर्वमनुष्ठेयमिति **प्राप्तम् ।** आधानमात्रेण आहवनीयाद्यग्नेर्निष्पन्नत्वान्निष्पन्ने चाग्नौ तत्र कर्तव्यकर्मणां विलम्बे हेत्वभावादिति ।

सिद्धान्तस्तु, आधानमात्रेण पवमानेष्टिनिरपेक्षेणाऽहवनीयाद्यग्निर्न निष्पद्यते । तथात्वे तदिष्टिवैयर्थ्यापातात् । न च विकल्पः । ''द्वादशरात्रिष्वनुनिर्वपेत्'' इति आधानमुपजीव्य तदुत्तरकालमेवेष्टीनां विधानात् । सेष्टिः समुच्चित्यैवाधानमग्न्युत्पादिकेतीष्टिभिः संस्कृत एवाग्नौ पश्चादग्निहोत्रादिकर्मानुष्ठानमिति ।

तदाह सूत्रे, पवमानेष्टि**संस्कृत** एवाग्नौ **कर्मा**ग्निहोत्रादिकं स्यात् । **संस्काराणा**मिष्टीनां **तदर्थत्वा**दग्न्यर्थत्वादिति । **फलन्तु,** इष्ट्यनन्तरमग्निहोत्राद्यनुष्ठानम् ॥ ९ ॥

इति नवममिष्टिसंस्कृताग्नावग्निहोत्रानुष्ठानाधिकरणम् (सूत्राणि २१-२५)

अथ दशममग्निचिद्वर्षणादीनादिव्रतानां क्रत्वन्तेऽनुष्ठनधिकरणम् (सूत्राणि २६-२८)

सञ्चिते त्वग्निचिद्युक्तं प्रापणान्निमित्तस्य ॥ २६ ॥

(क्रत्वन्ते वा प्रयोगवचनाभावात् ॥ २७ ॥ अग्रेः कर्म त्वनिर्देशात् ॥ २८ ॥)

पूर्ववैषम्येणात्र शङ्कनात्सङ्गतिः। ''अग्निचिद्वर्षति धावेत्, न स्त्रियमुपेयात्'', इत्यग्निचितो व्रतानि श्रुतानि । तानि किं चयनानन्तरमेव भवन्त्युत क्रत्वन्ते इति **सन्देहे,** अग्निचित्पदेनाग्निचयनस्य निमित्तत्वेनोपादानान्निमित्ते सति नैमित्तिकविलम्बे हेत्वभावात् पूर्वत्राधानानन्तरमेवाग्निहोत्रादेरप्रवृत्तावपि चयनान्तरमेवाग्निचिद्व्रतानि कार्याणीति । तदाह **सूत्रे, सञ्चिते** चयने निर्वृत्तेऽ**ग्निचिद्युक्तं** व्रतजातं प्रवर्तते । कुतः ? **निमित्तभूतस्य** चयनस्य **प्रापणात्**प्राप्तत्वादिति पूर्वपक्षः ।

सिद्धानतस्तु, चयनस्वरूपमात्रस्य निमित्तत्वे हि स्यादेवम् । न चैवम् । किन्तु ''अग्नौ चेः'' इति सूत्रे कर्मकारकेऽग्नावुपपदे चिनोतेः क्विबिति विहितक्विबन्ताग्निचित्पदेन प्रतीता अग्निकर्मकचयनकरणिका भावनैव निमित्तम् । ''चयनेनाग्निं भावयेत्'' इत्यस्य साङ्गक्रतुनिष्पादनानुकूलोपकारवन्तं चयनेन कुर्यादित्यर्थः। तादृशोपकारश्च यावत्क्रतुसमाप्ति अग्नेर्धारणमिति यावत्क्रतुसमाप्ति क्रतुनिष्पत्तिसाधनीभूततावत्पर्यन्ताग्निधारणरूपोपकार-वदग्निभाव्यका भावना क्रतुसमाप्तेः प्रागनिर्वृत्ता निर्वृत्तैव च भावनाभूता सती निमित्तमिति साङ्गक्रतु-समाप्तिकृदेवाग्निचिदिति क्रत्वन्त एवाग्निचिद्वृतानीति । । तदाह **सूत्रे, क्रत्वन्ते वा प्रयोगवचनाभावादिति** ।

फलन्तु, क्रत्वन्ते व्रतानुष्ठानमिति व्यक्तम् ।

इति दशममग्निचिद्वर्षणादिव्रतानां क्रत्वन्तेनुष्ठानाधिकरणम् (सूत्राणि २६-२८)

अथैकादशं दीक्षाया इष्टिसिद्धताधिकरणम् (सूत्राणि २९-३१)

परेणावेदनाद्दीक्षितस्स्यात् सर्वैर्दीक्षाभिसम्बन्धात् ॥ २९ ॥

(इष्ट्यन्ते वा तदर्था ह्यविशेषाच्चार्थसंयोगात् ॥ ३० ॥ समाख्यानञ्च तद्वत् ॥ ३१ ॥)

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः । ज्योतिष्टोमे ''आग्नावैष्णवमेकादशकपालं निर्वपेदीक्षिष्यमाणः'' इति श्रूयते । तथा अन्यदपि ''दण्डेन दीक्षयति'', मेखलया दीक्षयति'', ''कृष्णाजिनेन दीक्षयति'' इति । तत्र किमिष्टिदण्डादिना सर्वेणापि दीक्षितो भवत्युतेष्ट्यैव । दण्डादि तु तद्व्यञ्जकमिति सन्देहः ।

पूर्वपक्षस्तु, यथा पूर्वत्र चयनमात्रं नाग्निचित्त्वे निमित्तं तथा आग्नावैष्णवेष्टिमात्रं न दीक्षितत्वे निमित्तम् । किन्तु दण्डेनेत्यादितृतीयया दण्डकृष्णाजिनयोरपि दीक्षिष्यमाण इति पदसमभिव्याहारात्मकवाक्येनेष्टेरिव दीक्षार्थत्वावगमात्सर्वैः समुच्चितैरेव दीक्षासिद्धिः । न त्विष्टिमात्रादिति ।

तदाह सूत्रे, दण्डादिभिः सर्वैर्दीक्षितः स्यात् । कुतः ? परेणावेदनात् दण्डादिसम्बन्धेभ्यः परस्तादेव ''अदीक्षिष्टायं ब्राह्मणः'' इति दीक्षितत्वेनावेदनात् । तथा ''दण्डेन दीक्षयति'' इत्यादिना दण्डादिभिः सर्वैर्दीक्षाय अभिसम्बन्धाच्चेति ।

सिद्धन्तस्तु, इष्टिरेव दीक्षार्था । न दण्डादिः । इष्टेः क्रियारूपत्वेन दीक्षारूपसंस्कार-हेतुत्वसम्भवात् । क्रियार्थायां क्रियायामुपपदे विहितलृडन्तदीक्षिष्यमाणपदसमभिव्याहररूपेण वाक्येन दण्डादिनिरपेक्षाया एवेष्टेर्दीक्षार्थत्वविधानाच्च । दण्डादिस्तु द्रव्यरूपो न पुरुषं संस्कर्तुमलमिति दीक्षितत्वाभिव्यञ्जकतया तस्य सार्थक्योपपत्तेरिष्ट्यनन्तरमेव दीक्षितत्वमिति । तदाह सूत्रे, इष्ट्यन्ते वा तदर्था ह्यविशोच्चार्थसंयोगादिति ।

फलन्तु, इष्ट्यनन्तरमेव दीक्षितधर्माणामनुष्ठानम् ।

इत्येकादशं दीक्षाया इष्टिसिद्धताधिकरणम् (सूत्राणि २९-३१)

अथ द्वादशं काम्येष्टीनामनियमेनानुष्ठानाधिकरणम् (सूत्राणि ३२-३६)

अङ्गवत्क्रतूनामानुपूर्व्यम् ॥ ३२ ॥

(न वाऽसम्बन्धात् ॥ ३३ ॥ काम्यत्वाच्च ॥ ३४ ॥ आनर्थक्यान्नेति चेत् ॥ ३५ ॥ स्याद्विद्यार्थत्वाद्यथा परेषु सर्वस्वारात् ॥ ३६ ॥)

पूर्ववैषम्येणात्र शङ्कनात्सङ्गतिः । काम्ययागाः श्रूयन्ते ''ऐन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकामः'' इत्यादयः । तथा नैमित्तिकयागाश्च तस्मिन् काण्डे आम्नाताः ''अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेत्, यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वाऽतिपातयेत्'' इत्यादयः । ते किं यथापाठक्रममनुष्ठेया उत नेति **सन्देहः**,

''दण्डेन दीक्षयति'' इत्यादेरनन्तरपठितानामपि दीक्षितधर्माणां निमित्तवशात्ततः प्रागनुष्ठानेऽपि ऐन्द्राग्नाद्यनन्तरपठितानां न ततः प्रागनुष्ठानं युक्तम् । **क्रमेण वा नियम्येत** इत्यत्राद्यपादे प्रयाजानामङ्गानां यथापाठमनुष्ठानक्रमस्योक्तत्वादिहापि यथापाठं काम्यानां नैमित्तिकानाञ्चानुष्ठानमिति **प्राप्तम्** । तदाह सूत्रे, **अङ्गवत्** प्रयाजवत् **क्रतूनामानुपूर्व्यमिति** ।

सिद्धान्तस्तु, प्रयोगविधिः समिदाद्यङ्गानि विदधत्तेषां युगपदनुष्ठानासम्भवात्क्रमनियम-मन्यतो गवेषमाणः स्वाध्यायविधिविहितं पाठक्रमं पदार्थाङ्गतया विधत्त इति तत्र पाठक्रमाश्रयणेपीह काम्यानां नैमित्तिकानाञ्चैकप्रयोगविधिविधेयत्वाभावान्नानाप्रयोगवचनविधेयानाञ्च मिथः क्रमानपेक्षणान्न कामनियमे प्रमाणमिति पाठस्यादृष्टार्थतया क्रमविधायकत्वाभावादिति । तदाह **सूत्रे, न वा असम्बन्धादिति** ।

फलन्तु, कामोत्पत्तौ काम्यस्य निमित्तोत्पत्तौ च नैमित्तिकस्यानुष्ठानमिति ।

इति द्वादशं काम्येष्टीनामनियमेनानुष्ठानाधिकरणम् (सूत्राणि ३२-३६)

अथ त्रयोदशं यज्ञानामग्निष्टोमपूर्वकताधिकरणम् (सूत्रे ३७-३८)

य एतेनेत्यग्निष्टोमः प्रकरणात् ॥ ३७ ॥

(लिङ्गाच्च ॥ ३८ ॥)

प्रधानक्रतूनां न क्रमनियम इति प्रागुक्तस्येह वचनबलेनापवादात्सङ्गतिः । ज्योतिष्टोमे श्रूयते ''एष वा व प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमो, य एतेनानिष्ट्वाऽथान्येन यजेत, गर्ते पतितमेव तज्जीर्यते, प्र वा मीयते'' इति । गर्ते पतितमुच्छिष्टं पत्रावल्यादिकं यथा पुनर्न क्वाप्युपयुज्यते तथा प्रथमतोऽनुष्ठितं यज्ञान्तरं फलाय नोपयुक्तम् । यजमानश्च तेनापराधेनापमृत्युभाग्भवति इति तदर्थः ।

तत्र सन्देहः, किमेतेनेत्येतच्छब्दोऽग्निष्टोमात्यग्निष्टोमोक्थ्यषोडश्यतिरात्राप्तोर्यामवाजपेय-रूपसप्तसंस्थाकज्योतिष्टोमं निर्दिशति किं वा अग्निष्टोमसंस्थाकमेवेति । विशेषाश्रवणात्सप्तसंस्थाको ज्योतिष्टोम एवैतेनेति परामृश्यत इति प्राप्ते,

सिद्धान्तः, अग्निष्टोमसंस्थातोऽन्यासां कामार्थतया आगन्तुकत्वेन अग्निष्टोमसंस्थाया नित्यतया क्रत्वर्थत्वेन तत्क्रत्वर्थत्वाभावात् नित्याग्निष्टोमसंस्थाकस्यैवैतेनेत्यनेन परामर्श इति।

तदाह सूत्रे, य एतेनेत्येतच्छब्देन अग्निष्टोमः परामृश्यते । अग्निष्टोमसंस्थस्यैव प्रकरणात् सन्निधानादिति ।

फलन्तु, पूर्वपक्षे, सर्वसंस्थाकज्योतिष्टोमानुष्ठानानन्तरं क्रत्वन्तरानुष्ठानम् । सिद्धान्ते तु, अग्निष्टोमसंस्थानुष्ठानानन्तरमेव क्रत्वन्तरानुष्ठानमिति ।

इति त्रयोदशं यज्ञानामग्निष्टोमपूर्वकताधिकरणम् (सूत्रे, ३७-३८)

अथ चतुर्दशं ज्योतिष्टोम विकाराणामग्निष्टोमपूर्वकताधिकरणम् (सूत्राणि ३९-४२)

अथान्येनेति संस्थानां वादः सन्निधानात् ॥ ३९ ॥

(तत्प्रकृतेर्वापत्तिविहारौ हि न तुल्येषूपपद्येते ॥ ४० ॥ प्रशंसा वा विहरणाभावात् ॥ ४१ ॥ विधिप्रत्ययाद्वा न ह्येकस्मात्प्रशंसा स्यात् ॥ ४२ ॥)

''एतेनेष्ट्वाऽथान्येन यजेत'' इत्यत्रैतच्छब्दार्थः पूर्वत्र निरूपितः। अत्र तु अन्यशब्दार्थो निरूप्यत इति प्रासङ्गिकी **सङ्गतिः**। अथान्येनेत्यन्यशब्दः किमग्निष्टोमसंस्थान्यसर्वसंस्थापरः, किं वाऽग्निष्टोमान्यमात्रपर इति **सन्देहः**।

पूर्वपक्षस्तु, अन्यशब्दस्य सर्वनामतया सन्निहितवाचित्वात्संस्थानाञ्च प्रकरणवशेन सन्निधानात्संस्थावचनोऽन्यशब्दः। न क्रत्वन्तरवचनः। तेषामसन्निहितत्वादिति। तदाह सूत्रे, **अथान्येनेति संस्थानां वादः**। कुतः ? तासां **सन्निधानादिति**।

सिद्धान्तस्तु, स्यादेवं यदि संस्थानां प्रकरणेन सन्निधानं स्यात्। न चैतदस्ति। श्रुत्यवगतयागाङ्गभावसोमार्थाभिषवादिसंस्कारमिश्रत्वात्सर्वस्य प्रकरणस्यासम्बन्धिपदव्यवधानान्न संस्थानां प्रकरणमिति तृतीये षष्ठपादान्तिमनयेऽभिधानात् ''यज्ञो यज्ञानाम्'' इति षष्ठ्यन्तयज्ञशब्देन संस्थानामेकाहाहीनसत्राणाञ्चायमन्यशब्दोऽभिधाने शक्त इति तेषां सर्वेषां ज्योतिष्टोमविकृतियागानां ज्योतिष्टोमात्पश्चाद्भावोऽङ्गमनेन विधीयत इति।

फलन्तु, संस्थानामेवाग्निष्टोमपश्चाद्भावोऽङ्गमिति तासामेवाग्निष्टोमानन्तरमनुष्ठानम्। क्रत्वन्तराणामनियमः **पूर्वपक्षे**। **सिद्धान्ते तु**, क्रत्वन्तराणामप्यग्निष्टोमानन्तरमनुष्ठानमिति।

इति चतुर्दशं ज्योतिष्टोमविकाराणामग्निष्टोमपूर्वकताधिकरणम् (सूत्राणि ३९-४२)

अथ पञ्चदशमेकानेकस्तोमकानामग्निष्टोमपूर्वकताधिकरणम् (सूत्राणि ४३-४४)

एकस्तोमो वा क्रतुसंयोगात् ॥ ४४ ॥

(सर्वेषां वा चोदनाविशेषात्प्रशंसा स्तोमानाम् ॥ ४४ ॥)

पूर्वाक्षेपेणात्र शङ्कनात्सङ्गतिः। ''अथान्येन यजेत'' इत्यन्यशब्दः किमेकस्तोमपरः किं वा बहुस्तोमपर इति **सन्देहः**।

पूर्वपक्षस्तु, यदुक्तं पूर्वत्रान्यशब्दोऽविशेषात्सर्वक्रतुपर इति तदयुक्तम्। ''त्रिवृदग्निष्टोमः, पञ्चदश उक्थ्यः एकविंशः षोडशी'' इत्यादीनामेकस्तोमानामेवाभिधायकः । कुतः ? एकस्तोमक्रतोरेवार्थवादरूपवाक्यशेषेण प्रतीतेः । तथा हि वाक्यशेषः ''यो वै त्रिवृदन्यं यज्ञक्रतुमापद्यते स तं दीपयति, यः पञ्चदशः स तं दीपयति, यः सप्तदशः स तं दीपयति, य एकविंशः स यज्ञक्रतुं दीपयति प्रकाशयतीत्येवंरूपेण तेषां त्रिवृदादिस्तोमानां ज्योतिष्टोमगतानां स्वस्वप्राप्तिमत्क्रत्वन्तरप्रकाशकत्वं श्रूयमाणं क्रत्वन्तरव्याप्त्या विना न युज्यते। प्रदीपप्रभादौ गृहादिव्याप्त्यैव तत्प्रकाशकत्वदृष्टे । ततश्च स्तोमान्तरनिरासेन त्रिवृत्स्तोमव्याप्त एव क्रतुर्यज्ञक्रतुशब्देन तत्रोच्यते । तत्समानाधिकृतश्चान्यशब्दस्तन्मात्रवाचक एवेति वाक्यशेषस्थान्यशब्दस्यैकैकस्तोमवाचकत्वावधारणात् ''अन्येन यजेत'' इत्यत्रापि विध्युद्देशगतान्यशब्दोप्येकस्तोममात्रवचनो युक्तः। न त्वेकानेकस्तोमसामान्यवचन इति।

तदाह सूत्रकारः, अथान्येनेत्यन्यशब्देनैकस्तोम एव गृह्यते । कुतः ? क्रतुसंयोगात् वाक्यशेषस्थान्यशब्दस्यैकस्तोमपरक्रतुसमानाधिकरणत्वादिति।

सिद्धान्तस्तु, त्रिवृदादिसत्तामात्रेणानेकस्तोमकेष्वपि विधिस्तुत्युपपत्तेर्न वाक्यशेषे त्रिवृदाद्येकैकस्तोमक्रतुपरत्वावधारणं युक्तमिति विध्युद्देशगतान्यशब्दस्य न तद्वशाद्विशेषेऽवस्थापनमिति सर्वक्रतुपरत्वमेवान्यशब्दस्य । प्रकाशकत्वञ्च विनापि व्याप्त्या पूर्वानुष्ठितज्योतिष्टोमानामभ्यस्ततयाऽनायासेन विकृतिषूक्तिसम्भवाभिप्रायमिति।

तदाह सूत्रे, सर्वेषां वा चोदनाविशेषादित्यादि । फलन्तु, पूर्वोक्तप्रमेयसमर्थनम् ।

इति पञ्चदशमेकानेकस्तोमकानामग्निष्टोमपूर्वकताधिकरणम् (सूत्रे, ४३-४४)

इति श्रीभाट्टसंग्रहे सर्वतन्त्रस्वतन्त्रश्रीसुधीन्द्रतीर्थगुरुपादशिष्य
श्रीराघवेन्द्रतीर्थयतिसार्वभौमकृते पञ्चमाध्यायस्य तृतीयः पादः

अस्मिन् पादे	अधिकरणानि	१५	सूत्राणि	४४
आदितः	अधिकरणानि	३५१	सूत्राणि	९१८

अथ पञ्चमाध्यायस्य चतुर्थः पादः

अथ प्रथमं पाठक्रमापेक्षया श्रुत्यर्थयोर्बलवत्त्वाधिकरणम्

क्रमकोपोऽर्थशब्दाभ्यां श्रुतिविशेषादर्थपरत्वाच्च ॥ १ ॥

पूर्वत्र श्रुत्यर्थादिभिः क्रमश्चिन्तितः। अत्र पादे तेषां बलाबलं चिन्त्यत इति पूर्वानन्तर्यमस्य पादस्य पूर्वतो भेदश्चेति ज्ञेयम्। श्रुत्याऽर्थेन च पाठस्य विरोधे बलाबलमत्र चिन्त्यते, पाठः किं ताभ्यां तुल्यबल उत दुर्बल इति। ज्योतिष्टोमे ऐन्द्रवायवादिग्रहेष्वाश्विनग्रहस्तृतीयस्थाने पठितः। तस्य वाचकश्रुत्या दशमस्स्थानत्वं प्राप्यते ''आश्विनो दशमो गृह्यते'' इति। तथा ''अग्निहोत्रं जुहोति'' ''यवागूं पचति'' इति च श्रूयते। तत्र पाठक्रमवशाद्धुत्वा पक्तव्यमुतार्थशब्दित-प्रयोजनवशाद्विपर्यय इति। प्रमाणत्वाविशेषाच्छ्रुत्यर्थाभ्यां पाठस्तुल्यबल इति **प्राप्ते,**

सिद्धान्तः, पाठो हि न क्रममभिधत्ते। किन्त्वर्थात्कल्पयति। न च श्रुत्या झडिति क्रमेऽवगते तद्विरुद्धः क्रमः पाठात्कल्पयितुं युक्त इति पाठाच्छ्रुतिर्बलीयसी। तथा यवागूपाकस्य पश्चाद्भावकल्पने भूतभाव्युपयोगहीनत्वेन यवाग्वाः संस्कारानर्हत्वात् द्वितीयया तदर्थत्वेनावगतः पाकोऽनर्थकः स्यात्। तथा द्रव्यान्तरेणैव होमसिद्धेः सामर्थ्यावगतहोमार्थता यवाग्वा अनर्थिका स्यात्। अतः पाठादर्थो बलवानिति श्रुत्यर्थौ पाठक्रमं बाधित्वा क्रमं नियच्छत इति।

तदाह **सूत्रे, अर्थशब्दाभ्यां क्रमकोपः** पाठक्रमस्य बाधः। कुतः ? **श्रुतिविशेषात्।** श्रौतक्रमस्य श्रुत्या प्रत्यक्षश्रवणेन **विशेषात् अर्थपरत्वात्** प्रयोजनार्थत्वाच्च सर्वस्यापि प्रयोजनाविरोधेन क्रमस्य कल्प्यत्वादिति।

फलन्तु, पूर्वपक्षे तृतीयस्थानेप्याश्विनस्य निवेशः। पाकस्तु हुत्वा वा पक्तव्यं पूर्वं वा। **सिद्धान्ते तु** दशमस्थान एव पक्त्वैव होतव्यमिति। **अर्थाच्चेत्य**त्रार्थाख्यं प्रमाणं व्युत्पादितम्। न बलाबलं चिन्तितमित्यपौनरुक्त्यमित्याहुः।

इति पाठक्रमापेक्षया श्रुत्यर्थयोर्बलवत्त्वाधिकरणम्

अथ द्वितीयं मुख्यक्रमेणाऽग्नेयस्य पूर्वमवदानाद्यनुष्ठानाधिकरणम् (सूत्राणि २-४)

अवदानाऽभिघारणासादनेष्वानुपूर्व्यं प्रवृत्त्या स्यात् ॥ २ ॥

(यथाप्रदानं वा तदर्थत्वात् ॥ ३ ॥ लिङ्गदर्शनाच्च ॥ ४ ॥)

श्रुत्यर्थपाठानां मुख्यत्वात्तद्बलाबलचिन्तानन्तरं प्रवृत्तिक्रममुख्यक्रमयोस्तच्चिन्त्यत इति सङ्गतिः। दर्शपूर्णमासयोः सान्नाय्यधर्मा वत्सापाकरणगोदोहनादयः प्रथममाम्नाताः। पश्चादाग्नेयधर्माः पुरोडाशनिर्वापावघातादय आम्नाताः। तेनैव पाठक्रमेण धर्मानुष्ठानं प्रवृत्तम्। प्रदानन्त्वाग्नेयस्य याज्यानुवाक्याक्रमात्प्रथमं सान्नाय्यस्य पश्चादित्युक्तं मुख्यक्रमेण वाऽङ्गानां इत्याद्यपादीयसप्तमनये । तथाऽवदानादिप्रक्षेपान्त एकः पदार्थ इत्यपि संयुक्ते तु प्रक्रमात्तदङ्गमिति द्वितीयपादेऽभिहितम् । तत्र स्विष्टकृदवदानं प्रयाजशेषाभिघारणं वेद्यामासादनञ्च किं प्रवृत्तिक्रमात्सान्नाय्यस्य पूर्वं भवति, उत मुख्यक्रमादाग्नेयस्येति सन्देहे,

प्रमाणत्वाविशेषादनियमेन वा प्रवृत्तिक्रमानुसारेण सान्नाय्य एव वा पूर्वमवदानादि कर्तव्यमिति प्राप्तम् । तदाह सूत्रे, अवदानेत्यादि । व्यक्तः सूत्रार्थः ।

सिद्धान्तस्तु, अङ्गप्रधानयोः सन्निकर्षसम्पादकत्वान्मुख्यक्रमो बलवान् । तथा हि, प्रदानं हि फलप्रत्यासत्त्या मुख्यम्। अवदानादि तु तदङ्गम्। मुख्यकमाश्रयणेनाऽग्नेयस्यादौ स्विष्टकृदवदानं कृत्वा पश्चाद्दध्यादेस्तत्करणे दधिश्रुतार्थप्रधानावदानाभ्यामेवाग्नेयाङ्गयोः प्रधानावदानस्विष्टकृदवदानयोर्व्यवधानम्। एवमभिघारणासादनयोराग्नेयाङ्गयोर्दधिश्रुतयोरभिघारणाभ्यामासादनाभ्यां द्वाभ्यां द्वाभ्यामेव व्यवधानम् । सान्नाय्ययागात्प्रधानात्प्रथमदिनकर्तव्यशाखाहरणादिपदार्थस्यैकस्यैव निर्वापाद्याग्नेयपदार्थव्यवधानं भवति। स त्वभिघारणादेः। प्रवृत्तिक्रमाश्रयणे तु द्वितीयदिनकर्तव्यानामभिघारणादीनामपि प्रधानसान्नाय्यविप्रकर्षः स्यात्। प्रथमं दध्यभिघार्य ततः शृतञ्चाभिघार्यानन्तरमाग्नेयाभिघारणं कृत्वा मुख्यक्रमेण वाऽङ्गनां इत्यादावुक्तदिशाऽवदानादिप्रक्षेपान्तञ्च कृत्वा पश्चाद्दध्नोऽवदानं कार्यम् । एवं दध्यङ्गयोः प्रयाजशेषाभिघारणावदानादिपदार्थयोः शृताग्नेयाभिघारणाभ्यामाग्नेयावदानादिपदार्थेन च

त्रिभिर्व्यवधानात् , शृताङ्गयोरभिघारणावदानादिपदार्थयोराग्नेयाभिघारणावदानादिपदार्थाभ्यां व्यवधानात्, एवं प्रवृत्तिक्रमाद्दधिशृतयोः प्रथमं स्विष्टकृदवदानानि कृत्वाऽऽग्नेयस्य तत्करणे आग्नेयपदार्थयोः प्रधानावदानस्विष्टकृदवदानयोर्दधिशृतपदार्थाभ्यां प्रधानावदानाभ्यां स्विष्टकृदवदानाभ्याञ्च चतुर्भिः पदार्थैर्व्यवधानात्प्रधानप्रदानविप्रकर्षः स्यात् । एवमाग्नेयासादनस्यापि दधिशृतासादनैश्चतुर्भिर्विप्रकर्षः प्राप्नोति । तस्मात् प्रवृत्तिक्रमान्मुख्यक्रमस्य अङ्गप्रधानसन्निकर्षसम्पादकतया बलवत्त्वान्मुख्यक्रमेणाऽग्नेयस्यैव स्विष्टकृदवदानादि पूर्वं कार्यमिति । तदाह **सूत्रे, यथाप्रदानं वा तदर्थत्वादिति ।**

फलन्तु, आग्नेयस्यैव पूर्वमवदानादीति व्यक्तम् ।

इति द्वितीयं मुख्यक्रमेणाऽग्नेयस्य पूर्वमवदानाद्यनुष्ठानाधिकरणम् (सूत्राणि २-४)

अथ तृतीयमिष्टिसोमयोः पौर्वापर्यानियमाधिकरणम् (सूत्राणि ५-९)

वचनादिष्टिपूर्वत्वम् ॥ ५ ॥

(सोमश्चैकेषामग्न्याधेयस्यर्तुनक्षत्रातिक्रमवचनात्तदन्तेनानर्थकं हि स्यात् ॥ ६ ॥ तदर्थवचनाच्च नाविशेषात्तदर्थत्वम् ॥ ७ ॥ अयक्ष्यमाणस्य च पवमानहविषां कालनिर्देशादानन्तर्याद्विशङ्का स्यात् ॥ ८ ॥ इष्टिरयक्ष्यमाणस्य तादर्थ्ये सोमपूर्वत्वम् ॥ ९ ॥)

पूर्ववैषम्येणात्र शङ्कनात्सङ्गतिः । ''दर्शपूर्णमासाविष्ट्वा सोमेन यजेत'' इति श्रुतं सोमस्येष्टिपूर्वत्वं किं नियतमुत विपर्ययोपीति **सन्देहे,** युक्तं पूर्वत्र मुख्यक्रमेण प्रवृत्तिक्रमबाध इति । अत्र तु इष्ट्वेति त्त्वाश्रुत्यवगतश्रौतक्रमस्य बलवत्त्वान्न बाधो युक्त इतीष्टिपूर्वत्वमेव सोमस्य । न चेष्टेः सोमपूर्वत्वे किञ्चिद्वचनमस्ति । येन विपर्ययोऽपि स्यादिति **प्राप्तम्** । तदाह **वचनादिष्टिपूर्वत्वमिति ।**

सिद्धान्तस्तु, इष्टेः सोमपूर्वत्वे प्रत्यक्षवचनाभावेऽपि ''सोमेन यक्षमाणोऽग्निमादधीत'' इति सोमस्य श्रुतमाधानानन्तर्यं नियमेनेष्टिपूर्वत्वेऽनुपपद्यमानं सत् सोमपूर्वत्वमपीष्टेर्गमयतीतीष्टिसोमयोरनियमेन पौर्वापर्यमिति । तदाह **सूत्रे, सोमश्चैकेषामग्न्याधेयस्येत्यादि ।**

फलन्तु, विकल्पेन द्वयोः पौर्वापर्येणानुष्ठानम् ।

इति तृतीयमिष्टिसोमयोः पौर्वापर्यानियमाधिकरणम् (सूत्राणि ५-९)

अथ चतुर्थं ब्राह्मणस्यापीष्टिसोमयोः पौर्वापर्यानियमाधिकरणम् (१०-१४)

उत्कर्षाद्ब्राह्मणस्य सोमः स्यात् ॥ १० ॥

(पौर्णमासी वा श्रुतिसंयोगात् ॥ ११ ॥ सर्वस्य वैककर्म्यात् ॥ १२ ॥ स्याद्वा विधिस्तदर्थेन ॥ १३ ॥ प्रकरणात्तु कालः स्यात् ॥ १४ ॥)

पूर्वत्र कल्पद्वयस्थिताविह ब्राह्मणकर्तृकेष्टौ कथमिति विशेषचिन्तनात्सङ्गतिः । यदि ब्राह्मणो यजमानस्तदा तस्य किं क्षत्रवैश्ययोरिव पक्षद्वयमुत दर्शपूर्णमासयोः सोमपूर्वकत्वनियमोऽथ पौर्णमासत्रिकस्य किं वा पौर्णमासहविष एकस्यैव तथात्वनियम इति चतुर्धा सन्देहः । अविशेषात्तस्यापीतरयोरिव पक्षद्वयमपीत्येकः ।

अन्यस्तु ब्राह्मणयजमानकत्वे दर्शपूर्णमासयोः सोमपूर्वकत्वमेव नियमिति । कुतः ? ''आग्नेयो वै ब्राह्मणो देवतया सोमेनेष्ट्वाऽग्नीषोमीयो भवति । यदेवादः पौर्णमासं हविस्तत्तर्ह्यनुनिर्वपेत्स तर्ह्युभयदेवतो भवति '' इति वचने '' प्रजापतेर्मुखादग्निब्राह्मणयोरुत्पत्त्या ब्राह्मणस्याग्निरेक एव देवतेत्याग्नेय एव ब्राह्मणः । न सौम्यः । यदा स ब्राह्मणः सोमेन यजेत तदा सोमोप्यस्य देवतेत्यग्नीषोमीयो भवति । यदेव पौर्णमासमदो हविरग्नीषोमीयपुरोडाशरूपं तत्तर्हि सोमादूर्ध्वमनुर्निर्वपेत्तदा तर्हि स ब्राह्मण उभयदेवत अग्नीषोमीयदेवतो भवति '' इति सोमादूर्ध्वं दर्शपूर्णमासयोरुत्कर्षश्रवणात् । वचने पौर्णमासमात्रश्रवणेऽपि त्रिकद्वयसाध्यत्वेन श्रुतस्वर्गफलस्यैकदेशेनानुत्पत्तेरफलस्य चानुष्ठानायोगेन दर्शस्याप्युत्कर्षसिद्धेः ।

यत्तु पौर्णमासनामकं तद्धर्मकं कर्मान्तरं मासाग्निहोत्रमिव विधीयत् इति तन्न । प्रकृतप्रत्यभिज्ञाविरोधाद्धर्मलक्षणापाताद्विशिष्टविधिगौरवाच्च । तथा च कृत्स्नस्याप्युत्कर्षाद्ब्राह्मणस्य सोमपूर्वकत्वं नियतम् । क्षत्रवैश्ययोस्तु पक्षद्वयमपीति । तदाह सूत्रे, पौर्णमासहविष **उत्कर्षाद्ब्राह्मणस्य सोमो** दर्शपूर्णमासाभ्यां प्रागेव स्यादिति ।

इति चतुर्थं ब्राह्मणस्यापीष्टिसोमयोः पौर्यापर्यानियमाधिकरणम् (सूत्राणि १०-१४)

अथ पञ्चमं नर्तून् प्रतीक्षेदित्यादिना सोमकालबाधाधिकरणम् (सूत्राणि १५-१८)

स्वकालः स्यादविप्रतिषेधात् ॥ १५ ॥ अपनयो वाऽधानस्य सर्वकालत्वात् ॥ १६ ॥ (पौर्णमास्यूर्ध्वं सोमाद्ब्राह्मणस्य वचनात् ॥ १७ ॥ एकं शब्दसामर्थ्यात्प्राकृत्स्नविधानात् ॥ १८ ॥)

एवं स्थिते पूर्वपक्षे तृतीयपूर्वपक्षं सिद्धान्तं वाऽकृत्वा चिन्तान्तरं **स्वकालः स्यादविप्रतिषेधादिति, अपनयो वाऽधानस्य सर्वकालत्वादिति** सूत्राभ्यां कृतम् । यथा प्रकरणबलात् ''आग्नेयो वा'' इति वाक्येन पौर्णमास्यः सोमादूर्ध्वकालविधिस्तथा ''नर्तून्'' इति वाक्येनापि प्रकरणादाधानस्यैव कालो निषिद्ध्यते । न सोमस्य । अप्रकृतत्वादिति पूर्वोक्तपूर्वपक्षं दृष्टान्तीकृत्येह पूर्वपक्षं वक्तुमन्तरा चिन्ता प्रवर्तिता।

तथा हि, ''सोमेन यक्ष्यमाणोऽग्नीनादधीत। नर्तून् सूर्क्षेन्न नक्षत्रम्'' इति वाक्ये ऋतून् नक्षत्रं वा न सूर्क्षेन्न पश्येत् इत्युक्तो ऋतुनक्षत्रप्रतीक्षाभावः किमाधानस्योत सोमस्येति **सन्देहे,** प्रकरणादाधानस्येति **प्राप्तम्** । तदाह, **स्वकालः स्यात्** सोम इत्यनुषङ्गः । कुतः ? **अविप्रतिषेधात्** तदीयकालस्येति ।

सिद्धान्तस्तु, ''यदहरेवैनं श्रद्धोऽपनमेदथाऽदधीत'' इति वाक्येन सोमयागादिचिकीर्षके आधानस्य कालमुपदिश्याऽधानकालानादरस्योक्तत्वात्सोमयागस्यैवायं वसन्तरूपर्तुसम्पत्तार-क्षेमतारादिरूपनक्षत्रप्रतीक्षाभाव इति।

तदाह **सूत्रे, अपनयो** वा सोमकालस्य स्यात्। कुतः ? **आधानस्य सर्वकालत्वादिति।**

नन्वेवं ''वसन्ते वसन्ते ज्योतिषा'' इति सोमस्य वसन्तकालादिविध्यानर्थक्यमिति चेत् आधानानन्तर्यपक्षे तदानर्थक्येपि दर्शपूर्णमासानन्तर्यपक्षे तत्सार्थक्यसम्भवात् । अस्य च निषेधस्याधानानन्तर्यपक्ष एव प्रवृत्तेः ''सोमेनाधानानन्तरं यक्ष्यमाणो वसन्तादिकं न प्रतीक्षेत'' इति ।

ब्राह्मणस्य दर्शपूर्णमासयोः सोमपूर्वकत्वमेव नियतमिति स्थितपूर्वपक्षस्योत्तरमुच्यते **पौर्णमास्यूर्ध्वं सोमाद्ब्राह्मणस्य वचनादिति** सूत्रेण । ''आग्नेयो वै ब्राह्मणः'' इति वचने पौर्णमासत्रिकस्यैव श्रवणेन तन्मात्रस्य सोमादूर्ध्वमनुष्ठानं विप्रस्य नियतम् । अन्यत्र दर्शे क्षत्रवैश्ययोरिव विकल्पेन पक्षद्वयमपीति । न चैकदेशेन फलानुत्पत्तिरिति प्रागुक्तदोषः शंक्यः । यथा ''अमावास्यायाममावास्यया यजेत'' इति ''पौर्णमास्यां पौर्णमास्या यजेत'' इति वचनबलात्पर्वद्वये पृथगनुष्ठितात्समुदायद्वयात्फलमिति कल्प्यते तथेहाप्युत्कर्षवचनबलात् सोमात्पूर्वं कृतादर्शत्रिकात्सोमानन्तरं कृतात्पौर्णमासीसमुदायाच्च फलमिति कल्पनादिति । एवं **तृतीयपूर्वपक्षे** सिद्धान्तः कृतः **''एकं वा शब्दसामर्थ्यात्प्राक्कृत्स्नविधानादिति** सूत्रेण । **एकमेव** हविरुत्कृष्येत । तद्धितान्तैकवचनपौर्णमासशब्दस्य **शब्दसामर्थ्यात्** सोमात् **प्राक् कृत्स्नस्य विधानात्** इत्यर्थः । अयं भावः । ''आग्नेय'' इति वचने ''स सोमेनेष्ट्वा अग्नीषोमीयो भवति'' इत्युपक्रमात्पौर्णमासस्याग्नीषोमीयस्यैकस्यैव हविषोऽदःशब्देन परामर्शात्तन्मात्रस्योत्कर्षादग्नीषोमीयहविरनुष्ठानस्यैव सोमपूर्वकत्वनियमो नान्येषाम् । अन्यत्र तु इतरयोरिव विकल्पेन पक्षद्वयमपीति । ''दर्शपूर्णमासाभ्यं स्वर्गकामो यजेत'' इति फलवाक्ये षण्णामपि फलार्थतयोपादानेप्यकृतसोमस्य सान्नाय्यहीनेनेवोत्कृष्टाग्नीषोमीयहीनेनाप्यवशिष्टदर्शादियागसमुदायेनैव फलमित्याहुः ।

फलन्तु, अग्नीषोमीयहविर्मात्रस्य सोमादूर्ध्वमनुष्ठानं ब्राह्मणस्येति व्यक्तमेव ।

इति पञ्चमं नर्तून् प्रतीक्षेदित्यादिना सोमकालबाधादिकरणम् (सूत्राणि १५-१८)

अथ षष्ठमाज्यस्य सोमादनुत्कर्षाधिकरणम् (सूत्राणि १९-२१)

पुरोडाशस्त्वनिर्देशे तद्युक्ते देवताभावात् ॥ १९ ॥

(आज्यमपीति चेत् ॥ २० ॥ न मिश्रदेवतात्वादैन्द्राग्नवत् ॥ २१ ॥)

पूर्वं सामान्येनोक्तस्याग्नीषोमीयोत्कर्षस्यात्र विशेषे स्थापनात्सङ्गतिः । किमग्नीषोमीयस्य प्रागुक्त उत्कर्षोऽग्नीषोमदेवताकस्य पुरोडाशस्यैवोत्कर्षोऽथोपांशुयाजगतस्याग्नीषोमदेवताकस्या आज्यस्यापीति **सन्देहे,**

उपांशुयाजाज्यस्याप्यग्नीषोमदैवत्यत्वाविशेषात्तस्याप्युत्कर्ष इति **प्राप्तम्**। न च ''आग्नेयो वा'' इति वचने निर्वापश्रुतिबलात्पुरोडाशस्यैवोत्कर्षो युक्त इति वाच्यम्। निर्वपेदित्यस्यानुवादत्वादनुवादे च यथाप्राप्तिवर्णनीयं तात्पर्यमिति, उपक्रमगताग्नीषोमीय-श्रुतेरगृह्यमाणविशेषतयाऽऽज्यपरत्वे सिद्धे निर्वापश्रुतिः पृथक्करणमात्रपरा वर्णनीयेति।

सिद्धान्तस्तु, आज्यं हि पुरोडाशवन्नाग्नीषोमीयमेव। किन्तु वैष्णवं प्राजापत्यञ्च। मन्त्रवर्णादग्नीषोमयोरिव विष्णुप्रजापत्योरपि वैकल्पिकदेवतात्वात्। तेन सोमात्प्रागग्नीषोमीय-यागानुष्ठानानर्हत्वेपि यजमानस्य विष्णुप्रजापत्युद्देश्यकयागानुष्ठानार्हत्वसम्भवान्नाज्यस्योत्कर्षः। तदाह **सूत्रे, अनिर्देशे** हविर्विशेषानिर्देशे अग्नीषोमीयः **पुरोडाश** एवोत्कृष्येत। **तद्युक्ते** ''सोमेनेष्ट्वा अग्नीषीमीयो भवति'' इति सोमयुक्त एव तयोरग्नीषोमयोः **देवताभावात्** देवतात्वात्। न प्रागिति।

फलन्तु, उपांशुयाजाज्यस्य सोमात्प्रागेवानुष्ठानमिति।

इति षठमाज्यस्य सोमादनुत्कर्षाधिकरणम् (सूत्राणि १७-२१)

अत सप्तमं विकृतीनामैन्द्राग्नादीनां सद्यस्कालताधिकरणम् (सूत्राणि २२-२४)

विकृतेः प्रकृतिकालत्वात्सद्यस्कालोत्तरा ततिस्तयोः प्रत्यक्षशिष्टत्वात्॥ २२॥

द्वैयहकाल्ये तु यथान्यायम्॥ २३॥ वचनाद्वैककाल्यं स्यात्॥ २४॥

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः। ''ऐन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकामः'' ''सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः'' इत्यादयो विकृतयो द्व्यहकालाः सद्यस्काला वेति **सन्देहः**।

पूर्वपक्षस्तु, यथा हि पूर्वत्र ''यदेवादः पौर्णमास्यां हविः'' इति वचनस्य पुरोडाशार्थतयोपपत्त्या नाज्यस्य सोमोत्तरता तथाऽत्रापि ''य इष्ट्या पशुना सोमेन यजेत सोऽमावास्यायां पौर्णमास्याञ्च यजेत'' इति वचनस्यापि कालैकदेशपरत्वसम्भवाद्विकृतीनामपि

द्व्यहकालतैव स्यात्। प्रकृतौ तथा दर्शनात्। प्रकृतौ हि ''पूर्वेद्युरग्निं उत्तरमहरेव तया यजते'' इति वचनान्तरवशात् ''य इष्ट्या'' इति वचनमेकदेशेन योजयित्वा पूर्वेद्युरग्न्यन्वाधानं, इध्मस्य बर्हिषश्च सन्नहनं, प्रतिपदीष्टिरिति द्यहकालतासमाश्रयणेनेहापि द्व्यहकालतौचित्यात्। न च वचनं विना प्रकृतिविकृत्योरेककालत्वायोगात् प्रकृतौ प्रथमं पञ्चदश्यामारब्धायां विकृतिरपि तदैव नारब्धुं शक्येति कथं द्वयोर्द्व्यहकालतेति वाच्यम्। चतुर्दश्यां विकृतिमारभ्य पञ्चदश्यां समाप्य तस्यामेव पञ्चदश्यां प्रकृतिमारभ्य प्रतिपदि तस्याः समापनेनोभयोरप्येवं द्व्यहकालतोपपत्तेरिति।

सिद्धान्तस्तु, ''य इष्ट्या पशुना'' इति प्रत्यक्षवचनेन प्राप्तस्यैककालत्वस्य चोदकेनानुमितेन प्राप्तद्यहकालत्वेन बाधायोगात्पञ्चदश्यामेव साङ्गा विकृतयः कर्तव्या इति। तदाह **सूत्रे, विकृतेः प्रकृतिकालत्वात्** प्रकृतेर्यः कालः पौर्णमास्यादिरूपस्तत्कालत्वेन ''य इष्ट्या'' इति वाक्येन विधानात् **तदुत्तरा** प्रकृत्युत्तरा **ततिः** विकृतीनामावलिरिति यावत्। **सद्यस्काला** भवितुर्हति। न चैवं प्रकृतेरपि सद्यस्कालता स्यादिति शङ्क्यम्। **तयोःप्रत्यक्षशिष्टत्वात्** प्रकृतौ पौर्णमास्यादिकालत्वस्य द्व्यहकालत्वस्य च प्रत्यक्षशिष्टत्वेन द्यहकालताश्रयणे विकृतिषु द्व्यहकालत्वस्याऽनुमानिकत्वान्न प्रत्यक्षशिष्टैककालताबाधेन द्व्यहकालता युक्तेति।

फलन्तु, पञ्चदश्यामेव साङ्गविकृतेरनुष्ठानम्।

इति सप्तमं विकृतीनामैन्द्राग्नादीनां सद्यस्कालताधिकरणम् (सूत्राणि २२-२४)

अथाष्टमं सोमात्सान्नाय्यविकारादीनामुत्कर्षाधिकरणम्

सान्नाय्याग्नीषोमीयविकारादूर्ध्वं सोमात्प्रकृतिवत्॥ २५॥

विकृतिकालप्रसङ्गात्सान्नय्यादिविकृतिकालोक्तिरत्रेति प्रासङ्गिकी **सङ्गतिः**। ''वैश्वदेव्यामिक्षा'' इत्यादिः सान्नाय्यविकारः। ''अग्नोषोमीयमेकादशकपालं निर्वपेच्छ्यामाकानां

वसन्ते ब्रह्मवर्चसकामः'' इत्यादिरग्नीषोमीयपुरोडाशविकारः। तस्योभयस्य सोमात्प्रागूर्ध्वं-श्चेत्यनियम उत सोमादूर्ध्वमेवेति नियम इति **सन्देह**, विशेषनियामकस्याभावादनियम इति **प्राप्ते**,

''नासोमयाजी सन्नयेत्'' इति सान्नाय्यं सोमादूर्ध्वमुत्कृष्यते। अग्नीषोमीयपुरोडाशस्य सोगादूर्ध्वमुत्कर्षस्तु ''आग्नेयो वा'' इति वचनेन पूर्वं दर्शितः। तस्मात्तद्विकारयोर्द्वयोरपि सोमादूर्ध्वमेवानुष्ठानमिति **सिद्धान्तः**। तदाह **सूत्रे, सान्नाय्येत्यादि**। न चैवं पशोरपि सान्नाय्यविकारत्वात्सोमादूर्ध्वकालता स्यादिति शंक्यम्। किं प्रकृतिभूताग्नीषोमीयपशोरेव-मापादनमुत तद्विकृतिभूतनिरूढपशोर्वा। नाद्यः। ''स एष औपवसथ्येऽहनि द्विदैवतः पशुरालभ्यते'' इति तस्य सोमात्पूर्वकालतोक्तेः। नान्त्यः। प्रकृतिभूताग्नीषोमीयपशोः सोमोत्तरकालत्वाभावेन तद्विकारपशोरपि तदभावादिति।

फलन्तु, सान्नाय्यादिविकाराणां पशुभिन्नानां सोमादूर्ध्वमनुष्ठानम्।

इत्यष्टमं सोमात्सान्नाय्यविकारादीनामुत्कर्षाधिकरणम्

अथ नवमं सोमविकाराणां दर्शपूर्णमासात्पूर्वमकर्तव्यताधिकरणम्

तथा सोमविकारो दर्शपूर्णमासाभ्याम्॥ २६॥

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः। ''गवा यजेत'' इति गवादिनामकाः सोमविकारा एकाहा आम्नाताः। ते किं सोमयागरूपप्रकृतिवद्दर्शादेरूर्ध्वं प्राग्वेत्यनियम उत दर्शादीष्टेरूर्ध्वमेवेति नियम इति **सन्देहः**।

पूर्वपक्षस्तु, यथाऽग्नीषोमीयविकृतयः प्रकृतिवत्सोमादूर्ध्वं भवन्ति तथा सोमविकृतयोऽपि वचनादिष्टिपूर्वत्वमित्यत्रोक्तदिशा सोमरूपप्रकृतिवद्दर्शपूर्णमासाभ्यां प्रागूर्ध्वश्च भवेयुरिति।

सिद्धान्तस्तु, स्यादेवं यदि सोमस्य दर्शादीष्टितः पूर्वकालत्वं वाचनिकं स्यात्तदा पूर्वन्यायेन यथाप्रकृति सोमविकारेष्विष्टितः पूर्वकालत्वं चोदकात्प्राप्नुयात् । न चैवम् । किन्तु सोमस्याधानानन्तर्यवचनबलादर्थादिष्टितः प्राक्कालत्वं सोमस्य प्राप्तम् । न च प्रकृतावर्थलब्धं विकृतिषु चोदकः प्रतिदिशति । तस्माद्दर्शपूर्णमासेष्टित ऊर्ध्वमेव सोमविकाराः कार्या इति ।

तदाह सूत्रे, यथाऽग्नीषोमीयविकारः सोमादूर्ध्वमेव भवति तथा सोमविकारेऽपि दर्शपूर्णमासाभ्यामूर्ध्वमेव भवतीति ।

फलन्तु, सोमविकाराणामिष्ट्यनन्तरमनुष्ठानम् ।

इति नवमं सोमविकाराणां दर्शपूर्णमासात्पूर्वमकर्तव्यताधिकरणम्

इति श्रीभाट्टसंग्रहे सर्वतन्त्रस्वतन्त्रश्रीसुधीन्द्रतीर्थगुरुपादशिष्य
श्रीराघवेन्द्रतीर्थयतिसार्वभौमकृते पञ्चमाध्यायस्य चतार्थः पादः

अस्मिन् पादे	अधिकरणानि	९	सूत्राणि	२६
आदितः	अधिकरणानि	३६०	सूत्राणि	९४४

अथ षष्ठाध्यायः

प्रथमः पादः

अथ प्रथमं यागादिकर्मणां स्वर्गादिफलसाधनताधिकरणम् (अधिकारन्यायः सूत्राणि १-३)

हरिः ॐ। आद्याध्यायोक्तप्रमाणैः सिद्धस्वरूपेषु द्वितीयाध्यायादिषु निरूपितैर्भेदाभेद-शेषशेषिभावप्रयोजकत्वाप्रयोजकत्वक्रमाक्रमविशेषैर्युक्तेषु कर्मसु को वाऽधिकारी कर्मजन्यफलभोक्तेति यावत्। को वा नेत्यस्मिन्नध्याये विचारयिष्यमाणत्वात् पूर्वाध्यायैरस्य अध्यायस्य हेतुहेतुमद्भावरूपा **सङ्गतिः**। उत्करूपकर्मनिरूपणानन्तरमेव अत्राधिकार-चिन्तोदयादिति।

द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसम्बन्धः ॥ १ ॥

(असाधकन्तु तादर्थ्यात् ॥ २ ॥ प्रत्यर्थश्चाभिसंयोगात्कर्मतो ह्यभिसम्बन्धस्तस्मात्कर्मोपदेशः स्यात् ॥ ३ ॥)

उत्तरचिन्तोपयुक्ततयाऽत्र कर्तुरधिकारोऽस्ति न वेति चिन्तनादौपोद्घातिकी **सङ्गतिरस्य** ज्ञेया। ''दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत'' ''चित्रया यजेत पशुकामः'' इत्यादिषु यागक्रियानिष्पादकत्वरूपकर्तृत्ववतः कर्मजन्यफलभोक्तृत्वरूपोऽधिकारोऽस्त्युत नेति **सन्देहः**।

पूर्वपक्षस्तु, यजेतेत्यत्र प्रत्ययेन भावनाऽभिधीयते। तस्याश्च धात्वर्थो भाव्यः। एकपदोपात्तत्वात्। स्वर्गस्तु पदान्तरोपात्तत्वात्पदान्तरसमभिव्याहाररूपवाक्येन भाव्यतया अन्वेतव्यः। तच्च वाक्यमेकपदरूपया श्रुत्या दुर्बलत्वाद्बाध्यते। किञ्च स्वर्गशब्दस्य सुखसाधनादौ लोके प्रयोगात्तस्य च सिद्धरूपस्य साध्यरूपयागं प्रति साधनत्वमुचितम्। तेन याग एव साध्यात्मा भाव्यः ''स्वर्गेण चन्दनादिना यागं कुर्यात्'' इति। न तु ''यागेन स्वर्गं कुर्यात्'' इति। भाव्यस्य भूतसाधनत्वायोगात्। कामपदन्तु साधनार्जनकामानुवादः। यद्वा स्वर्गकामना यागाङ्गतया स्वर्गकामपदेनोच्यते। तथा चैवमादिषु फलाभावेन तद्भोक्तृत्वरूपाधिकाराभावान्नारम्भणीयमधि-कारलक्षणमिति।

तदाह **सूत्रे, द्रव्याणां** स्वर्गपश्वादिद्रव्याणां **कर्मभिः** संयोगे श्रूयमाणे पदश्रुत्यपेक्षया वाक्यस्य दुर्बलत्वात्सामर्थ्याच्च **गुणत्वेन** साधनत्वेनैव **सम्बन्धः** । न भाव्यतयेति ।

सिद्धान्तस्तु, यजेतेत्यत्र आख्यातत्वं लिङ्गादिविधिप्रत्ययरूपत्वमिति द्वैरूप्यमस्ति । तत्रऽख्यातत्वेन प्रयत्नापरपर्यायभावनामाचष्टे । विधित्वेन रूपेण कर्तव्यत्वं बोधयति । भावनां कुर्विति प्रवर्तयति पुरुषमिति यावत् । प्रवर्तनात्मा विधिः प्रवृत्तिशब्दितप्रयत्नापरपर्यायभावनायाः पुमर्थभाव्यकत्वाभावे पुरुषं न प्रवर्तयितुमलमिति पदश्रुतितोऽन्तरङ्गविधिश्रुत्याऽऽख्यातत्वाकारेण स्वोक्तभावनायाः पुमर्थभाव्यकत्वबोधनाद्भिन्नपदोपात्तोऽपि स्वर्गादिविधिश्रुतिबलात् भाव्यत्वेनान्वेति । कामपदश्च सुखविशेषरूपफल एव स्वरसम् । न साधन इति स्वर्गादिरेव भाव्यो न यागः । स तु द्रव्येण निष्पन्नस्सन् साधनतामर्हतीति करणमेव । तथा च ''यागेन स्वर्गं भावयेत्'' इति वाक्यार्थलाभेन फलसत्त्वादस्ति तद्भोक्तृत्वरूपोऽधिकारो यागकर्तुरित्यारभ्य एवाधिकाराध्याय इति । **फलन्तु,** उत्तरसन्दर्भारम्भ इति ।

इति प्रथमं यागादिकर्मणां स्वर्गादिफलसाधनाताधिकरणम् (सूत्राणि १-३)

अथ द्वितीयं यागादिषु मनुष्यस्यैवाधिकाराधिकरणम् (सूत्रे ४-५)

फलार्थत्वात्तु कर्मणः शास्त्रं सर्वाधिकारं स्यात् ॥ ४ ॥

(कर्तुर्वा श्रुतिसंयोगाद्विधिः कात्स्न्येन गम्यते ॥ ५ ॥)

एवं सामान्यतः सिद्धेऽधिकारेऽत्र विशेषचिन्तनात्**सङ्गतिः** । प्रागुक्तेऽधिकारो किमनुष्ठानाशक्तानामन्धबधिरमूकपङ्गुदेवर्षितिरश्चामपि, किं वा समर्थानां मनुष्याणामेवेति **सन्देहः** ।

पूर्वपक्षस्तु, समस्ताङ्गोपसंहारासमर्थानामप्यन्धादीनामधिकारः । प्रधानवाक्यानुरोधेन अङ्गवाक्यानामुपवर्ण्यत्वात् । ''दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत'' इति प्रधानवाक्येनावगतस्वर्गकाममात्राधिकारानुरोधेन तदसङ्कोचाय नित्यवच्छ्रुतानामप्यङ्गानां यथाधिकारं विनियोगस्य कल्प्यत्वाच्चक्षुष्मन्तं प्रत्याज्यावेक्षणविधिः । अन्धं प्रति तद्विध्यभावात्तद्रहितमेव फलसाधनं कल्प्यते ।

एवं बधिरस्य वचनरहितं, मूकस्य मन्त्रोच्चारणहीनं, पङ्गोश्च विष्णुक्रमणरहितमिति सर्वेषामर्थिनामशक्याङ्गरहितकर्मानुष्ठानसम्भवादिति।

तदाह सूत्रे, **फलार्थत्वात्तु कर्मण इत्यादि**। व्यक्तः सूत्रार्थः।

सिद्धान्तस्तु, यद्याज्यावेक्षणादयः पुमर्थतया विधीयेरंस्तदा तल्लोपेऽपि न क्रतोर्वैकल्यम्। इह तु क्रत्वङ्गतया ते विहिताः। तल्लोपे क्रतुर्विगुणस्सन् फलं न जनयेत्। अङ्गवाक्यानि हि स्वातन्त्र्येण न पुरुषैः सम्बध्यन्ते। किन्तु प्रधानवाक्यशेषत्वात्तेषां तद्युक्तेन प्रधानवाक्येन सर्वाङ्गयुक्तः क्रतुः पुरुषैः सम्बध्यमानोऽसमर्थान् विहाय समर्थान् प्रत्येव विज्ञायते इत्यन्धादीन् प्रति क्रतुरेव न विहित इति कथमसमर्थानां तत्राधिकारः स्यात्। तस्मादशक्तानां नास्त्यधिकारः। तिरश्चाश्चासामर्थ्यान्न क्वाप्यधिकारः। देवानां तूद्देश्यदेवतान्तराभावादात्मोद्देशेन त्यागायोगा-द्विग्रहाभावाच्च नास्त्यधिकारः। ऋषीणामपि भृग्वादीनामृत्विगादिवरणासम्भवान्नास्त्यधिकार इति भाष्यकारीयमप्युदाहरणमयुक्तम्। अनादौ संसारे पूर्वपूर्वभृग्वादिवरणसम्भवादस्त्येवाधिकार इत्याहुः।

फलन्तु, शक्तानां मनुष्याणामेव कर्मानुष्ठानेन तत्फलभाक्त्वमिति।

इति द्वितीयं यागादिषु मनुष्यस्यैवाधिकाराधिकरणम् (सूत्रे ४-५)

अथ तृतीयं यागादिषु स्त्रीपुंसयोरुभयोरधिकाराधिकरणम् (सूत्राणि ६-१६)

लिङ्गविशेषनिर्देशात्पुंयुक्तमैतिशायनः ॥ ६ ॥

(तदुक्तित्वाच्च दोषश्रुतिरविज्ञाते ॥ ७ ॥ जातिन्तु बादरायणोऽविशेषात्तस्मात्स्त्र्यपि प्रतीयेत जात्यर्थस्याविशिष्टत्वात् ॥ ८ ॥ चोदितत्वाद्यथाश्रुति ॥ ९ ॥ द्रव्यत्वात्तु पुंसां स्याद्द्रव्यसंयुक्तं क्रयविक्रयाभ्यामद्रव्यत्वं स्त्रीणां द्रव्यैः समानयोगित्वात् ॥ १० ॥ तथा चान्यार्थ-दर्शनम् ॥ ११ ॥ तादर्थ्यात्कर्मतादर्थ्यम् ॥ १२ ॥ फलोत्सहाविशेषात्तु ॥ १३ ॥ अर्थेन च समवेतत्वात् ॥ १४ ॥ क्रयस्य धर्ममात्रत्वम् ॥ १५ ॥ स्ववत्तामपि दर्शयति ॥ १६ ॥)

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः। शक्तानामधिकार इत्युक्तम्। तत्र किं पुंसामेवाधिकारोऽथ स्त्रिया अपीति **सन्देहे**, स्वर्गकाम इति पुल्लिङ्गनिर्देशात्पुंस एवाधिकारो न स्त्रियास्तिर्यगादीनामिव। न च स्वर्गकाम इत्यस्योद्देश्यत्वाद्ग्रहैकत्ववल्लिङ्गमविवक्षितमिति वाच्यम्। लिङ्गस्य प्रातिपदिकार्थतया ग्रहैकत्ववत्प्रत्ययार्थत्वाभावाद्ग्रहत्ववद्विवक्षितत्वमेव।

उक्तं हि प्रथमाध्यायस्य चतुर्थपादे **बहुषु बहुवचनम्** इत्यत्र **कैयटे मञ्जर्याश्च** ''स्वार्थद्रव्यलिङ्गसंख्याकर्मादिकारकविशेषा'' इति ''स्वार्थादिपञ्चकः प्रातिपदिकार्थः स्वार्थादित्रिकं वा'' इति।

भार्या पुत्रश्च दासश्च त्रय एवाधानाः स्मृताः।

इति स्मृत्या स्त्रिया अद्रव्यत्वेन द्रव्यत्यागायोगादनुष्ठानासम्भवादननुष्ठाने चाधिकारायोगाच्च नास्त्यधिकार इति **प्राप्तम्**।

तदाह **सूत्रे**, ''स्वर्गकामः'' इति **पुल्लिङ्गनिर्देशात्पुंयुक्तं** पुमधिकारिकं कर्मेति **एतिशायनो** मन्यत इति।

सिद्धान्तस्तु, ग्रहस्वरूपस्य विवक्षा हि न प्रातिपदिकार्थत्वहेतुना। किन्तु उद्देश्यत्वहेतुना। लिङ्गन्तु नोद्देश्यम्। किन्तु ग्रहगतैकत्ववदुद्देश्यविशेषणत्वादविवक्षितमित्यस्त्यधिकारः स्त्रिया अपि। विभक्तिविकाराणां टाबादीनामन्वयव्यतिरेकाभ्यां लिङ्गाभिधायित्वदर्शनाल्लिङ्गस्य प्रातिपदिकार्थत्वोक्तिरयुक्तेत्याहुः। न चाद्रव्यत्वं तस्या इति शंक्यम्। ''पुत्राभावे दुहिता'' इति स्मृत्या पित्रा दत्तधनस्य सम्भवाद्दायसम्भवाच्च। ''भार्या पुत्रश्च'' इति वचनन्त्व-स्वातन्त्र्यपरमिति।

फलन्तु, स्त्रिया अपि कर्मफलभोक्तृत्वरूपाधिकारसिद्धिरिति।

इति तृतीयं यागादिषु स्त्रीपुंसयोरुभयोरधिकाराधिकरणम् (सूत्राणि ६-१६)

अथ चतुर्थं यागे दम्पत्योः सहाधिकाराधिकरणम् (सूत्राणि १७-२१)

स्ववतोस्तु वचनादैककर्म्यं स्यात् ॥ १७ ॥

(लिङ्गदर्शनाच्च ॥ १८ ॥ क्रीतत्वात्त भक्त्या स्वामित्वमुच्यते ॥ १९ ॥फलार्थित्वात् स्वामित्वेनाभिसम्बन्धः ॥ २० ॥ फलवत्ताश्च दर्शयति ॥ २१ ॥)

पूर्वत्र स्त्रीपुंसयोर्द्वयोरधिकारे सामान्यतः सिद्धे, स किं प्रत्येकमुतोभयोरिति चिन्तनात्सङ्गतिः ।

पूर्वपक्षस्तु, येजेतेत्याख्यातैकवचनरूपप्रत्ययोपात्तैकत्वसंख्याया गुणभूतोपादेय-कर्तृगतत्वेन विवक्षितत्वादेकैकशः प्रत्येकमेवेति ।

सिद्धान्तस्तु, ''पत्नी आज्यमवेक्षते यजमानश्च'' इति पत्नीयजमानाभ्यामवेक्षणेन संस्कृतमाज्यं प्रयोगाङ्गं विज्ञायते । तथाऽज्ये आदौ पत्न्यन्वारम्भोऽङ्गं उत्तराघारादौ यजमानान्वारम्भोऽङ्गं विज्ञायते । ततश्च प्रत्येकं प्रयोगे सत्यन्यतरप्रयोगेऽन्यतरावेक्षणादिलोपेन क्रतोर्वैगुण्यापातात् , ''धर्मे चार्थे च कामे च नातिचरिचव्यं'' इति स्मृत्या दम्पत्योः संसृष्टत्वात् । ''न भर्त्रा सह विभजेत्'' इति विभागप्रतिषेधानच्च सहप्रयोगः । यजेतेत्याख्यातोपात्तैकत्वस्य च दम्पत्योः कर्तृता व्यासज्यवृत्तिरेकैवाग्नीषोमयोर्देवतात्ववदिति तदभिप्रायेणोपपत्तेरिति ।

तदाह **सूत्रे, स्ववतोः** साधारणद्रव्यवतोर्दम्पत्योः ''पत्नी आज्यमवेक्षते यजमानश्च'' इत्यादि**वचनात् ऐककर्म्यं** सहैकक्रियाकर्तृत्वं **स्यादि**ति ।

फलन्तु, पृथक्प्रयोगे शूद्रवत् पत्न्या विद्याशून्यतया नाधिकारः । सहप्रयोगे तु यजमानविद्ययैव पत्न्या अपि कार्यसिद्धेर्नाविद्यतयाऽनधिकार इति पूर्वाधिकरणस्थैर्यमेवेति ।

इति चतुर्थं यागे दम्पत्योः सहाधिकाराधिकरणम् (सूत्राणि १७-२१)

अथ पञ्चममेकस्यैव पुंस आधानाधिकरणम् (सूत्रे २२-२३)

द्व्याधानञ्च द्वियज्ञवत् ॥ २२ ॥

(गुणस्य तु विधानत्वात्पत्न्या द्वितीयशब्दः स्यात् ॥ २३ ॥)

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः। आधानं प्रकृत्य श्रूयते "क्षौमे वसानावग्निमादधीयाताम्" "जायापती अग्निमादधीयाताम्" इति। तत्र किं द्वौ पुमांसौ सस्त्रीकौ सहैवाधानं कुर्यातामुतैक एव सस्त्रीकः कुर्यादिति सन्देहः।

पूर्वपक्षस्तु, यथा हि पूर्वत्राऽऽख्यातोपात्तैकत्वस्य कर्तृगामिता तथेहाप्यादधीयातामित्युक्तद्वित्वसंख्याया अपि कर्तृगामित्वाद्द्वयोः पुंसोः सस्त्रीकयोराधाने कर्तृताविधिः। वसानाविति पुल्लिङ्गद्विवचनादुभयोः पुंस्त्वावगमात्। न च "कुक्कुटावानीय मिथुनीकरिष्यमाणः" इत्यादौ कुक्कुटश्च कुक्कुटी च कुक्कुटाविति स्त्रीपुंसयोर्द्वित्ववदिहापि वसानश्चवसाना च वसानाविति विग्रहे 'पुमान् स्त्रिया' इत्येकशेषे वसानाविति स्त्रीपुंसयोरपि द्वित्वं युक्तमिति वाच्यम्। तत्र "मिथुनीकरिष्यमाणः" इति वाक्यशेषात्तथात्वेऽपीहोत्सर्गतः प्राप्तसरूपैकशेषेण पुंद्वित्वपरत्वे बाधकाभावात्। न च "वसन्ते ब्राह्मणोऽग्नीनादधीत" इत्युत्पत्तिशिष्टैकत्वविरोधान्न कर्तृद्वित्वविधिरिति शंक्यम्। तत्रानेकार्थविधिगौरवादाधानविधावेव तात्पर्येणैकत्वे तदभावेनैकवचनस्य निर्देशमात्रार्थत्वात्। न च पुंद्वित्ववत्क्षौमवाससोप्य-प्राप्तेस्तस्यापि विधौ वाक्यभेदः शंक्यः। परिवीतवस्त्रस्यामलिनत्वेन क्षौमसादृश्येन गौण्या वृत्त्या क्षौमे वसानावित्यनुवादत्वोपपत्तेरिति।

तदाह सूत्रे, यथा "एतेन राजपुरोहितौ सायुज्यकामौ यजेयाताम्" इत्यत्र द्वयोर्यज्ञस्तथाऽऽधानमपि द्वयोः पुंसोः स्यादिति।

सिद्धान्तस्तु, यदीदं वाक्यं पुंद्वित्वविधिपरं स्यात्तदा क्षौमे वसानाविति वाक्यमनर्थकम्। अनुवादत्वकीर्तनात्। मुख्यस्य क्षौमपदस्य गौणवृत्तिश्चायुक्ता। तस्मादप्राप्तक्षौमविधिपरमिदं वाक्यम्। द्वित्वं तु स्त्रीपुंसयोः कर्तृताया एकत्वेपि तदधिष्ठानयोर्द्वित्वाद्युक्तमिति "यौ वसानौ

दम्पती अग्निमादधीयाताम्'' इत्यनूद्य ''ते क्षौमे'' इति क्षौमविधिरेव। द्वित्वस्यापि विधौ वाक्यभेदप्रसङ्गाद्दम्पत्योः सहाधिकारेण प्राप्तद्वित्वस्यानुवाद इति, एक एव पुमान् सस्त्रीकोऽग्न्याधानकर्तेति। **फलन्तु,** व्यक्तम्।

इति पञ्चममेकस्यैव पुंस आधानाधिकरणम् (सूत्रे २२-२३)

अथ षष्ठं पत्न्या यावदुक्ताशीर्ब्रह्मचर्यादावेवाधिकाराधिकरणम्

तस्या यावदुक्तमाशीर्ब्रह्मचर्यमतुल्यत्वात् ॥ २४ ॥

दम्पत्योस्सहाधिकारे स्थिते सति, अत्र क्वचित्पुंस एव, न स्त्रिया इति चिन्तनात्सङ्गतिः। ''अगन्म सुवः'' इत्यनेन मन्त्रेण ''उद्यन्नद्य मित्रमहः'' इत्यादिमन्त्रैश्च कर्तव्यमादित्यविषयमुपस्थानम्। तथा ''वसन्तमृतूनां प्रीणामि'' इत्यादिना विहितमनुमन्त्रणादि। तत्सर्वं याजमानसमाख्यया यजमानकर्तृकम्। तत्किं स्त्रीपुंसोभयकर्तृकमुत पुंमात्रकर्तृकमिति **सन्देहे,**

याजमानशब्दस्य यजमानशब्दादपि निष्पत्तिसम्भवेन स्त्रीपुंसयोर्द्वयोरपि यजमानत्वेन समाख्याऽविशेषादुभयकर्तृकं तदिति **प्राप्ते,**

सिद्धान्तः, स्त्रिया अध्ययनशून्यत्वेन तदनुष्ठातुमशक्यत्वान्न तत्राधिकारः। किन्तु पुस एवेति।

तदाह **सूत्रे, तस्या यावदुक्तं** आज्यावेक्षणादिकम्। **आशीः** नखनिकृन्तनाञ्जनस्नानादिः ''नखानि निकृन्तति'' इत्यादिवचनेन व्यवस्थापितफलसंस्कारः। **ब्रह्मचर्यं** ब्रह्मचर्यसाध्यः। कामत एव भवन्ति। अन्यत्तु पुंस एव। तस्या अध्ययनशून्यत्वेन पुंतुल्यत्वाभावादिति।

फलन्तु, उपस्थानाद्यननुष्ठानं स्त्रिया इति।

इति षष्ठं पत्न्या यावदुक्ताशीर्ब्रह्मचर्यादावेवाधिकाराधिकरणम्

अथ सप्तमं यागे शूद्रस्यानधिकाराधिकरणम् (सूत्राणि २५-३८)

चातुर्वर्ण्यमविशेषात् ॥ २५ ॥

(निर्देशाद्वा त्रयाणां स्यादग्न्याधेये ह्यसम्बन्धः क्रतुषु ब्राह्मणश्रुतिरित्यात्रेयः ॥ २६ ॥ निमित्तार्थेन बादरिस्तस्मात्सर्वाधिकारं स्यात् ॥ २७ ॥ अपि वाऽन्यार्थदर्शनाद्यथाश्रुति प्रतीयेत ॥ २८ ॥ निर्देशात्तु पक्षे स्यात् ॥ २९ ॥ वैगुण्यान्नेति चेत् ॥ ३० ॥ न काम्यत्वात् ॥ ३१ ॥ संस्करे च तत्प्रधानत्वत् ॥ ३२ ॥ अपि वा वेदनिर्देशादपशूद्राणां प्रतीयेत ॥ ३३ ॥ गुणार्थित्वान्नेति चेत् ॥ ३४ ॥ संस्कारस्य तदर्थत्वाद्विद्यायां पुरुषश्रुतिः ॥ ३५ ॥ विद्यानिर्देशान्नेति चेत् ॥ ३६ ॥ अवैद्यत्वादभावः कर्मणि स्यात् ॥ ३७ ॥ तथा चान्यार्थदर्शनम् ॥ ३८ ॥)

पत्नीवच्छूद्रस्याप्यधिकार इति शङ्कनात्सङ्गतिः । अग्निहोत्रादिकर्मसु किं चतुर्णां वर्णानामधिकार उतापशूद्राणां त्रयाणामिति सन्देहे,

लिखितपाठादिना तात्कलिकाऽचार्योऽपदेशेन वा शूद्रस्याप्यनुष्ठानहेतुविद्यासम्भवाच्छूद्रस्यापि स्त्रिया इवास्त्यधिकारो याग इति प्राप्तम् । तदाह, क्रतुविधिभिश्चातुर्वर्ण्यमधिक्रियते । कुतः ? अविशेषादिति ।

सिद्धान्तस्तु, अग्निहोत्रादिविधीनामविशेषेण प्रवृत्तेस्तस्याश्च विद्यया विनाऽनुपपत्तेरविशेषविधिवलाच्छूद्रस्य कथञ्चिदुक्तविधया विद्याऽऽक्षेप्या ॥ क्रतुविधयश्च विहितोपनयनसंस्कारलब्धविद्यावतस्त्रैवर्णिकानादाय चरितार्था न शूद्रस्य विद्यामाक्षेप्तुमलमित्यविद्यत्वान्न शूद्रोऽधिकारी इति ।

फलन्तु, शूद्रस्य न क्रत्वनुष्ठानम् ।

इति सप्तमं यागे शूद्रस्यानधिकाराधिकरणम् (सूत्राणि २५-३८)

अथाष्टमं यागे निर्धनस्याप्यधिकाराधिकरणम् (सूत्रे ३९-४०)

त्रयाणां द्रव्यसम्पन्नः कर्मणो द्रव्यसिद्धित्वात् ॥ ३९ ॥

(अनित्वात्तु नैवं स्यदर्थाद्धि द्रव्यसंयोगः ॥ ४० ॥)

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः । त्रयाणां मध्ये किं द्रव्यवत एवाधिकारोऽथाद्रव्यस्यापि कर्मार्थं द्रव्यार्जनं कृतवत इति **सन्देहे,**

पूर्वत्र यथा क्रतुविधयः स्वाध्यायविधिसिद्धविद्यावतोऽधिकृत्य नाविद्यस्य विद्यामाक्षिपन्तीत्यविद्यस्य नाधिकार इत्युक्तं तथा पुमर्थतयोपात्तद्रव्यवतोऽधिकृत्य नाद्रव्यस्य द्रव्यार्जनमाक्षिपन्तीत्यद्रव्यस्य नाधिकार इति **प्राप्तम् ।**

तदाह, **त्रयाणां** मध्ये **द्रव्यसम्पन्न** एव क्रतुभिरधिक्रियते । कुतः ? **कर्मणो द्रव्यसिद्धित्वात्** द्रव्यसाध्यत्वात् इति ।

सिद्धान्तस्तु, विद्या हि स्वाध्यायविधिना त्रैवर्णिकानां सिद्धेति तैरेवानुष्ठानोपपत्तेः क्रतुविधीनां विद्यानाक्षेपकता युक्ता । द्रव्यवत्ता तु न केनचिद्विध्यन्तरेण सिद्धा । यतस्तानधिकृत्य क्रतुविधीनां द्रव्यानाक्षेपकता स्यात् । न चासत्यपि विध्यन्तरे भोजनादिना जीवनार्थतयाऽर्जितद्रव्या एवाधिक्रियन्तामिति वाच्यम् । अद्रव्यस्यापि भोजनार्थं प्रयतितव्यत्वात्क्रतूनां भोजनादेश्च पुमर्थत्वे कस्यचिद्विशेषस्याभावात् । अतो यावत्किञ्चित्पुरुषस्य द्रव्यसाध्यं प्रयोजनं तत्सर्वमविशेषेण द्रव्यार्जनप्रयुक्तमिति क्रतुविधिरपि भोजनादिवदद्रव्या-र्जनमाक्षिपतीत्यद्रव्योपि द्रव्यार्जनं कृत्वाऽधिकरोतीति ।

फलन्त्वद्रव्यस्यापि तदार्जनेनाधिकार इति ।

इत्यष्टमं यागे निर्धनस्याप्यधिकाराधिकरणम् (सूत्रे, ३९-४०)

अथ नवमं यागे अङ्गहीनस्याप्यधिकाराधिकरणम्

अङ्गहीनश्च तद्धर्मा ॥ ४१ ॥

आतिदोशिकी **सङ्गतिः** । अङ्गहीनस्यास्त्यधिकार उत नेति **सन्देहे**, द्रव्यहानेर्बहिरङ्गतया अधिकाराविरोधकत्वेऽपि, अक्षिरोगाद्युपद्रवेण हस्ताद्यङ्गहानिस्त्वन्तरङ्गतयाऽधिकारं विरुणद्धीत्यनधिकारोऽङ्गहीनस्येति **प्राप्ते**,

रोगाद्युपद्रवपरिहारेणाङ्गानि समाधाय क्रतुकरणं युज्यत इत्यद्रव्यस्येवाङ्गहीनस्याप्यस्त्यधिकार इति **सिद्धान्तः** । तदाह **सूत्रे**, **अङ्गहीनोऽपि तद्धर्मा** द्रव्यहीनसमानधर्मा । तद्वदधिकारीति यावदिति ।

फलम्, औषधादिना समाधेयाङ्गहानेरपि पुंसोऽधिकारसिद्धिरिति व्यक्तम् ।

इति नवमं यागेऽङ्गहीनस्याप्यधिकाराधिकरणम्

अथ दशममचिकित्स्याङ्गवैकल्यस्य यागानधिकाराधिकरणम्

उत्पत्तौ नित्यसंयोगात् ॥ ४२ ॥

पूर्वत्र समाधेयाङ्गवैकल्यस्य पुंसोऽधिकार इवासमाधेयाङ्गवैकल्यस्याप्यस्त्यधिकार उत नेति **सन्देहे**, पूर्वत्रेवासमधेयाङ्गहानेः साङ्गकर्मानुष्ठानाशक्तेः पूर्ववैषम्यान्नास्ति सर्वत्राऽधिकार इति **सङ्गतिपूर्वपक्षौ** । काम्यकर्मणो व्यङ्गत्वे फलाहेतुत्वेन तत्र तस्यानधिकारेऽपि नित्यकर्मणामाहिताग्निना त्यक्तुमशक्यत्वादीषदङ्गलोपेनापि तस्यास्त्यधिकारो नित्येष्विति **सिद्धान्तः** ।

तदाह **सूत्रे**, आज्यावेक्षणादीनामु**त्पत्तावेव** क्रतुभिर्नि**र्त्यसंयोगात्** आज्यावेक्षणाद्यङ्गवति क्रतावसमाधेयाङ्गवैकल्यस्य कथञ्चिदप्यसामर्थ्यादनधिकरः काम्येष्टिष्विति । फलन्तु, तस्य नित्यानुष्ठानमेवेति ।

इति दशममचिकित्स्याङ्गवैकल्यस्य यागानधिकाराधिकरणम् ।

अथैकादशं दर्शपूर्णमासयोस्त्र्यार्षेयस्यैवाधिकाराधिकरणम्।

अत्र्यार्षेयस्य हानं स्यात् ॥ ४३ ॥

अत्रापि पूर्ववैषम्येण शङ्कनात्सङ्गतिः। दर्शपूर्णमासयोः ''आर्षेयं वृणीते'' इति विधाय श्रूयते ''एकं वृणीते। द्वौ वृणीते। त्रीन् वृणीते। न चतुरो वृणीते। न पञ्चातिवृणीते'' इति।

अस्यार्थः, ऋषिर्गोत्रप्रवर्तकः काश्यपादिः। तस्य सम्बन्धः आर्षेयः। तं वृणीते उच्चारयतीत्यर्थः। तदुच्चारणञ्च काश्यपगोत्रोऽहं भारद्वाजगोत्रोऽहम् इत्येकर्षिसम्बन्धविषयम्। उपमन्युवसिष्ठगोत्रोऽहमित्यादिरूपेण ऋषिद्वयसम्बन्धविषयम्। आङ्गिरसबार्हस्पत्य-भारद्वाजगोत्रोऽहमित्यादिरूपेण ऋषित्रयसम्बन्धविषयम्। ऋषिचतुष्टयसम्बन्धविषयं नोच्चारयेत्। पञ्चार्षेयानतिक्रम्य षडादीनार्षेयान्नैवोच्चारयेदिति। तत्र **सन्देहः**, एकार्षेयद्व्यार्षेययोरप्यधिकार उत त्र्यार्षेयस्यैवेति।

पूर्वपक्षस्तु, पूर्वत्रासमाधेयाङ्गहानेरनधिकारोक्तावपीह त्र्यार्षेयस्यैव नाधिकारः। ''आर्षेयं वृणीते'' इति सामान्येन ऋषिसम्बन्धोच्चारणविधिर्यथा त्र्यार्षेयत्वेन विशेष्यते तथैकार्षेयत्वादिनापि विशेष्यत इति, चतुर्णां षडार्षेयादीनां प्रतिषेधेन तदन्येषामेकार्षेयव्द्यार्षेयत्र्यार्षेयपञ्चार्षेयाणा-मप्यधिकारप्राप्तेरिति।

सिद्धान्तस्तु, एकार्षेयादीनामपि विधौ वाक्यभेद प्रसङ्गात् ''त्रीन् वृणीते'' इत्यस्यैव विधित्वम्। ''एकं वृणीते'' ''द्वौ वृणीते'' इत्येतदुभयमवयुत्यानुवादेन स्तावकं ''एकवरणद्विवरणे अप्रशस्ते अपि यदा कर्तव्ये तदा त्र्यार्षेयस्य प्रशस्तस्य कर्तव्यत्वं किम् वाच्यमिति। चतुर्निषेध-पञ्चातिक्रमनिषेधाभ्यामपि त्रित्वमेव स्तूयते ''चतुरादयोऽत्यन्तविलम्बकारित्वादप्रशस्ताः। त्रित्वं तु न तथेति प्रशस्तम्'' इति। तस्मात् कर्मण्यधिकुर्वन् यजमानस्त्रीनेवोच्चारयेत्। न न्यूनम्। नाप्यधिकमिति फलितार्थः। तदाह **सूत्रे**, **अत्र्यार्षेयस्य** हानमधिकारस्य **स्यात्** इति।

फलन्तु, ऋषित्रयसम्बन्धोच्चारणवत एव कर्मण्यधिकारो नान्यस्येति।

इत्येकादशं दर्शपूर्णमासयोस्त्र्यार्षेयस्यैवाधिकाराधिकरणम्

अथ द्वादशं चतुर्वर्णातिरिक्तस्य रथकारस्याधानेऽधिकाराधिकरणम्

(रथकारन्यायः सूत्राणि ४४-५०)

वचनाद्रथकारस्याधानमस्य सर्वशेषत्वात् ॥ ४४ ॥

(न्याय्यो वा कर्मसंयोगाच्छूद्रस्य प्रतिषिद्धत्वात् ॥ ४५ ॥ अकर्मत्वात्तु नैवं स्यात् ॥ ४६ ॥ आनर्थक्यश्च संयोगात् ॥ ४७ ॥ गुणार्थेनेति चेत् ॥ ४८ ॥

उक्तमनिमित्तत्वम् ॥ ४९ ॥ सौधन्वनास्तु हीनत्वान्मन्त्रवर्णात्प्रतीयेरन् ॥ ५० ॥)

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः। "वसन्ते ब्राह्मणोऽग्नीनादधीत। ग्रीष्मे राजन्यः। शरदि वैश्यः" इति विधाय श्रुतं "वर्षासु रथकार आदधीत" इति वाक्यं किं ब्राह्मणादीनामेव "रथं करोति" इति व्युत्पत्त्या रथकरणे निमित्ते वर्षाकालविध्यर्थमुत रूढ्याऽवान्तरवर्णस्येति **सन्देहे,** पूर्वत्र त्र्यार्षेयाणामेव वरणविधिरिव त्रैवर्णिकानामेव विद्वत्त्वात्कालमात्रविधाने च लाघवात्तेषामेव कालविधिः। नाविदुषोऽवान्तरवर्णस्य कालविशिष्टाधानविधिः। न चौत्पत्तिकवसन्तादिकाल-विरोधात्कथं तेषामेव कालान्तरविधिरिति वाच्यम्। नित्यान्नैमित्तिकस्य बलवत्त्वादिति **प्राप्ते,**

सिद्धन्तः, योगाद्रूढेर्बलवत्त्वात् रूढ्याऽवान्तरजातियुक्तस्य रथकारसंज्ञकस्येदमाधानं वर्षाकालविशिष्टं विधीयते। तस्याविद्वत्त्वेपि वचनबलात्तावन्मात्रोपयुक्तज्ञानसम्पादनसम्भवादिति।

तदाह **सूत्रे, वचनाद्रथकारस्यैवाधानम्। अस्याधानस्य सर्वशेषत्वात्** सर्वेषां त्रैवर्णिकानामाधानमुक्त्वा अनन्तरमुक्ततया परिशेषादत्रैवर्णिकस्य रथकारस्येदमाधानमिति। रथकारस्तु करण्यां माहिष्याज्जातः कथ्यते। शूद्रायां वैश्यादुत्पन्ना करणी। वैश्यायां क्षत्रियादुत्पन्नो माहिष्यः। तदाह याज्ञवल्क्यः

माहिष्येण करिण्यान्तु रथकारः प्रजायते।
माहिष्यौ द्वौ प्रजायेते विट्शूद्राङ्गनयोर्नृपात्।
शूद्रायां करणी वैश्यादिति पद्यान्तु जायते।
.... सुधन्वा चायमेव च।

इत्युक्तसुधन्वापरनाम्नो रथकारस्यात्र ग्रहणमित्ययं विशेषो बाष्यादौ ज्ञेयः । फलन्तु, अवान्तरवर्णस्याधानानुष्ठानम् ।

इति द्वादशं चतुर्वर्णातिरिक्तस्य रथकारस्याधानेऽधिकाराधिकरणम्

(रथकारन्यायः सूत्राणि ४४ -५०)

अथ त्रयोदशं त्रैवर्णिकभिन्नस्य निषादस्य रौद्रयागेऽधिकाराधिकरणम्

(निषादस्थपतिन्यायः सूत्रे ५१-५२)

स्थपतिर्निषादः स्याच्छब्दसामर्थात् ॥ ५१ ॥

(लिङ्गदर्शनाच ॥ ५२ ॥)

पूर्ववैषम्येणात्र शङ्कनात्सङ्गतिः । ''वास्तुमयं रैद्रं चरुं निर्वपेत्'' इति प्रकृत्य श्रूयते ''एतया निषादस्थपतिं याजयेत्'' इति । वास्तुशब्दो द्रव्यविशेषवचनः । तत्र सन्देहः, निषादानामाधिपत्यं कुर्वन् द्विज एव निषादस्थपतिशब्देनोच्यते । तस्यात्राधिकराः किं वा निषाद एव यः स्थपतिस्थस्यात्रेष्टावधिकार इति ।

पूर्वपक्षस्तु, युक्तं पूर्वत्र योगाद्रूढेर्बलीयस्त्वेन रथकारशब्दस्य त्रैवर्णिकेतरजातिविशेष-परत्वेनात्रैवर्णिकपरत्वम् । निषादस्थपतिशब्दस्य त्रैवर्णिके जातिविशेषे च यौगिकत्वाविशेषात् षष्ठीसमासाश्रयेण स्वतस्सिद्धाग्निविद्यत्रैवर्णिकपरतैव युक्ता । त्रैवर्णिकपरत्वे च स्थपतीष्टेरग्निविद्यावत्त्रैवर्णिकाधिकारिकत्वेनाग्निविद्याकल्पनागौरवाभावः । कर्मधारयमाश्रित्य जातिविशेषपरत्वोक्तावग्निविद्याकल्पनाप्रसङ्गः । तस्मात् त्रैवर्णिकाधिकारिकतेष्टेरिति ।

सिद्धान्तस्तु, षष्ठीतत्पुरुषपक्षे सम्बन्धवाचिषष्ठ्या आश्रयणेन निषादपदस्य निषादसम्बन्धीति सम्बन्धिनि लक्षणापातात्, कर्मधारये तु न कस्यापि लक्षणेति

शब्दसामर्थ्यादनग्निविद्यस्यापि निषदस्यैव स्थपतेरिष्टावधिकार इति । तदाह सूत्रे, स्थपतिर्निषादःस्यादित्यादि । व्यक्तः सूत्रार्थः ।

फलन्तु, रौद्रेष्टिर्निषादस्येति ।

इति त्रयोदशं त्रैवर्णिकभिन्नस्य निषादस्य रौद्रयागेऽधिकाराधिकरणम्

(निषादस्थपतिन्यायः सूत्रे ५१-५२)

इति श्रीभाट्टसंग्रहे सर्वतन्त्रस्वतन्त्रश्रीसुधीन्द्रतीर्थगुरुपादशिष्य
श्रीराघवेन्द्रतीर्थयतिसार्वभौमकृते षष्ठाध्यायस्य प्रथमः पादः

अस्मिन् पादे	अधिकरणानि	१३	सूत्राणि	५२
आदितः	अधिकरणानि	३७५	सूत्राणि	९९६

अथ षष्ठाध्यायस्य द्वितीयः पादः

अथ प्रथमं सत्रे प्रत्येकं सत्रिणः फलसम्बन्धाधिकरणम् (सूत्रे १-२)

ॐ ।। पूर्वपादे साक्षादधिकारपरस्वर्गकामादिनां पर्यालोचनया अधिकारिव्यवस्थोक्ता। अत्र तु कर्तृसंख्यावाचकाऽख्यातपर्यालोचनया प्राधिकारिव्यवस्था बहिरङ्गोच्यते इति पूर्वानन्तर्यस्य ततोऽर्थभेन्दश्चेति ज्ञेयम् ।

पूरुषार्थैकसिद्धत्वात्तस्य तस्याधिकारः स्यात् ।। १ ।।

(अपि चोत्पत्तिसंयोगो यथा स्यात्सत्त्वदर्शनं तथाभावो विभागे स्यात् ।। २ ।।)

इदमाम्नायते ''ऋद्धिकामास्सात्रमासीरन्'' इति । तत्र च सत्रे बहवः कर्तारः श्रुताः ''सप्तदशावराः सत्रमासीरन्'' इति वचनात् । तत्र सत्रफलं प्रत्येकं कृत्स्नमुत परिषद्गामि कृत्स्नं फलम् । प्रत्येकं तु फलावयव इति **सन्देहः**।

पूर्वपक्षस्तु, यद्यपि ''ये ऋद्धिकामास्ते सत्रमासीरन्'' इति कामिनः प्रधानभूतानुद्दिश्य विधीयमानं कर्म प्रतिप्रधानमावर्तमानं प्रत्येकमेव पूर्णं फलं साधयति। उद्देश्यगतबहुत्वस्यग्रहैकत्वस्येवाविवक्षितत्वात् । तथाप्यासीरन्नित्याख्यातोपात्तबहुत्वस्योपादेयकर्तृगततयोत्तरनये वक्ष्यमाणदिशा विवक्षितत्वात् । कर्तृत्वश्च न प्रत्येकं सम्भवति । एकेन कृते कर्मण्यन्यस्य कर्तृत्वायोगात् । अतो बहुवचनेनावगतसहप्रयोगबलात्समुदायगतमेव व्यासज्यकर्तृत्वमिति फलमपि तथैवेति प्रत्येकं तदवयव एव । न कृस्नं फलमिति ।

सिद्धान्तस्तु, यदि समुदाये व्यासज्यकर्तृत्वमेकं स्यात्तदा कर्तृबहुत्ववाचिबहुवचनमुपरुद्ध्येत । तेनानेकेषां सहप्रयोगावगमेन युगपदेकत्र कर्मणि बहूनां कर्तृतोपपत्तेः । पर्यायेण कर्तृत्वे ह्येकेन कृ तेऽन्यस्य कर्तृत्वायोगः । तस्मात्प्रत्येकमेव कर्तृत्वमिति प्रत्येकमेव कृत्स्नं फलम् ।

तदाह **सूत्रे, तस्य तस्याधिकारः** कृत्स्नफलभात्त्वं स्यात् । कुतः ? **पुरुषार्थस्य प्रत्येकमेव सिद्धत्वादिति ।**

फलन्तु, न फलावयवकामिनामधिकारः । किन्तु कृत्स्नफलकामिनामेवेति ।

इति प्रथमं सत्रे प्रत्येकं सत्रिणः फलसम्बन्धाधिकरणम् (सूत्रे १-२)

अथ द्वितीयं दर्शादौ कर्त्रैक्यनियमाधिकरणम् (सूत्राणि ३-१२)

प्रयोगे पुरुषश्रुतेर्यथाकामी प्रयोगे स्यात् ॥ ३ ॥

(प्रत्यर्थं श्रुतिभाव इति चेत् ॥ ४ ॥ तादर्थ्ये न गुणार्थताऽनुक्तेऽर्थान्तरत्वात्कर्तुः प्रधानभूतत्वात् ॥ ५ ॥ अपि वा कामसंयोगे सम्बन्धात्प्रयोगायोपदिश्येत प्रत्यर्थं हि विधिश्रुतिर्विषाणवत् ॥ ६ ॥ अन्यस्य स्यादिति चेत् ॥ ७ ॥ अन्यार्थेनाभिसम्बन्धः ॥ ८ ॥ फलकामो निमित्तमिति चेत् ॥ ९ ॥ न नित्यत्वात् ॥ १० ॥ कर्म तथेति चेत् ॥ ११ ॥ न समवायात् ॥ १२ ॥)

पूर्वाक्षेपेण वा पूर्वन्यायेन वाऽत्र शङ्कनात्सङ्गतिः । दर्शपूर्णमासादिषु किमेको द्वौ बहवोऽनियमेन कर्तार उत एक एवेति नियम इति सन्देहः ।

पूर्वपक्षस्तु, स्वर्गकामादिपदागतैकत्वस्योद्देश्यगतत्वेन लिङ्गस्येवाविवक्षितत्वादेक एव कर्तेति न नियमः । न च यजेतेत्याख्यातेन यागानुरक्तां स्वर्गभावनां विदधता आक्षिप्तः कर्ता क्रियां प्रति गुणत्वेनान्वेतीति तस्य परिच्छेदाकांक्षायां तत्परिच्छेदकतया अन्वीयमानमेकत्वं विवक्षितमेवेति शंक्यम् । भावनाविधौ हि स्यादेवम् । न च सा विधीयते । ''यो यत्कामः स तत्कुरुते'' इत्येवं स्वर्गकामिनः स्वर्गभावनायाः प्राप्तत्वेन तदनुवादेन तत्करणतया यागस्यैव विधेयत्वेनानुवाद्यभावनान्वितकर्तृगतैकत्वस्याप्यनुवाद्यगतत्वेनाविवक्षितत्वमेव । एवञ्च पूर्वत्रापि ''आसीरन्'' इत्याख्यातोपात्तबहुत्वस्याप्युक्तन्यायेन न विवक्षा युक्तेति सत्रे प्रत्येकं कर्तृत्वादिचिन्ताप्ययुक्तेति ।

तदाह सूत्रे, **प्रयोगे यथाकामी स्यात्** । एको द्वौ बहवो वा यजेरन् इति । कुतः ? **प्रयोगे पुरुषस्य** गुणत्वेनाश्रवणात् आख्यातगतसंख्याया अविवक्षितत्वादिति ।

सिद्धान्तस्तु, फलकामिनः फलभावनायाः सामान्यतः प्राप्तत्वेऽपि यागानुरक्तत्वाकारेण अप्राप्तेरनुवादलिङ्गस्य यच्छब्दादेरभावाच्च यागानुरक्तत्वाकारेण फलभावनैवाऽख्यातेन विधीयत इति विधीयमानभावनान्वितत्वेन गुणतया सम्बद्ध्यमानकर्तृगतैकत्वस्योपादयत्वेन पश्वेकत्वव-द्विवक्षितत्वादेकैक एव दर्शपूर्णमासादिकर्मकर्ता । न त्वनियम इति ।

फलन्तु, पूवोक्तार्थसमर्थनम् ।

इति द्वितीयं दर्शादौ कर्त्रैक्यनियमाधिकरणम् (सूत्राणि ३-१२)

अथ तृतीयमारब्धकाम्यकर्मणोऽपि समाप्तिनियमाधिकरणम् (सूत्राणि १३-१५)

प्रक्रमात्तु नियम्येताऽरम्भस्य क्रियानिमित्तत्वात् ॥ १३ ॥

(फलार्थित्वाद्वाऽनियमो यथाऽनुपक्रान्ते ॥ १४ ॥ नियमो वा तन्निमित्तत्वात्कर्तुस्तत्कारणं स्यात् ॥ १५ ॥)

प्रसङ्गिकी **सङ्गतिः** । ''पशुकामो यजेत'' ''वृष्टिकामो यजेत'' इत्यादिकाम्यकर्मणि कामिना प्रक्रान्ते सति मध्ये फलप्राप्त्या निमित्तान्तरेण वा फलेच्छायां निवृत्तायामपि प्रक्रान्तं कर्म नियमेन समापनीयमुत नेति **सन्देहे,** साधनानुष्ठानस्य फलार्थत्वान्निष्पन्ने च फले अपगते च कामे पुनस्तदनुष्ठाने कृत्याभावान्न समापनीयं कर्मेति **प्राप्ते,**

सिद्धान्तः । प्रकान्तस्य कर्मणोऽसमाप्तौ निन्दाप्रयश्चित्तयोः श्रवणादवश्यं समापनीयमेवेति । **तथा हि,** तैत्तिरीये ''देवताभ्यो वा एष आवृश्च्यते यो यक्ष्य इत्युक्त्वा न यजते त्रैधातवीयेन यजेत । न देवताभ्य आवृश्च्यते'' इति निन्दाप्रायश्चित्तयोः श्रवणम् ।

तदाह **सूत्रे, प्रक्रमात्तु** आरम्भादेव समाप्तौ पुरुषो **नियम्येत** । कुतः ? आरम्भस्य क्रियासमाप्तौ **निमित्तत्वादिति** । **फलन्तु,** आरब्धस्य समापनं व्यक्तम् ।

इति तृतीयमारब्धकाम्यकर्मणोऽपि समाप्तिनियमाधिकरणम् (सूत्राणि १३-१५)

अथ चतुर्थमारब्धलौकिककर्मणः समाप्तेरनियमाधिकरणम् (सूत्राणि १६-१८)

लोके कर्माणि वेदवत्ततोऽधिपुरुषज्ञानम् ॥ १६ ॥

(अपराधेपि च तैः शास्त्रम् ॥ १७ ॥ अशास्त्रा त्तूपसम्प्राप्तिः शास्त्रं स्यान्न प्रकल्पकं तस्मादर्थेन गम्येताप्राप्ते वा शास्त्रमर्थवत् ॥ १८ ॥)

पूर्वन्यायेन शङ्कनात्सङ्गतिः । वैदिककर्मवत्स्वगृहनिर्माणादि लौकिकमपि कर्म प्रक्रान्तं चेन्नियमेन समाप्यमुत नेति सन्देहे, शास्त्रोक्तस्य कर्मणः प्रक्रान्तस्यासमापने निन्दाप्रायश्चित्तयोः श्रवणात्, रथादिनिर्माणस्य शिल्पशास्त्रसिद्धत्वात् गान्धर्वायुर्वेदधनुर्वेदोक्तकर्मणो गान्धर्वादिशास्त्रसिद्धत्वेन शिल्पस्मृत्यादेरपि वेदमूलत्वकल्पनादवश्यं लौकिकमपि कर्म वैदिककर्मवत्समाप्यमेवेति प्राप्तम् ।

तदाह सूत्रे, लोके यानि कर्माणि तान्यपि वेदवत् वेदोक्तकर्मवत् समापनीयानि । कुतः ? पुरुषमधिक्रियन्त इत्यधिपुरुषाणि गृहादिकर्माणि तेषां ज्ञानं ततो वेदादेवेति ।

सिद्धान्तस्तु, स्यादेवं रथगृहनिर्माणादेः शास्त्रीयत्वे । न चैवम् । तद्बोधकशास्त्राभावात् । तत्स्मृत्यादेश्चोहापोहकुशलपुरुषोत्प्रेक्षामूलत्वेन दृष्टार्थत्वेन च वेदमूलत्वाभावात् । तस्मात्समाप्यमेवेति न नियम इति । न च गृहे देवतास्थापनार्थत्वे गृहनिर्माणस्याप्यसमाप्तौ ''देवताभ्य आवृश्च्यते'' इति वचनोक्तनिन्दादि प्राप्तनोतीति शंक्यम् । गृहदेवतार्चानिवेशनस्य पुरुषार्थतया गृहकर्मणस्तादर्थ्येन देवताश्रयव्यापारत्वाभावादिति ।

फलन्तु, उपक्रान्तस्य लौकिककर्मणो न समापननिर्बन्धः ।

इति चतुर्थमारब्धलौकिककर्मणः समाप्तेरनियमाधिकरणम् (सूत्राणि १६-१८)

अथ पञ्चमं प्रतिषिद्धकर्मणामनुष्ठानेऽनिष्टापाताधिकरणम् (कलञ्जन्यायः सूत्रे १९-२०)

प्रतिषेधेष्वकर्मत्वात्क्रिया स्यात् प्रतिषिद्धानां विभक्तत्वादकर्मणाम् ॥ १९ ॥

(शास्त्राणान्त्वर्थवत्त्वेन पुरुषार्थो विधीयते तयोरसमवायित्वात्तादर्थ्ये विध्यतिक्रमः ॥२०॥)

पूर्वरीत्याऽत्र शङ्कनात्सङ्गतिः। अनारभ्य श्रूयते ''न कलञ्जं भक्षयेल्लशुनं गृञ्जनम्'' इति। तत्र किं भक्षणाभावसङ्कल्पो विधीयते, किं वा भक्षणं प्रतिषिद्ध्यत इति **सन्देहः**।

पूर्वपक्षस्तु, न भक्षयेदित्यत्र नञोऽव्यवहितेन धात्वर्थभक्षणेनैवान्वयो न व्यवहितेन विधिप्रत्ययेन। तथा च न भक्षणमभक्षणमिति नेक्षेतोद्यन्तमादित्यमित्यादाविव पर्युदासेन भक्षणाभावस्याविधेयतया भक्षणभिन्नो भक्षणाभावसङ्कल्पो नञन्वितभक्षधातुप्रकृत्योक्तो विधिप्रत्ययेन विधीयते। तस्य चाभक्षणसङ्कल्पस्य विश्वजिन्न्यायेन स्वर्गः फलत्वेन कल्प्य इति। पूर्वत्र गृहादिलौकिककर्मसमाप्तौ तत्कामिनः समापनमन्यस्य नेत्यनियमवत्स्वर्गकामिनो भक्षणाभावसङ्कल्पो नान्यस्येत्यनियम इति।

तदाह **सूत्रे, प्रतिषेधेषु** प्रतिषेधतया प्रतीतेषु ''न कलञ्जं भक्षयेत्'' इत्यादिषु **प्रतिषिद्धानां** भक्षणाभावादीनां **अकर्मत्वाद**क्रियात्वात् सङ्कल्परूपा **क्रियैव** विधेया **स्यात्**। **अकर्मणां विभक्तत्वात्** विध्यविषयत्वदिति।

सिद्धान्तस्तु, भक्षयेदित्येकपदश्रुत्या धात्वंशस्य प्रत्ययांशेन प्राप्तान्वयापेक्षया तदन्तरसमभिव्याहाररूपवाक्यप्रमाणेन प्राप्तो नञा पदैकदेशधात्वर्थस्यान्वयो जघन्य आश्रयणीयः। नञन्वितधातोर्भक्षणाभावसंकल्पे लक्षणादोषः अश्रुतफलकल्पना च स्यात्। तस्मात् ''न भक्षयेत्'' इति विधिप्रत्ययान्वितेन धातुना नञनवये सति रागप्राप्तभक्षणस्य निषेधः प्रत्यवायपरिहाराय विधीयत इति। प्रत्यवायपरिहाराय भक्षणवर्जनमिति फलम्।

इति पञ्चमं प्रतिषिद्धकर्मणामनुष्ठानेऽनिष्टापाताधिकरणम् (कलञ्जन्यायः सूत्रे १९-२२)

अथ षष्ठं गुर्वनुगमनादीनामुपनयनोत्तरकालकर्तव्यताधिकरणम् (सूत्रे २१-२२)

तस्मिंस्तु शिष्यमाणानि जनने प्रवर्तेरन् ॥ २१ ॥

(अपि वा वेदतुल्यत्वादुपायेन प्रवर्तेरन् ॥ २२ ॥)

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः। "प्राङ्मुखो भुञ्जीत" "उदङ्मुखो मूत्रपुरीषं कुर्यात्" इति स्मार्तनियमः किमुपनयनात्प्रागप्यनुसर्तव्योऽथोपनयनात्प्रभृतीति सन्देहे,

तन्नियमस्याऽऽहवनीयाद्यग्निभिर्मन्त्रैर्वा साध्यत्वाभावाज्जननानन्तरमुपनयनात्प्रागपि शक्तौ सत्यामनुसर्तव्य एव। तथा च कलञ्जाद्यभक्षणस्य सर्वाधिकारिकत्ववत्स्मार्तनियमोप्युपनीतानुपनीतसर्वाधिकारिक इति प्राप्तम्।

तदाह सूत्रे, तस्मिन् पुरुषे शिष्यमाणानि कर्माणि जनने जातो यदा शक्नुयात्तदैव प्रवर्तेरन्निति।

सिद्धान्तस्तु, श्रौतस्याध्ययनादिनियमस्योपनयनानन्तरभावित्वनियमात्, स्मृतेर्वेदमूलत्वेन वेदमूलस्मृतिप्राप्तनियमस्याप्युपनयनोत्तरकाल एव युक्तत्वात्, "उपनयनादिर्नियमः" इति स्मरणादुपनीतस्यैव नियमो नानुपनीतस्येति।

तथा च सूत्रम्, अपि वा वेदतुल्यत्वादुपायेन प्रवर्तेरन् इति। उपायेन उपनयनेन इत्यर्थः। वेदतुल्यत्वात् स्मृतीनामिति योज्यम्। फलं व्यक्तम्।

इति षष्ठं गुर्वनुगमनादीनामुपनयनोत्तरकालकर्तव्यताधिकरणम् (सूत्रे २१-२२)

अथ सप्तममग्निहोत्रादियावज्जीवकर्मणां स्वकालमात्रकर्तव्यताधिकरणम्

(अग्निहोत्रन्यायः सूत्राणि २३-२६)

अभ्यासो वाऽकर्मशेषत्वात्पुरुषार्थो विधीयते ॥ २३ ॥

(तस्मिन्नसम्भवन्नर्थात् ॥ २४ ॥ न कालेभ्य उपदिश्यन्ते ॥ २५ ॥ दर्शनात्काललिङ्गानां कालविधानम् ॥ २६ ॥)

उपनयननिमित्तकर्माधिकारचिन्ताप्रसङ्गाज्जीवननिमित्तकर्माधिकारोऽत्र चिन्त्यत इति **सङ्गतिः**। इदमाम्नायते ''यावज्जीवमग्निहोत्रं जुहोति'' ''यावज्जीवं दर्शपूर्णमासाभ्यां यजेत'' इति। तत्र किं सन्ततमनुष्ठानमुत स्वस्वकाल एवेति **सन्देहः**।

पूर्वपक्षस्तु, यावच्छब्दोपबन्धनं हि जीवनं धातुसम्बन्धाधिकारविहितणमुलप्रत्ययवशेन सम्बन्धान्तरासम्भवाद्धोमानुरक्तां भावनां प्रति निमित्तत्वेनैव सम्बद्ध्यत इति जीवने निमित्ते कर्मणो विधानात्, निमित्ते सति नैमित्तिकावश्यम्भावात्सततं तदनुष्ठानं कार्यम्। न च सायंप्रातःकालावग्निहोत्राङ्गत्वेन विहितौ अमावास्यापौर्णमासीकालौ दर्शपूर्णमासयोः। कर्मणः सातत्येनानुष्ठानेऽङ्गलोपः प्रसज्यत इति शंक्यम्। उत्तरपादादौ वक्ष्यमाणदिशा नैमित्तिके असम्भाविताङ्गत्यागेप्यवैगुण्यात्। तस्मात्सततमनुष्ठेयमग्निहोत्रादकर्मेति। तदाह सूत्रे, वाशब्दो नञर्थः। यावज्जीवमिति **नाभ्यासविधिः। अकर्मशेषत्वात्।** किन्तु जीवने निमित्ते पुरुषार्थोऽयं विधीयते। अतो निमित्तस्य सत्त्वात्सदाऽनुष्ठानमिति।

सिद्धान्तस्तु कालस्याप्यङ्गत्वेपि विधेयाङ्गस्यैवाशक्यस्य त्यागेप्यवैगुण्यं कर्मणः। कालश्चानुपादेयत्वात्प्रयाजादिवन्न विधेयः। किन्तु तस्मिन् काले कर्म विधीयते ''प्रदोषेऽग्निहोत्रं जुहोति'' ''व्युष्टायां निशि प्रातः'' ''पौर्णमास्यां पौर्णमास्या यजेत'' ''अमावास्यायां अमावास्या यजेत'' इति। तस्य चायमर्थः। प्रदोषादिकाले कर्म कर्तव्यमिति। ततश्चार्थात्तत्कालजीवनमेव निमित्तं भवतीति तत्काल एवानुष्ठानम्। न कालान्तरे। अग्निविद्ययोरुपादेयाङ्गत्वेऽप्यध्ययना-धानविधिसिद्धत्वान्न तत्त्याग इत्याहुः। **फलन्तु** व्यक्तम्।

इति सप्तममग्निहोत्रादियावज्जीवकर्मणां स्वकालमात्रकर्तव्यताधिकरणम्

(अग्निहोत्रन्यायः सूत्राणि २३-२६)

अथाष्टममग्निहोत्रादीनां स्वस्वकालावृत्त्या आवृत्त्यधिकरणम् (सूत्रे २७-२८)

तेषामौत्पत्तिकत्वादागमेन प्रवर्तेत ॥ २७ ॥

(तथा हि लिङ्गदर्शनम् ॥ २८ ॥)

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः । किमग्निहोत्रादिप्रागुक्तकर्मणः सकृदेवानुष्ठानमुत प्रतिस्वस्वकालमभ्यास इति सन्देहे,

सायम्प्रातरादिकालशास्त्रानुरोधेन जीवनरूपनिमित्तसङ्कोचवत् कालशास्त्रस्य सकृत्कर्मानुष्ठानेनापि कृतार्थत्वादेकप्रातरादिकालीनमेव जीवनं निमित्तं स्यादित्यग्निहोत्रादि नावर्तनीयमिति प्राप्ते,

सिद्धान्तः सत्यं कालशास्त्रानुरोधेन निमित्तसङ्कोचः । न हि तावतैकप्रातरादिकालीनमेव जीवनं निमित्तमिति सिद्ध्यति । एकपदानुपादानात् । किन्तु प्रातरादिकालीनं जीवनं निमित्तमिति सिद्धेत् । तथाविधजीवनस्यावृत्तौ नैमित्तिकावृत्तिरावश्यिकीति प्रतिस्वस्वकालमग्निहोत्रादिकमावर्तनीयमिति ।

तदाह सूत्रे, तेषां प्रातरादिकालानां औत्पत्तिकत्वात् उत्पत्तिशिष्टत्वात् आगमेन प्रातरादितत्तत्कालानां प्राप्त्या कर्म प्रवर्तेतेति ।

फलन्तु, कर्मावृत्तिः ।

इत्यष्टममग्निहोत्रादीनां स्वस्वकालावृत्त्या आवृत्त्यधिकरणम् (सूत्रे २७-२८)

अथ नवमं दर्शादौ भेदाद्यावृत्त्या होमावृत्त्यधिकरणम्

तथातःक्रतुसंयुक्तानि ॥ २९ ॥

आतिदेशिकी सङ्गतिः । दर्शपूर्णमासयोः कुम्भ्यादिपात्रभेदे आज्यादेः स्कन्दने च निमित्ते सति होम उक्तः ''भिन्ने जुहोति'' स्कन्ने जुहोति'' इति । सोऽयं होमः सकृदुतासकृत् कार्य इति सन्देहे,

युक्तं पूर्वत्र पुरुषार्थेषु नैमित्तकेषु निमित्तावृत्तावावृत्तिकथनम्। प्रत्यावृत्त्यन्यान्यस्य फलस्य निष्पत्तेः, क्रत्वर्थेषु भेदनहोमादिषु क्रतूपकारस्यैव फलत्वेन सकृत्कृतहोमेनैव तत्सिद्धेरेकस्मिन् प्रयोगे भेदादेरावृत्तावपि न होमावृत्तिरिति विशेषचोद्ये **प्राप्ते**,

सिद्धान्तः, यथाशास्त्रं फलस्य कल्प्यत्वात्, शास्त्रे च ''आगते निमित्ते नैमित्तिकमवश्यं कार्यम्'' इत्यवगमात् भेदादेरावृत्तौ तन्निमित्तहोमानामप्यावृत्तिः। यावती आवृत्तिस्तावदुपकारसहित एव क्रतुः फलहेतुरिति कल्पनात्क्रत्वर्थेष्वपि निमित्तवृत्तौ नैमित्तिकावृत्तिः।

तदाह **सूत्रे**, अन्तःक्रतुसंयुक्तानि क्रत्वन्तर्गतानि नैमित्तिकानि **तथा** पूर्वत्रेव आवर्तनीयानीति।

फलन्तु, क्रत्वर्थनैमित्तिकस्याप्यावर्तनम्।

इति नवमं दर्शादौ भेदाद्यावृत्त्या होमावृत्त्यधिकरणम्।

अथ दशमं गुर्वनुगमनादीनां प्रतिनिमित्तमावृत्त्यधिकरणम्।

आचाराद्गृह्यमाणेषु तथा स्यत्पुरुषार्थत्वात्॥ ३०॥

अत्राप्यातिदेशिकी **सङ्गतिः**। ''गुरुरनुगन्तव्योऽभिवाद्यश्च'' ''वृद्धवयाः प्रत्युत्थेयः'' इत्यादीनां गुर्वनुगमनादीनामाचारप्रमाणकानां गुरुगमनादिनिमित्तकानां निमित्तवृत्तावावृत्तिरस्त्युत नेति **सन्देहे**,

गुर्वनुगमनादेर्गुरुप्रीतिरूपदृष्टप्रयोजनकत्वात्तत्प्रीत्यनुसारेण सकृदसकृद्वा स्वेच्छया कर्तव्यता। न त्ववश्यमावर्तनीयतेति **प्राप्ते**,

दृष्टार्थेष्वपि विहितेषु नियमादृष्टोपगमाद्यदा यदा गुरुगमनादिनिमित्तं सम्पद्यते तदा तदा अनुगमनादीन्यपि कार्याणीति **सिद्धान्तः**।

तदाह सूत्रे, आचाराद्गृह्यमाणेष्वनुष्ठीयमानेषु तथा स्यात् निमित्तावृत्तावावृत्तिःस्यात्। पुरुषार्थत्वादिति।

फलन्तु, निमित्तावृत्तिवशादावृत्त्यनुष्ठानं व्यक्तम्।

इति दशमं गुर्वनुगमनादीनां प्रतिमित्तमावृत्त्यधिकरणम्

अथैकादशमृणत्रयापाकरणस्य ब्राह्मणक्षत्रियवैश्यानां नित्यताधिकरणम्

ब्राह्मणस्य तु सोमविद्याप्रजमृणवाक्यसंयोगात् ॥ ३१ ॥

पूर्ववैषम्येणात्र शङ्कनात्सङ्गतिः। ''सोमेन यजेत'' ''स्वाध्यायमधीयीत'' ''प्रजामुत्पादयेत्'' इति श्रुतं सोमविद्याप्रजं नित्यमुत काम्यमिति सन्देहः।

पूर्वपक्षस्तु, युक्तं पूर्वत्र निमित्तावृत्तौ नैमित्तिकावृत्तेरवश्यकर्तव्यत्वम्। सोमविद्याप्रजस्य तु नावश्यकार्यत्वम्। सोमादित्रयस्य काम्यत्वेन कामाधिकारिकतया कामसत्त्वे एव कार्यत्वात्। सोमस्तावत् ''ज्योतिष्टोमेन स्वर्गकामो यजेत'' इति फलश्रवणात्काम्यः। स्वाध्यायाध्ययनप्रजोत्पादावपि सोमस्तावत् ''ज्योतिष्टोमेन स्वर्गकामो यजेत'' इति फलश्रवणात्काम्यः। स्वाध्यायाध्ययनप्रजोत्पादावपि विश्वजिन्न्यायेन स्वर्गफलत्वकल्पनात् काम्यावेवेति।

सिद्धान्तस्तु, नित्यमेव सोमविद्यप्रजम्। न काम्यम्। येनावश्यकर्तव्यता न स्यात्। तथा हि, ज्योतिष्टोमस्तावत्, ''वसन्ते वसन्ते ज्योतिषा यजेत'' इति वीप्सायुक्तः कालः सप्तम्या निमित्तत्वेनावगम्यत इति प्रतिवसन्तकालं विधीयमानः सन् यावन्निमित्तं नैमित्तिकत्वादावर्तनीयः। न च काम्यस्यैव सोमस्य प्रतिवसन्तमभ्यासोऽत्र विधीयत इति वाच्यम्। तथात्वे यजेतेत्यस्याभ्यासे लक्षणापत्तेः। अध्ययनमप्यश्रुतफलमावश्यकाग्निहोत्राद्यनुष्ठानौपयिकधर्माधर्मावबोधरूपदृष्टफलकत्वेन नित्यक्रत्वनुष्ठानहेतुत्वात्, आवश्यकजपयज्ञ-

प्रायश्चित्तपारायणाद्युपयोगिग्रन्थावधारणसाधनत्वाच्चावश्यकर्तव्यमिति तदपि नित्यमेव । प्रजोत्पादनमपि ''जायमानो ब्राह्मणस्त्रिभिर्ऋणवा न जायते । ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणो यः पुत्री यज्वा ब्रह्मचार्यसौ'' इत्यनृणत्वफलश्रवणात्, अनुत्पाद्य सुतान् लोकमधो गच्छतीति प्रत्यवायस्मरणाच्च, नित्यमेव । श्रुतौ ब्राह्मणशब्दस्य क्षत्रवैश्ययोरप्युपलक्षणत्वात् त्रयाणामप्यावश्यकाः सोमादय इति ।

तदाह **सूत्रे, ब्राह्मणस्य** ब्राह्मणादिवर्णत्रयस्य **सोमविद्याप्रजम्** । द्वन्द्वैकवद्भावः । कुतः ? **ऋणवाक्येन संयोगात्** अनृणत्वफलोक्तिपरवाक्यसंयोगादिति ।

फलन्तु, सोमादित्रयं त्रैवर्णिकैरवश्यानुष्ठेयमिति ।

इत्येकादशमृणत्रयापाकरणस्य ब्राह्मणक्षत्रियवैश्यानां नित्यताधिकरणम्

इति श्रीभाट्टसंग्रहे सर्वतन्त्रस्वतन्त्रश्रीसुधीन्द्रतीर्थगुरुपादशिष्य
श्रीराघवेन्द्रतीर्थयतिसार्वभौमकृते षष्ठाध्यायस्य द्वितीयः पादः

अस्मिन् पादे	अधिकरणानि	११	सूत्राणि	३१
आदितः	अधिकरणानि	३८६	सूत्राणि	१०२७

अथ षष्ठाध्यायस्य तृतीयः पादः

अथ प्रथमं नित्ये यथाशक्त्यङ्गानुष्ठानाधिकरणम् (सूत्राणि १-७)

हरिः ॐ । पूर्वपादे जीवनादेरधिकारनिमित्ततोक्ताविह पादे तद्गतविशेषजिज्ञासायां किञ्चिदङ्गत्यागेऽप्यधिकारनिमित्तकत्वसिद्धिरुच्यत इति पूर्वानन्तर्यं ततोऽस्य भेदश्च ज्ञेयः ।

सर्वशक्तौ प्रवृत्तिः स्यात्तथाभूतोपदेशात् ॥ १ ॥

अपि वाऽप्येकदेशः स्यात्प्रधाने ह्यर्थनिर्वृत्तिर्गुणमात्रमितरत्तदर्थत्वात् ॥ २ ॥

तदकर्मणि च दोषस्तस्मात्ततो विशेषः स्यात्प्रधानेनाभिसम्बन्धात् ॥ ३ ॥

कर्मभेदं तु जैमिनिः प्रयोगवचनैकत्वात्सर्वेषामुपदेशः स्यादिति ॥ ४ ॥

अर्थस्य व्यपवर्गित्वादेकस्यापि प्रयोगे स्याद्यथा क्रत्वन्तरेषु ॥ ५ ॥

विध्यपराधे च दर्शनात्समाप्तेः ॥ ६ ॥

प्रायश्चित्तविधानाच्च ॥ ७ ॥

यावज्जीवमग्निहोत्रं जुहोति'' इत्यादिनित्यकर्मणि किं सर्वाङ्गोपसंहारशक्तस्यैवाधिकार उताशक्याङ्गत्यागिनोऽपीति सन्देहः ।

पूर्वपक्षस्तु सर्वाण्यङ्गानि युगपत्कथम्भावाकांक्षिण्या भावनया इत्थम्भावेन गृह्यन्त इत्येकादशाद्यपादे **अङ्गानान्तु, शब्दभेदादि**त्यत्र वक्ष्यमाणत्वेन, असत्सु सर्वेष्वङ्गेषु प्रधानोपकारानिष्पत्तेः, अनुपकृताच्च प्रधानात्फलासिद्धेश्च, असति च फले फलस्वाम्य-रूपाधिकाराधिकाराभावान्न सर्वाङ्गोपसंहाराशक्तस्य नित्ये कर्मण्यप्यधिकार इति । तदाह सूत्रे, **सर्वशक्तौ** सर्वाङ्गोपसंहारसामर्थ्ये सत्येव प्रधाने **प्रवृत्तिः स्यात्** । **तथाभूतस्य** सर्वाङ्गयुक्तस्यैव जीवनादौ निमित्ते सत्युपदेशादिति ।

सिद्धान्तस्तु, ''यावज्जीवं'' इति यावच्छब्दोपबद्धं जीवनं धातुसम्बन्धविहितणमुल्-

प्रत्ययरूपश्रुत्या सम्बन्धान्तरासम्भवान्निमित्तत्वेन यागानुरक्तां भावनां प्रत्यवगम्यते। निमित्ते च सति नैमित्तिकमवश्यं कार्यमिति प्रधानवाक्यावगताऽवश्यकत्वस्य सत्यपि निमित्ते यत्किञ्चिदङ्गानुष्ठानाशक्त्या परित्यागे प्रधानवाक्यविरोधः स्यात्। अतः प्रधानानुरोधेनाशक्याङ्ग-हानेनापि नैमित्तिकं प्रयोक्तव्यम्। तावतैव शास्त्रवशात्फलसिद्धिरिति यथाशक्त्यङ्गानुष्ठानेनापि प्रधानप्रयोगेऽस्त्यधिकार इति। तदुक्तं सूत्रे, **अपि वाप्येकदेशः स्यादित्यादि**। एकदेशेनाप्यङ्गानां स्यादेव प्रयोग इत्यर्थः।

फलन्तु यथा शक्त्यङ्गानुष्ठानेन नित्यकर्मणोऽनुष्ठानम्।

इति प्रथमं नित्ये यथाशक्त्यङ्गानुष्ठानाधिकरणम् (सूत्राणि १-७)

अथ द्वितीयमङ्गवैकल्ये काम्यस्य निष्फलत्वाधिकरणम् (सूत्राणि ८-१०)

काम्येषु चैवमर्थित्वात्॥ ८॥

(असंयोगात्तु नैवं स्याद्विधेः शब्दप्रमाणत्वात्॥ ९॥ अकर्मणि चाप्रत्यवायात्॥ १०॥)

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः। ''ऐन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकामः'' इत्यादौ काम्ये कर्मणि यथाशक्तिप्रयोगेणाधिकारः, उत सर्वाङ्गोपसंहारेणैवेति **सन्देहे,**

पूर्वत्र नित्येषु प्रधानवाक्यबलेन यथाशक्तिप्रयोगेणाधिकार इत्युक्तन्यायेन काम्यकर्मण्यपि प्रधानवाक्येन प्रजाकामादिमात्रस्याधिकारावगमत्तद्बलेन यथाशक्तिप्रयोगेणैवाधिकार इति **प्राप्तम्।** तदाह, **काम्येषु चैवं** सर्वाङ्गाशक्तस्याप्यधिकारः। कुतः ? सर्वाङ्गाशक्तस्याप्यर्थित्वाविशेषादिति।

सिद्धान्तस्तु, निमित्ते सति नैमित्तिकस्याकारणे निमित्तश्रुतिबाधप्रसङ्गेन प्रधानवाक्य-गतनिमित्तश्रुत्यनुग्रहाय नैमित्तिकेष्वशक्याङ्गत्यागोक्तावपि कामश्रुतेः सर्वाङ्गोपसंहारसमर्थ-विषयत्वेप्यविरोधात्, श्रुताङ्गत्यागे मानाभावान्न काम्येषु यथाशक्तिप्रयोगः।

फलन्तु, काम्येषु सर्वाङ्गोपसंहारशक्तस्यैवाधिकारो नान्यस्येति।

इति द्वितीयमङ्गवैकल्ये काम्यस्य निष्फलत्वाधिकरणम् (सूत्राणि ८-१०)

अथ तृतीयं द्रव्यभेदेऽपि कर्माभेदाधिकरणम् (सूत्रे, ११-१२)

क्रियाणामाश्रितत्वाद्द्रव्यान्तरे विभागः स्यात् ॥ ११ ॥

(अपि वाऽव्यतिरेकाद्रूपशब्दाविभागाच्च गोत्ववदैककर्म्यं स्यान्नामधेयश्च सत्त्ववत् ॥ १२ ॥)

काम्येष्वपि यथाशक्तिप्रयोगरूपातिप्रसङ्गनिरासेन नैमित्तके यथाशक्तिप्रयोगः स्थापितः। स च स्थापितोऽपि तादृशः प्रयोगः श्रुतद्रव्यालाभे प्रतिनिध्युपादानासिद्धौ न प्रतितिष्ठतीति प्रतिनिधिविचारस्य तच्छेषत्वात्तद्विचारः प्रस्तोष्यते। तदुपोद्घातत्वेनेदमारभ्यते। दर्शपूर्णमासादिषु श्रुतव्रीह्याद्यभावे नीवारादिद्रव्यान्तरमुपादीयमानं कर्मान्तरत्वं तेषामापादयति, उत नेति सन्देहे,

द्रव्यदेवतयोर्यागस्वरूपत्वाद्द्रव्यात्मनः कर्मणो द्रव्यभेदे भिन्नतावश्यम्भावात् कर्मान्तरत्वमापादयतीति प्राप्तम्। तदाह, क्रियाणां द्रव्याश्रितत्वात् द्रव्यभेदे क्रियाभेदः स्यादिति।

सिद्धान्तस्तु, द्रव्यकर्मणोरत्यन्ताभेदस्य बाधेन द्रव्याश्रितकर्मण ईषद्भेदस्यपि सत्त्वात्, चैत्रमैत्रादिव्यक्तिभेदेऽपि यथा ब्राह्मणत्वादिजातिरनुगतप्रत्ययबवलान्न भिद्यते तथा द्रव्यभेदेऽप्यनुगतप्रत्ययबलात्क्रियैक्यमेवोपेयमिति।

फलन्तु, पूर्वपक्षे न प्रतिनिधिः। किन्त्वपूर्वमेव द्रव्यम्। सिद्धान्ते तु प्रतिनिधिद्रव्यमिति।

इति तृतीयं द्रव्यभेदेऽपि कर्माभेदाधिकरणम् (सूत्रे ११-१२)

अथ चतुर्थ नित्यकर्मणोऽनित्यप्रारब्धकर्मणश्य द्रव्यापचारे प्रतिनिधिना समापनाधिकरणम् (सूत्राणि १३-१७)

श्रुतिप्रमाणत्वाच्छिष्टाभावेऽनागमोऽन्यस्याशिष्टत्वात् ॥ १३ ॥

(क्वचिद्विधानाच्च ॥ १४ ॥ आगमो वा चोदनार्थाविशेषात् ॥ १५ ॥ नियमार्थः क्वचिद्विधिः ॥ १६ ॥ तन्नित्यं तच्चिकीर्षा हि ॥ १७ ॥)

अवसरलक्षणात्र **सङ्गतिर्ध्येया**। नित्यकाम्यकर्मणोः श्रुतद्रव्यस्यालाभे द्रव्यान्तरं प्रतिनिधाय प्रयोक्तव्यमुत नेति **सन्देहे,**

सर्वशक्त्यधिकरणे यथाशक्तिप्रयोगोक्तावप्यशक्याङ्गत्याग एवोक्तो नाङ्गान्तरागमः। न च द्रव्यान्तरागमे प्रमाणमस्ति। न चाऽग्नेयादिकर्मचोदनैव द्रव्यान्तरोपादाने मानमिति शंक्यम्। तस्याः कर्मविधिमात्र एव पर्यवसानात्। ''व्रीहिभिर्यजेत'' इत्यादिविधिरपि व्रीहीणामेव प्रयोजक इति **प्राप्तम्।**

तदाह **सूत्रे, शिष्टस्याभवे** प्रतिनिधेरनागम एव स्यात्। कुतः? श्रुति-प्रमाणकत्वाद्वीह्यादीनां। अन्यस्य नीवारादेरशिष्टत्वादिति।

सिद्धान्तस्तु, कर्मविधान परापि कर्मचोदना द्रव्यमन्तरेणानुपपन्ना द्रव्यसामान्यमाक्षिपति। न चैवं व्रीह्यादिशास्त्रवैयर्थ्यम्। नियमार्थत्वात्तस्य। यदा व्रीहीणामलाभेन व्रीहिशास्त्रं यदा यद्द्रव्यं नियन्तुं न शक्नोति तदा कर्मचोदनैवान्यद्द्रव्यमक्षिपतीत्यस्ति प्रतिनिधिरूपद्रव्यान्तरोपादानमिति। प्रतिनिधेये विशेषस्तु **सामान्यं तच्चिकीर्षा** हीत्यत्र वक्ष्यते।

फलन्तु, श्रुतद्रव्याभावेऽपि प्रतिनिधिमादाय नित्यं कर्मारम्भणीयम्। आरब्धं काम्यमपि समापनीयम्। आरब्धकाम्यस्याप्यसमाप्तौ प्रत्यवायापत्त्या नित्यतुल्यत्वादिति।

इति चतुर्थं नित्यकर्मणोऽनित्यप्रारब्दकर्मणश्च द्रव्यापचारे प्रतिनिधिना

समापनाधिकरणम् (सूत्राणि १३-१७)

अथ पञ्चमं देवताग्निमन्त्रक्रियाणामपचारे प्रतिनिध्यबाभाधिकरणम् (सूत्रे १८-१९)

न देवताग्निशब्दक्रियमन्यार्थसंयोगात्॥ १८॥

(देवतायां च तदर्थत्वात्॥ १९॥)

आपवादिकी **सङ्गतिरत्र** ज्ञेया । ''आग्नेयोऽष्टाकपालः'' ''सौर्यं चरुम्'' इत्यादौ श्रुताऽग्न्यादिर्देवता, आहवनीयादिरग्निः, ''बर्हिर्देवसदनं दामि'' इत्यादिर्मन्त्रः, प्रयाजप्रोक्षणादिः क्रिया । तदेषां देवतादीनां विस्मरणादिना अपचारे देवतान्तराग्न्यन्तरादिकं प्रतिनिधेयमुत नेति **सन्देहे**, पूर्वन्यायेनास्ति तत्रापि प्रतिनिध्युपादानमिति **प्राप्ते**,

सिद्धान्तः, श्रुतवस्तुकार्यसिद्ध्यर्थं हि प्रतिनिध्युपादानम् । पुरोडाशनिष्पत्तिरूपं कार्यं व्रीह्यपचारे नीवारेण भवति । देवतादिकार्यं तु नान्येन सिद्ध्यति । न ह्याग्नेययागो विष्णुना निष्पद्यते । नाप्याहवनीयकार्यो होमोऽसंस्कृतेन वह्निना सिद्ध्यति । नापि बर्हिर्देवेति मन्त्रसाध्यमर्थप्रकाशनमन्येन मन्त्रेण । नापि प्रयाजप्रोक्षणादिकार्यमदृष्टमविहितेनान्यार्थं विहितेन वा क्रियान्तरेण सिद्ध्यति । तस्मान्नास्ति देवतादीनां प्रतिनिधिरिति ।

तदाह **सूत्रे**, **देवताग्निशब्दक्रियं** । द्वन्द्वैकवद्भावः । **शब्दो** मन्त्रः । न प्रतिनिधेयम् । कुतः ? प्रतिनिधीयमानानां **अन्यार्थेनैव संयोगात्** विहितदेवतादिप्रयोजनसाधकत्वाभावात् इति ।

फलन्तु, देवतादेः प्रतिनिध्यनुपादनम् ।

इति पञ्चमं देवताग्निमन्त्रक्रियाणामपचारे प्रतिनिध्यभावाधिकरणम् (सूत्रे १८-१९)

अथ षष्ठं प्रतिषिद्धद्रव्यस्य प्रतिनिधित्वाभावाधिकरणम्

प्रतिषिद्धं चाविशेषेण हि तच्छ्रुतिः ॥ २० ॥

पूर्ववैषम्येणात्र शङ्कनात्**सङ्गतिः** । ''मौद्गं चरुं निर्वपेच्छ्रीकामः'' इत्यत्र मुद्गाभावे माषाद्याः प्रतिनिधेया उत नेति **सन्देहे**,

देवतान्तरादीनामप्रतिनिधेयत्वेऽपि माषादीनां श्रुतद्रव्यकार्यकरत्वसम्भवात्प्रतिनिधेया माषाद्याः । न च ''अयज्ञिया वै माषाश्चणकाः इति यज्ञाङ्गतानिषेधान्न प्रतिनिधेयता तेषामिति वाच्यम् । तेषामयज्ञाङ्गत्वेपि तदग्तमुद्गाद्यंशस्य तदङ्गत्वसम्भवादिति **प्राप्ते**,

सिद्धान्तः, ''अयज्ञियाः'' इति यज्ञसम्बन्धमात्रस्यैव निषेधात्प्रतिनिधित्वेनोपादाने अङ्गत्वावश्यम्भावेन निषेधश्रुतिविरोधान्न प्रतिनिधेया निषिद्धा माषाद्या इति ।

तदाह **सूत्रे, प्रतिषिद्धश्च** न प्रतिनिधेयम् । कुतः ? **हि** यस्मात् तच्छ्रुतिर्निषेधश्रुतिः **अविशेषेण** सम्बन्धमात्रविषयिणी तस्मादित्यर्थः । **फलन्तु**, निषिद्धस्य न प्रतिनिधित्वेनोपादानम् ।

इति षष्ठं प्रतिषिद्धद्रव्यस्य प्रतिनिधित्वाभावाधिकरणम्

अथ सप्तमं स्वामिनः प्रतिनिध्यभावाधिकरणम्

तथा स्वामिनः फलसमवायात्फलस्य कर्मयोगित्वात् ॥ २१ ॥

अत्रापि पूर्ववैषम्येण शङ्कनात्**सङ्गतिः** । यजमानेन प्रोषिते कार्यान्तरे व्यापृते मृते वा यजमानकार्यकरणाय पुरुषान्तरं प्रतिनिधेयमुत नेति **सन्देहे**, माषादाविव निषेधाभावात्प्रतिनिधेयमिति **प्राप्ते**,

सिद्धान्तः, किं मृते यजमाने प्रतिनिधिरन्विष्यते, किं वा कार्यान्तरव्यापृते । नाद्यः । असम्भवात् । अन्यस्मिन्नपचरिते यजमानः प्रतिनिधिं गृह्णाति । यजमाने मृते कः प्रतिनिधिं गृह्णीयात् । को वाऽध्वर्युप्रभृतीन् प्रवर्तयेत् । न द्वितीयः । यजमानकार्यस्य फलभोगस्यान्यस्मिन्नसम्भवात् । सम्भवे वा तस्यैव स्वमित्वेन प्रतिनिधित्वाभावात् । तस्मान्नास्ति यजमानस्य प्रतिनिधिः ।

तदाह **सूत्रे, तथा** देवतादीनामिव **स्वामिनो** यजमानस्य नास्ति प्रतिनिधिः । कुतः ? **फलसमवायात्** । अस्यैव फलभाक्त्वेन स्वद्रव्यत्यागफलसंस्कारादिषु कर्तुत्वौचित्यात् । न च प्रतिनिधिना तेषु कृतेष्वपि स्वमिनः फलमस्त्विति वाच्यम् । **फलस्य कर्मयोगित्वात्** कर्तृगामित्वादिति । **फलन्तु** व्यक्तम् ।

इति सप्तमं स्वामिनः प्रतिनिध्यभावाधिकरणम्

अथाष्टमं सत्रे कस्यचित्स्वामिनोऽपचारे प्रतिनिध्यादानाधिकरणम् (सत्रन्यायः)

बहूनां तु प्रवृत्तेऽन्यमागमयेदवैगुण्यात् ॥ २२ ॥

आपवादिकी **सङ्गतिः**। ''सप्तदशावराः सत्रमासीरन्'' इति सत्रे श्रुतेषु सप्तदशसु प्रवृत्तेषु तत्रैकस्मिन् मृते तत्स्थाने अन्यः प्रतिनिधेयः, उत नेति **सन्देहे**, सत्रे ''यजमानास्ते ऋत्विजः'' इति सप्तदशानां यजमानत्वात्, पूर्वत्र यजमानस्य नास्ति प्रतिनिधिरित्युक्तत्वात्तेन न्यायेनात्रापि नेति **प्राप्ते**,

सिद्धान्तः, ''यजमानाः'' इति वाक्ये ''ये ऋत्विजस्ते यजमानाः'' इति आर्विज्योदशेन यजमानपदोक्तं विधीयते। कर्त्रभिप्रायविहितलडात्मनेपदस्थानीयशानजन्तेन यजमानपदेन फलभागित्वं कर्तृत्वं च द्वयमुच्यते। एकेनैव शानजन्तेन द्वयोर्विधौवाक्यभेदात्। तत्र प्रतिनिधेरुत्तराधिकरणन्यायेन फलवत्त्वाभावेऽपि कर्तृत्वं सम्भवत्येवेति कर्तृगतसाप्तदश्यसंख्यां पूरयितुं कर्तृत्वांशे प्रतिनिधिरुपेयः। न हि स्वामिसाप्तदश्यं न सम्भवतीत्येतावता सम्भवदपि कर्तृत्वांशसाप्तदश्यं होतव्यमिति।

तदाह **सूत्रे**, **बहूनां** कर्तॄणां सत्रे **प्रवृत्ते** सति कस्यचिदपचारे सति साप्तदश्या- **वैगुण्याद्धेतोः अन्यमागमयेदिति**। **फलन्तु**, सत्रे यजमानस्य प्रतिनिधिसिद्धिः।

इत्यष्टमं सत्रे कस्यचित्स्वामिनोऽपचारे प्रतिनिध्यादानाधिकरणम् (सत्रन्यायः)

अथ नवमं सत्रे प्रतिनिहितस्यास्वामित्वाधिकरणम् (सूत्राणि २३-२५)

स स्वामी स्यात्तत्संयोगात् ॥ २३ ॥

(कर्मकरो वा भृतत्वात् ॥ २४ ॥ तस्मिंश्च फलदर्शनात् ॥ २५ ॥)

प्रासङ्गिकी **सङ्गतिः**। योसावानीतः सत्रे स किं स्वामी फलभागीति यावत्, किं वा कर्तैवेति **सन्देहे**, स्वामिनः स्थाने निपतितत्वात्स्वामित्वमप्यस्ति। तदाह **सूत्रे**, **स** प्रतिनिहतः **स्वामी स्यात्**। **तत्संयोगात्** तेन स्वामिनः स्थानेन संयोगादिति। एवं **प्राप्ते**,

सिद्धान्तः, उपक्रममारभ्य समाप्तिपर्यन्तस्य क्रियानिचयस्यैव फलहेतुभूतभावनारूपस्य आख्यातार्थत्वात् यो ह्यारभ्य कर्म समापयति तस्यैव फलम् । न मध्ये प्रविष्टस्य । न ह्ययं विधिवशात्प्रवृत्तः, येन विधिप्रामाण्यात् फलभाक् स्यत् । तस्मान्नास्ति तस्य फलभात्त्वशब्दितं स्वामित्वम् । न चैवं प्रारभ्य मृतस्यापि फलं न स्यादिति वाच्यम् । इष्टापत्तेः । ''यो दीक्षितानां प्रमीयेतापि तस्य फलम्,'' इति वाक्यन्तु पर्णमय्यधिकरणन्यायेन फलस्वरूपार्थवाद इत्येके । तद्वाक्यबलादेवास्ति फलवत्त्वमित्यन्ये ।

फलन्तु, प्रतिनिधेयस्य फलकामनारहितस्यैव ऋत्विग्वत्प्रवृत्तिरिति ।

इति नवमं सत्रे प्रतिनिहितस्यास्वामित्वाधिकरणम् (सूत्राणि २३-२५)

अथ दशमं सत्रे प्रतिनिहितस्य यजमानधर्मग्राहित्वाधिकरणम्

स तद्धर्मा स्यात् तत्संयोगात् ॥ २६ ॥

सत्रे आनीतस्य फलसंस्काराः कर्तव्या न वेति **सन्देहे**, यद्युक्तदिशा प्रतिनिहितो न स्वामी तर्हि तेन फलसंस्काराः वपनब्रह्मचर्यव्रतादयो न कार्याः । तेषां फलभोगयोग्यता-संपत्त्यर्थत्वादिति पूर्वोक्तस्वामित्वाभावमुपजीव्यात्र शङ्कनात्सङ्गतिपूर्वपक्षौ ज्ञेयौ ।

सिद्धान्तस्तु, तस्य फलाभावेपि ''सप्तदशावराः सत्रमासीरन्'' इति कर्त्रंशे सर्वत्र साप्तदश्यस्य निवेशेनेतरेषां सप्तदशकर्तृकैरेव संस्कारैर्योग्यता जायत इति इतरयोग्यतासंपत्तये प्रतिनिधेरन्यस्याप्यस्ति फलसंस्कार इति । तदाह **सूत्रे, सः** प्रतिनिहितः **तद्धर्मा** स्वमिधर्मा **स्यात्** । **तत्संयोगात्** स्वामिकार्यसंयोगादिति ।

फलन्तु व्यक्तम् ।

इति दशमं सत्रे प्रतिनिहितस्य यजमानधर्मग्राहित्वाधिकरणम्

अथैकादशं द्रव्यापचारे तत्सदृशस्यैव प्रतिनिधित्वाधिकरणम्

सामान्यं तच्चिकीर्षा हि ।। २७ ।।

प्रासङ्गिकी सङ्गतिः । द्रव्यापचारे प्रतिनिधिरुपादेय इत्युक्तं श्रुतिप्रमाणत्वादित्यत्र । तत्र सन्देहः यत्किञ्चिद्द्रव्यं प्रतिनिधेयमुत सदृशमेवेति ।

पूर्वपक्षस्तु, अग्नेयादिचोदनया द्रव्यसामान्यस्यैवाऽऽक्षेपादिच्छया यत्किञ्चिदुपादेयम् । न च व्रीहिशास्त्रवशात्तत्सदृशस्य प्राप्तिः । तस्य व्रीहित्वजात्याक्रान्तवस्तुमात्रविषयत्वादिति ।

सिद्धान्तस्तु, व्रीहिशास्त्रं व्रीहिजात्याक्रान्तवस्तुनोऽङ्गत्वं बोधयत्तदवयवानामप्यङ्गत्वं बोधयति । अवयवावयविनोरनतिरेकात् । एवञ्च व्यक्तिस्तदवयवाश्च सर्व एव क्रियाङ्गतया व्रीहिचोदनया विधीयन्त इति व्रीहिशास्त्रानुग्रहार्थं सदृशस्योपादानम् । तदुपादाने हि व्रीह्यवयवाः कतिपया लभ्यन्ते । जातिमात्रमवयवान्तरमात्रञ्च त्यक्तं भवति । विसदृशोपादाने तु सर्वपरित्यागः स्यात् । अतः सदृशस्योपादानम् । तदाह, येषु सामान्यं सादृश्यमस्ति तच्चिकीर्षैव युक्तेति ।

फलन्तु, अत्यन्तसदृशालाभे मन्दसदृशस्यग्रहः । भूयोवयवानुग्रहादिति ।

इत्येकादशं श्रुतद्रव्यापचारे तत्सदृशस्यैव प्रतिनिधित्वाधिकरणम्

अथ द्वादशं द्रव्यापचारे वैकाल्पिकद्रव्यान्तरानुपादानाधिकरणम् (सूत्राणि २८-३०)

निर्देशात्तु विकल्पयेत्प्रवृत्तम् ।। २८ ।।

(अशब्दमिति चेत् ।। २९ ।। नानङ्गत्वात् ।। ३० ।।)

अत्रापि प्रासङ्गिकी सङ्गतिः । वैकल्पिकेषु व्रीहियवादिषु व्रीहिभिः प्रक्रान्ते प्रयोगे तेषामपचारे किं वैकल्पिकान्तरमुपादेयं किं वा व्रीहिसदृशमिति सन्देहे, मुख्ये सति प्रतिनिध्ययोगाद्यवोपादाने प्राप्ते,

वैकल्पिकेषु यावदेकमनुपक्रान्तं तावदितरस्य प्राप्तिः । उपक्रान्ते तस्मिन् प्रयोगे तदेवाङ्गमितरदनङ्गम् । किञ्च व्रीहिभिः सङ्कल्प्य यवैः कुर्वाणो ''नानृतं वदेत्'' इति क्रत्वङ्गभूतं निषेधशास्त्रमतिक्रामेत् । तस्माद्व्रीहीणामेवाङ्गत्वात्तत्सदृशमेवोपादेयमिति **सिद्धान्तः** ।

तदाह, **प्रवृत्तं** द्रव्यमेव **विकल्पयेत्** विशेषेण कल्प्यत् । तत्सदृशमेवोपादीयेतेति यावत् । कुतः ? तस्यैव **निर्देशात्** सङ्कल्पितत्वादिति । फलं व्यक्तम् ।

इति द्वादशं द्रव्यापचारे वैकल्पिकद्रव्यान्तरानुपादानाधिकरणम् (सूत्राणि २८-३०)

अथ त्रयोदशं पूतीकस्य सोमप्रतिनिधित्वाधिकरणम्

वचनाच्चाऽन्याय्यं भावे तत्सामान्येन प्रतिनिधिरभावादितरस्य ॥ ३१ ॥

पूर्ववैषम्येणात्र शङ्कनात्सङ्गतिः । ''यदि सोमं न विन्देत्पूतीकानभिषुणुयात्'' इति श्रुतम् । तत्र ''सोमाभावे पूतीकैर्यागं कुर्यात्'' इति सोमवत्पूतीकोऽपि यागसाधनत्वेन विधीयते, अथ प्रतिनिधिर्नियम्यत इति **सन्देहः** ।

पूर्वपक्षस्तु, युक्तं व्रीह्यभावे व्रीहिप्रतिनिधितयोपात्तनीवाराणामपचारे न नीवारसदृशोपादानम् । किन्तु विहितव्रीहिसदृशानामेवेति । सोमाभावे उपात्तानां पूतीकानामपचारे पूतीकसदृशमेवोपादेयम् । सोमस्येव तदभावे पूतीकानामपि लिङ्प्रत्ययेन विहितत्वादिति ।

सिद्धान्तस्तु, अपूर्वविधित्वे हि पूतीकानामत्यन्ताप्राप्तं साधनत्वं विधेयमिति गौरवम् । प्रधानविध्याक्षिप्तसामान्यद्रव्येषु सदृशेष्वनेकेषु प्राप्तेषु पाक्षिकप्राप्तानां नियमविधौ लाघवमिति प्रतिनिधिनियम एवायमिति ।

तथा च **सूत्रम्, वचनात्** अन्याय्यं ईषत्सदृशमप्युपादेयम् । **भावे** वचनभावे **हीतरस्य** मुख्यास्याभावे **तत्सामान्येन** मुख्यसादृश्येन प्रतिनिधिरिति । **फलन्तु,** पूतीकापचारे सोम-सदृशस्योपादानम् ।

इति त्रयोदशं पूतीकस्य सोमप्रतिनिधित्वाधिकरणम्

अथ चतुर्दशं प्रतिनिध्यपचारे उपात्तद्रव्यसदृशस्य पुनः प्रतिनिधित्वाधिकरणम्

न प्रतिनिधौ समत्वात् ॥ ३२ ॥

पूर्वक्षेपेणात्र शङ्कनात्सङ्गतिः । यदा प्रतिनिधिनोपक्रान्ते तस्यापचारो भवति तदा किं प्रतिनिधिसदृशमुपादेयं, किं वा मुख्यसादृशमिति **सन्देहः** ।

पूर्वपक्षस्तु, वैकल्पिकेषु व्रीहियवादिष्वेकस्मिन् प्रवृत्तेऽपचरिते च तस्यैव तस्मिन् प्रयोगेऽङ्गत्वान्मुख्यमपि वैकल्पिकान्तरमनुपादायापचरितमुख्यसदृशमेवोपादेयमिति **निर्देशात्** इत्यत्रोक्तन्यायेन प्रतिनिधौ प्रवृत्ते तस्यैव तत्प्रयोगाङ्गत्वात्तदपचारे तत्सदृशमेवोपादेयम् । न तु मुख्यसदृशम् । मुख्यस्य तत्रानङ्गत्वात् । तथा च पूतीकापचारे सोमसदृशस्योपादानमिति प्रागुक्तमयुक्तमिति ।

सिद्धान्तस्तु, व्रीत्ह्यादिप्रतिनिधितयोपादीयमानो नीवारादिर्नाङ्गत्वेनोपादीयते । अङ्गत्वे मानाभावात् । किन्तु नीवारादिगतान् व्रीह्याद्यवयवानुपाददानो नान्तरीयकतया नीवाराद्युपादत्ते । अतस्तदपचारे पुनः श्रुतावयवलाभाय व्रीह्यादिसदृशमेवोपादेयम् । न प्रतिनिधिसदृशमिति प्रागुक्तं सोमसदृशोपादानं युक्तमिति ।

तदाह, **प्रतिनिधौ** नष्टे तत्सदृशं **न** प्रतिनिधेयम् । किन्तु मुख्यसदृशमेव । कुतः ? **समत्वात्** मुख्यसदृशान्तरस्यापि पूर्वप्रतिनिहितसमत्वादिति । फलन्तु मुख्यसदृशस्यैवोपादानं व्यक्तम् ।

इति चतुर्दशं प्रतिनिध्यपचारे उपात्तद्रव्यसदृशस्य पुनः प्रतिनिधित्वाधिकरणम्

अथ पञ्चदशं श्रुतस्यापि प्रतिनिधेरपचारे उपात्तसदृशस्य पुनः प्रतिनिधित्वाधिकरणम्

(सूत्रे ३३-३४)

स्याच्छ्रुतिलक्षणे ॥ ३३ ॥

(न तदीप्सा हि ॥ ३४ ॥)

पूर्ववैषम्येणात्र शङ्कनात्सङ्गतिः । पूतीके प्रक्रान्ते तस्मिन्नपचरिते किं पूतीकसदृशमेवोपादेयमुत सोमसदृशमेवेति **सन्देहे,**

नीवाराणां मानाभावेनानङ्गतया तत्सदृशस्यानुपादानेऽपि सोमावयवोपादानस्य सोमसदृशवस्त्वन्तरेपि सम्भवेन पूतीकानां तन्मात्रोपादानार्थत्वे ''पूतीकानभिषुणुयात्'' इति पूतीकनियमविधानवैयर्थ्यापत्त्या तदन्यथानुपपत्त्या पूतीकांशस्याप्यङ्गतावगमात् प्रकान्तपूतीकापचारे तत्सदृशमेवोपादेयमिति **प्राप्तम्** ।

तदाह,श्रुतिलक्षणे श्रुतिविहिते नष्टे तत्सदृश एव प्रतिनिधिः स्यात् । न मुख्यसदृश इति ।

सिद्धान्तस्तु, पूतीकांशस्याप्यङ्गत्वे'' ''पूतीकानभिषुणुयात्'' इत्यस्यापूर्वविधित्वापत्त्या प्रागुक्तनियमविधित्वभङ्गापत्तेस्तद्गतसोमावयवा एवाऽङ्गम् । पूतीकांशसाहित्यन्तु तेषामेवाङ्गम् । तदभावे सोमावयवोपादानायोगात् । अतः पूतीकापचारे तद्द्वयसम्पादनार्थमुभयसदृशमेव ग्राह्यम् । तदलाभे तु सोमावयवानां प्राधान्यात्तल्लिप्सया सोमसदृशमेव ग्राह्यम् ।

तदाह **सूत्रे, न तदीप्सा हीति** । पूतीके ईप्सा न हीत्यर्थः । **फलं व्यक्तम्** ।

इति पञ्चदशं श्रुतस्यापि प्रतिनिधेरपचारे उपात्तसदृशस्य पुनः प्रतिनिधित्वाधिकरणम्

(सूत्रे ३३- ३४)

अथ षोडशं मुख्यापचारे तत्प्राप्तौ तस्यैवोपादानाधिकरणम्

मुख्याधिगमे मुख्यागमो हि तदभावात् ॥ ३५ ॥

पूर्वाक्षेपेणात्र शङ्कनात्सङ्गतिः । मुख्यं व्रीह्याद्यलभ्यं मत्वा प्रतिनिधिना नीवारादिना

प्रक्रान्ते प्रयोगे यदि मध्ये मुख्यं लब्धं तदा किं मुख्यं गृहीत्वा कर्म समाप्यमुत प्रतिनिधिनैवेति **सन्देहे**,

प्रतिनिधेरनङ्गत्वेपि तेन सङ्कल्पिते प्रयोगे तत्त्यागेन मध्ये लब्धेन मुख्येन क्रियमाणे क्रत्वङ्गानृतवदननिषेधशास्त्रातिक्रमः कृतः स्यात्। अतस्तदनतिक्रमाय प्रतिनिधिनैव प्रयोगः समाप्यः। तदपचारे तत्सदृशेन समाप्यः। यथा व्रीहिसङ्कल्पने तेनैव, तदपचारे तत्सदृशेन, तत्समापनम्। न तु वैकल्पिकयवेन। तथेहापीति प्रतिनिधिसदृशस्यानुपादानं प्रागुक्तमयुक्तमिति **प्राप्ते**,

सिद्धान्तः सङ्कल्पो हि ''यथाशक्ति शास्त्रार्थमनुतिष्ठामि'' इति शास्त्रार्थविषय एव कार्यः। न प्रतिनिधिस्वरूपग्रहणेन। तस्य स्वरूपतोऽनङ्गत्वात्। मुख्ये सति न प्रतिनिधिः शास्त्रार्थो भवति। अतो मुख्यमादायैव समापनम्। तदपचारे तत्सदृशमेवेति। वैकल्पिके तु सङ्कल्पिते वैकल्पिकस्यापि शास्त्रार्थत्वाद्वैषम्यम्।

तदाह, **मुख्याधिगमे** मुख्यस्याधिगमे **मुख्यस्यैवागमः**। **तदभावात्** मुख्याभावाद्धि प्रतिनिध्यादर इति। **फलन्तु**, आगन्तुकमुख्येन समापनं व्यक्तम्।

इति षोडशं मुख्यापचारे तत्प्राप्तौ तस्यैवोपादानाधिकरणम्।

अथ सप्तदशं प्रतिनिधिना प्रारब्धे कर्मणि श्रुतद्रव्यलाभे श्रुतद्रव्येणैव समापनाधिकरणम्

प्रवृत्तेऽपीति चेत्॥ ३६॥

अत्रापि पूर्वाक्षेपेण शङ्कनात्**सङ्गतिः**। यदा यूपार्थं खदिरमलब्ध्वा तत्प्रतिनिधौ कदरे तक्षणादिभिः संस्कृते सति पश्चान्मुख्यः खदिरो यदि पशुनियोजनात्प्रागेव लभ्यते तदा किमुपात्तेन प्रतिनिधिना कार्यं कुर्यादुत तत्त्यागेन मुख्यमेवोपादाय पुनः संस्कारांस्तत्र कृत्वा तत्रैव पशुं नियुञ्जीतेति **संशये**,

प्रवृत्ते प्रतिनिधौ तावता निवृत्तव्यापारं यूपाद्यङ्गविधिशास्त्रं नान्यदुपादापयतीति प्रवृत्तप्रतिनिधौ कदर एव पशुर्नियोज्य इति पूर्वोक्तमागन्तुकमुख्यस्योपादानमयुक्तमिति **प्राप्ते**,

सिद्धान्तः, अङ्गशास्त्रं हि अङ्गमुपादेयमित्येव नोपादापयति। वैयर्थ्यात्। किन्तु प्रधानसाद्गुण्यार्थम्। प्रधानञ्च मुख्ये सति प्रतिनिधिना क्रियमाणं विगुणं स्यादिति तदवैगुण्याय पुनर्मख्यमुपादापयत्येव। प्रधानयूपवशेन गुणभूतसंस्कारवृत्तेर्न्याय्यतया पुनस्तत्र मुख्ये खदिरे तक्षणादिभिः संस्कृते पशुर्नियोज्यः। प्रधानसाद्गुण्यानुरोधेन प्रतिनिधौ कृतसंस्काराणामानर्थक्यस्य अदोषत्वादिति।

तदाह सूत्रे, मुख्याधिगमे मुख्यागम इति चेत् इति स्थिते सतीति यावत्। प्रवृत्तेपि प्रतिनिधाविति शेषः। सति सम्भवे मुख्यागम एव युक्त इति।

फलन्तु आगन्तुकखदिरोपादानम्।

इति सप्तदशं प्रतिनिधिना प्रारब्धे कर्मणि श्रुतद्रव्यलाभेऽपि श्रुतद्रव्येणैव समापनाधिकरणम्

अथाष्टादशं प्रतिनिधौ पशौ नियुक्ते श्रुतद्रव्यलाभेपि प्रतिनिधिनैव समापनाधिकरणम्

नानर्थकत्वात्॥ ३७॥

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः। संस्कृते प्रतिनिधौ कदरे पशुनियोजनान्तरं खदिरे लब्धे पुनस्तमुपादाय तत्र पशुर्नियोज्यः, उत नेति सन्देहे, प्रधानक्रतुसाद्गुण्याय पूर्वोक्तरीत्योपात्तमुख्य एव पशुर्नियोज्य इति प्राप्ते,

पशुनियोजनार्थं हि खदिरोपादानम्। तच्च कदरे कृतमित्यनर्थकः खदिरो न ग्राह्यः। गुणानुरोधेन प्रधानस्य पशुनियोजनस्याऽवृत्तेरयोगात् इति नानर्थकत्वात् मुख्यस्यागम इति सूत्रार्थः। अधिकरणभेदे सूत्रयोरक्षरास्वारस्यं मत्वा प्रवृत्तेपीति चेत्, नानर्थकत्वादित्येकमेवाधिकरणमेतदित्यप्याहुः। तदा तु प्रवृत्तेऽपि पशुनियोजनरूपे प्रधाने मुख्यागम इति चेत् न। अनर्थकत्वात् व्यर्थत्वान्मुख्यस्येति सूत्रार्थः। फलं तु व्यक्तम्।

इत्यष्टादशं प्रतिनिधौ पशौ नियुक्ते श्रुतद्रव्यलाभेऽपि प्रतिनिधिनैव समापनाधिकरणम्

अथैकोनविंशं संस्कारायोग्यस्यापि मुख्यस्यैवोपादनाधिकरणम्

द्रव्यसंस्कारविरोधे द्रव्यं तदर्थत्वात् ॥ ३८ ॥

अत्रापि पूर्वन्यायेन शङ्कनात्सङ्गतिः । यदा तनुत्वात्तक्षणादिसंस्कारायोग्यः खदिरो नियोजनमात्रयोग्यो लब्धः, कदरश्च महान् संस्कारयोग्यः, तदा कस्योपादनामिति **सन्देहे,**

खदिरग्रहे संस्काराणां बहूनां तक्षणाष्टाश्रीकरणादीनां लोपापत्तेः, कदरग्रहे तदुपरिलोपात् संस्कारविधीनां बहूनां बाधापेक्षया ''खादिरो यूपो भवति'' इति खदिरविधिमात्र-पीडनस्यादोषत्वात्पूर्वत्रेव खदिरो नादर्तव्यः, किन्तु कदर एवेति **प्राप्ते,**

सिद्धान्तः, खदिरविकारयूपद्रव्यस्य प्रधानत्वात्, तक्षणादिसस्काराणाञ्च गुणत्वत्, गुणानुरोधेन प्रधानं किञ्चिदपि नोपरोद्धुं युक्तमिति संस्कारहीनोपि खदिर एवोपादेय इति तत्रैव पशुनियोजनमिति ।

तदाह ''द्रव्यसंस्कारविरोधे द्रव्यमेव ग्राह्यम् । कुतः ? संस्कारस्य द्रव्यार्थत्वादिति । **फलन्तु व्यक्तम् ।**

इत्येकोनविंशं संस्कारायोग्यस्यापि मुखयस्यैवोपादानाधिकरणम्

अथ विंशं मुख्यस्य कार्यासाधकत्वे प्रतिनिधेरेवोपादेयताधिकरणम्

अर्थद्रव्यविरोधेऽर्थो द्रव्याभावे तदुत्पत्तिर्द्रव्याणामर्थशेषत्वात् ॥ ३९ ॥

आपवादिकी **सङ्गतिः** । यदाऽतिकृशत्वात्तक्षणादिहीनोपि खदिरो नियोजनेप्ययोग्यः तदा किं मुख्य एवोपादेयः, उत कदर इति **सन्देहे,**

पूर्वन्यायेन प्रधानावैगुण्याय मुख्य एवोपादेयः, तस्य नियोजनाक्षमत्वेपि दृढदण्डाद्युप-ष्टम्भेन कार्यक्षमतासम्पादनसम्भवात् इति **प्राप्ते,**

पशुनियोजनरूपकार्यार्थत्वादेतादृशोपादानेन कार्यासिद्धेर्दृढदण्डान्तरावष्टम्भेन कार्यकारित्वे तस्यादृष्टार्थत्वापत्तिरतः कदर एव सर्वसंस्कारोपेतः कार्यक्षमः प्रतिनिधिरुपादेय इति।

तदाह, **अर्थद्रव्यविरोधे** कार्यद्रव्ययोर्विरोधे **अर्थोऽनुरोध्यः**। कुतः ? **द्रव्याणामर्थशेषत्वात्**। अतो **द्रव्याभावे** कार्यक्षमद्रव्याभावे **तदुत्पत्तिः** प्रतिनिध्युत्पत्तिः इति। **फलन्तु व्यक्तम्**।

इति विंशं मुख्यस्य कार्यासाधकत्वे प्रतिनिधेरेवोपादेयताधिकरणम्

अथैकविंशं प्रधाननिर्वाहकत्वे अङ्गनिर्वाहापर्याप्तस्यापि मुख्यस्योपादानाधिकरणम्

(सूत्रे ४०-४१)

विधेरप्येकदेशे स्यात्॥ ४०॥

(अपि वाऽशक्यत्वादेकदेशेन निवर्तेताऽर्थानामविभक्तत्वाद्गुणमात्रमितरत्तदर्थत्वात्॥ ४१॥)

पूर्वन्यायेन शंकनात्सङ्गतिः। दर्शपूर्णमासयोर्यदा अश्वशफ परिमाणाय स्विष्टकृदिडाप्राशित्रचतुर्धाकरणशंयुवाककालभक्षणरूपशेषकार्यार्थश्चापर्याप्ताः पुरोडाशजातिमात्राभिव्यक्तिसमर्था अल्पव्रीहयो लब्धास्तदा किं तैरेव पुरोडाशः कार्यः, उत नीवारैरिति **सन्देहे**,

पूर्वत्रार्थविरोधेन द्रव्यत्याग इव भूयःशेषकार्यविरोधेन मुख्यत्यागेन प्रतिनिधिनीवारा एव ग्राह्याः। नीवारोपादाने ''व्रीहिभिर्यजेत'' इति व्रीहिशास्त्रमात्रपीडा। व्रीह्युपादाने तु भूयसां शेषकार्याणां बाधः स्यात्। न च व्रीहीणां प्रधानाङ्गत्वात् शेषकार्याणां प्रधानाङ्गपुरोडाशाङ्गत्वात् **अङ्गगुणविरोधे च तादर्थ्यादिति** द्वादशद्वितीयपादीयाधिकरणन्यायेन प्रधानाङ्गव्रीह्यनुरोधेन भूयासां **बाधो** युक्त इति वाच्यम्। व्रीहीणां यागोद्देशेन विधावपि पुरोडाशप्रकृतित्वेन पुरोडाशाङ्गत्वमेव। शेषकार्याणामपि पुरोडाशाङ्गत्वमिति नाङ्गगुणविरोधन्यायावकाश इति **प्राप्तम्**।

तदाह **सूत्रे**, **विधेरेकदेशे** पुरोडाशजातिमात्रे निर्वर्त्यमानेऽपि प्रतिनिधिरुपादेयः **स्यादिति**।

सिद्धान्तस्तु, व्रीहीणां पुरोडाशप्रकृतित्वेऽपि श्रुत्यवगतयागाङ्गत्वमप्यस्त्येवेत्यङ्गगुणविरोधन्यायेन प्रधानाङ्गव्रीह्यनुरोधेन प्रधानाङ्गपुरोडाशाङ्गशेषकार्यपरिलोपो युक्तः। अस्तु वा शेषकार्यतुल्यतया पुरोडाशाङ्गत्वं व्रीहीणाम्। तथापि पुरोडाशद्वारा तेषां यागसाधनत्वात्प्रधानावैगुण्याय शेषकार्यलोपेनापि व्रीहिभिरेव पुरोडाशाः कार्याः। न नीवारैः। मुख्ये सत्यमुख्यग्रहणायोगादिति। तदाह सूत्रे, **अपि वाऽशक्यत्वादेकदेशेनेत्यादि**।

फलन्तु, अल्पत्वेपि मुख्यस्यैवोपादानमिति।

इत्येकविंशं प्रधाननिर्वाहकत्वे अङ्गनिर्वाहापर्याप्तस्यापि मुख्यस्योपादानाधिकरणम्

(सूत्रे ४०-४१)

इति श्रीभाट्टसंग्रहे सर्वतन्त्रस्वतन्त्रश्रीसुधीन्द्रतीर्थगुरुपादशिष्य श्रीराघवेन्द्रतीर्थयतिसार्वभौमकृते षष्ठाध्यायस्य तृतीयः पादः

अस्मिन् पादे	अधिकरणानि	२१	सूत्राणि	४१
आदितः	अधिकरणानि	४०७	सूत्राणि	१०६८

अथ षष्ठाध्यायस्य चतुर्थः पादः

अथ प्रथममवत्तनाशे पुनरवदानार्थं प्रतिनिध्युपादानाधिकरणम् (सूत्रे १-२)

पूर्वपादे मुख्यस्यापचारादौ सति गौणस्योपादानेनाधिकारश्चिन्तितः। अत्र पादे अग्रेतनपादे च मुख्यापचारादौ सति प्रायश्चित्ताधिकारश्चिन्त्यत इति पूर्वपादादुत्तरपादयोर्भेदः, पूर्वकृतचिन्ताप्रसङ्गादेवोत्तरचिन्तोत्थानात्तदानन्तर्यञ्च ध्येयम्। पञ्चमस्य त्वेतस्माद्भेदे आनन्तर्ये च हेतुं तत्रैव वक्ष्यामः।

शेषादवदाननाशे स्यात्तदर्थत्वात् ॥ १ ॥

(निर्देशाद्वाऽन्यादागमयेत् ॥ २ ॥)

दर्शपूर्णमासयोः पुरोडाशावदाने श्रूयते ''मध्यादवद्यति। पूर्वार्धादवद्यति'' इति। यदा तस्यावत्तस्य नाशदोषापहारादिर्भवति, तदा किं ''यस्य सर्वाणि हवींषि नश्येयुर्दुष्येयुरपहरेयुर्वा आज्येनैता देवता विपरिसंख्याय यजेत'' इति हविर्नाशादिनिमित्तयोदिताऽज्यभागेनाधिक्रियते, किं वा अवशिष्टात्पुरोडाशात्पुनरवदाय तेनाधिक्रियत इति सन्देहे,

विनष्टेऽपि द्व्यवदाने अवशिष्टपुरोडाशेपि मध्यपूर्वार्धयोः सम्भवात् ''मध्यादवद्यति'' इति सामान्यतः श्रुतशास्त्रस्य तावन्मात्रेणार्थवत्त्वात्तत एव पुनरवदायाधिक्रियते। आज्यरूपहविरन्तरविधानवचनं तु सर्वहविर्नाशविषयम्। अत एव तत्र ''सर्वाणि'' इत्युक्तिरिति प्राप्तम्। तदाह सूत्रे, अवदाननाशे शेषादवदेयम्। शेषस्यापि तदर्थत्वादग्न्यर्थत्वादिति।

सिद्धान्तस्तु, मध्यशब्दो हि सम्बन्धिशब्दत्वात्प्रकृतापेक्षः। प्रकृतश्च कृत्स्नपुरोडाश इति तस्यैव मध्यादिः शास्त्रार्थः। तदपादानको यस्तस्योपरितनोऽङ्गुष्ठपर्वमात्रोऽवयवः सोऽवदातव्यः। न तु तस्याधस्तनोऽवयवः। स त्ववदेयस्यापादानभूत एव। युत्त द्व्यवत्तं हविस्तत्तु विनष्टमेव। तद्विनाश एवाऽज्यरूपं हविरन्तरं ''सर्वाणि'' इति वचनेन विधीयत इति द्व्यवत्तनाशे वाचनिकाज्येनैवाधिक्रियेतेति। न च ''सर्वाणि'' इत्युक्तिविरोधः। तृतीयस्य चतुर्थपादे सर्वप्रदानं

हविषस्तदर्थत्वादित्यत्रोक्तदिशा **भाष्यकृन्मते** द्व्यवत्तस्यैव हविष्ट्वेन तस्य सर्वस्य नाशात् **वार्तिकमते** सर्वस्य हविष्ट्वेन सर्वानाशेऽपि वचने सर्वपदस्य निमित्तविशेषणत्वेन हविर्विशेषणत्वाभावात्सर्वत्वस्याविवक्षितत्वाद्वेत्याहुः ।

फलन्तु आज्येन समापनम् ।

इति प्रथममवत्तनाशे पुनरवदानार्थं प्रतिनिध्युपादानाधिकरणम् (सूत्रे १-२)

अथ द्वितीयं स्विष्टकृदर्थस्यावत्तवस्य नाशे अपुनरवदानाधिकरणम्

अपि वा शेषभाजां स्याद्विशिष्टकारणत्वात् ॥ ३ ॥

पूर्ववैषम्येणात्र शङ्कनात्सङ्गतिः । स्विष्टकृदिडाभक्षणाद्यर्थमवत्तस्य नाशे पुनस्तदर्थमवशिष्टादवदेयमुत नेति **सन्देहे,**

युक्तं पूर्वत्र शिष्टद्रव्यस्य प्रधानयागानर्हत्वान्न ततः पुनरवदेयमिति । स्विष्टकृदादेस्तु द्रव्यसंस्कारार्थत्वात्, संस्कार्यस्य च द्रव्यस्य कस्मिंश्चिदंशे नष्टेपि शिष्टस्य संस्कार्यशेषस्य द्रव्यस्य सत्त्वात्ततः पुनरवदाय स्विष्टकृदादिसंस्कारः कार्य इति **प्राप्ते,**

सिद्धान्तः, स्विष्टकृदादिना हि न शिष्टोऽवयवी संस्कार्यः । किन्तु द्व्यवदानविशिष्टकृत्स्न-पुरोडाशोत्तरार्धापादानकोऽवयविशेष एव । ''उत्तरार्धात्स्विष्टकृते समवद्यति'' इति श्रवणात् । शिष्टस्य चेडाभक्षणादिप्रतिपत्त्यन्तरगृहीतत्वात् उत्तरार्धाद्यंशे नष्टे कः स्विष्टकृदादिप्रतिपत्तिं प्रयुञ्जीत । तस्मान्न शेषादवदेयमिति, संस्कार्याभावात्तेषां लोप एव ।

न च प्रतिपत्तिमात्रार्थेडाभक्षणादेः प्रतिपाद्याभावेन लोपेपि चतुर्थाद्यपादे **अश्रयिष्व-विशेषेण भावार्थः प्रतीयेत** इत्यत्रोक्तदिशा स्विष्टकृद्दृष्टार्थमपि भवतीति तत्सिद्ध्यर्थं द्रव्यान्तरं प्रयुञ्जीतेति, तेन कर्तव्यो न लोप्तव्य इति वाच्यम् । हविर्नाशनिमित्तचोदिताऽज्यन्यद्रव्येण तदनुष्ठानसम्भवादिति ।

तदाह **सूत्रे, शेषभाजां** स्विष्टकृदादीनां **लोपः स्यादिति** शेषः। कुतः? **विशिष्टकारणत्वात्**। यज्ञदेशविविक्तताहतुत्वात्तेषाम्। तस्याश्चान्यतः सिद्धत्वादिति भावः। **फलन्तु**, शेषकार्यार्थवित्तनाशे शेषकार्याननुष्ठानम्।

इति द्वितीयं स्विष्टकृदर्थस्यावत्तस्य नाशे अपुनरवदानाधिकरणम्

अथ तृतीयं ऋत्विजामेव शेषभक्षणाधिकरणम् (सूत्राणि ४-९)

निर्देशाच्छेषभक्षोऽन्यैः प्रधानवत्॥ ४॥

(सर्वं वा समवायात्स्यात्॥ ५॥ निर्देशास्य गुणार्थत्वम्॥ ६॥ प्रधानेश्रुतिलक्षणम्॥ ७॥ अर्थवदिति चेत्॥ ८॥ न चोदनाविरोधात्॥ ९॥)

प्रासङ्गिकी **सङ्गतिः**। दर्शपूणहमासयोश्चत्वार ऋत्विजः। तत्र श्रुता भक्षाः किं ऋत्विग्भ्योऽन्यैः कार्याः, उत ऋत्विग्भिरेवेति **संशये,**

ऋत्विजां कर्मकरत्वेन द्रव्यसंस्कारार्थभक्षणकर्मण्यपि तेषामेव कर्तृत्वेन प्राप्तानां ''यजमानपञ्चमा इडां भक्षयन्ति'' इति पुनर्वचनं ''यजमानसहिताश्चत्वारो ऋत्विज इडामेव भक्षयेयुर्नान्यम्' इति परिसङ्ख्यार्थं सदन्यत्र भक्षणं ऋत्विजां निषेधतीति ऋत्विग्भ्योन्यैः प्रकरणस्थैर्भक्षणं कार्यमिति **प्राप्तम्**।

तदाह, प्रधानवत् यथा ''आग्नेयोऽष्टाकपालः'' इति सर्वस्याग्नेयत्वे प्राप्ते ''द्विर्हविषोऽवद्यति'' इति द्व्यवदानश्रवणं परिसंख्यारूपं तथा ''यजमानपञ्चमाः'' इति वचने परिसंख्यात्मक**निर्देशात् शेषभक्षोऽन्यैः** कार्य इति। सिद्धान्तस्तु, अप्राप्तविधिसम्भवे त्रिदोषदुष्टपरिसंख्यार्थत्वस्यायोगात् ऋत्विजां चतुर्णां भक्षणप्राप्तावपि यजमानस्य कर्मकरत्वाभावेन भक्षाप्राप्तेः ''चत्वारो ऋत्विज इडां भक्षयन्तीति यत् तत् यजमानपञ्चमाः सन्तः'' इत्यप्राप्तयजमानभक्षप्रापकमिदं वचनं, न परिसङ्ख्यार्थमित्यत्र ऋत्विजामेव भक्षणकर्तृत्वम्। नान्येषामिति।

तथा च सूत्रम्, सर्वं वा समवायात्स्यादिति । सर्वं सर्वैरेव ऋत्विग्भि र्भक्षणीयम् । तेषामेव तत्र समवायादिति । फलन्तु, ऋत्विजामेव भक्षणम् ।

इति तृतीयं ऋत्विजामेव शेषभक्षणाधिकरणम् (सूत्राणि ४-९)

अत चतुर्थं कृत्स्नैकदेशभेदे प्रायश्चित्तानुष्ठानाधिकरणम् (सूत्राणि १०-१६)

अर्थसमवायात्प्रायश्चित्तमेकदेशेऽपि ॥ १० ॥

(न त्वशेषे वैगुण्यात्तदर्थं हि ॥ ११ ॥ स्याद्वा प्राप्तिनिमित्तत्वादतद्धर्मो नित्यसंयोगान्न हि तस्य गुणार्थेनानित्यत्वात् ॥ १२ ॥ गुणानाञ्च तदर्थत्वाद्वचनाद्व्यपाश्रयः स्यात् ॥ १३ ॥ भेदार्थमिति चेत् ॥ १४ ॥ शेषभूतत्वात् ॥ १५ ॥ अनर्थकश्च सर्वनाशे स्यात् ॥ १६ ॥)

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः । दर्शपूर्णमासयोः कपालं प्रकृत्य श्रूयते, ''भिन्ने जुहोति'' इति । तत्र किं कृत्स्नभेदो निमित्तमुतैकदेशभेदोऽथोभयमिति सन्देहे,

अल्पावयवापगमरूपभेदस्य सङ्घर्षणादिना नित्यसिद्धत्वेनानिमित्ततया पूर्वत्रार्थादृत्विजामेव भक्षान्तरेषु कर्तृत्वमिवार्थाद्भेदशब्दस्य भङ्गवाचित्वात्कृत्स्नकपालभङ्गे निमित्ते होमविधिरयमित्येकः पूर्वपक्षः ।

होमोऽयं कपालभेदजातदोषनिर्हरणार्थः सन् भिन्नकपालसंस्कारार्थः । सप्तम्याः कर्मत्वलक्षणया ''भिन्नं होमेन संस्कुर्यात्'' इत्यर्थाश्रयणात् । अधिश्रयणयोग्यश्च कपालः संस्कार्यः । नान्यः । व्यर्थत्वात् । अत्यन्तभिन्नश्च न कार्यक्षम इति कार्याविरोधेनैकदेशभेद एवायं संस्काररूपो होमः । एवं हि सति होमस्य वाक्यविनियोज्यसन्निपात्यङ्गत्वमपि लभ्यते । अन्यथा प्रकरणविनियोज्याऽरादुपकारकाङ्गत्वं स्यादिति द्वितीयः । तदाह,एकदेशे भिन्नेऽपि भिन्नशब्दार्थस्य समवायात्प्रायश्चित्तमिति ।

सिद्धान्तस्तु, होमस्य संस्काररूपत्वे भिन्नशब्दस्य संस्कार्यप्रतिपादनोपक्षयान्निमित्तप्रतिपादकत्वं न स्यात् । तथा सति होमस्य नैमित्तिकत्वाभावेन नित्यत्वं स्यात् । कपालभेदस्य

च कादाचित्कत्वादनित्यत्वं भवेत्। तदा त्वयमर्थः ''दर्शपूर्णमासयोर्नित्यवद्धोमेनोपकुर्याद्भिन्नकपालद्वारा'' इति। न चैतद्युज्यते। भिन्नकपालस्य कादाचित्कत्वेन नित्यानित्ययोः संयोगस्य विरोधात्। तस्माद्भेदे निमित्ते होमो विधीयते। स चाविशेषादेकदेशभेदे कृत्स्नभेदे च स्यादित्युभयं निमित्तमिति।

फलन्तु व्यक्तम्।

इति चतुर्थं कृत्स्नैकदेशभेदे प्रायश्चित्तानुष्ठानाधिकरणम् (सूत्राणि १०-१६)

अथ पञ्चमं क्षामे सर्वदाहे प्रायश्चित्तानुष्ठानाधिकरणम् (सूत्राणि १७-२१)क्षामेष्टिन्यायः

क्षामे तु सर्वदाहे स्यादेकदेशस्यावर्जनीयत्वात्॥ १७॥

(वचनादेकदेशे स्यात्॥ १८॥ अन्येन वैतच्छास्त्राद्धि कारणप्राप्तिः॥ १९॥ तद्धविःशब्दान्नेति चेत्॥ २०॥ स्यादन्यायत्वादिज्यागामी हविःशब्दस्तल्लिङ्गसंयोगात्॥ २१॥)

अत्रापि पूर्वन्यायेन शङ्कनात्सङ्गतिः। दर्शपूर्णमासयोः श्रूयते ''अथ यस्य पुरोडाशौ क्षीयतस्तं यज्ञं वरुणो गृह्णाति। यदा तद्धविः सन्तिष्ठते अथ तदेव हविर्निर्वपेत्। यज्ञो हि यज्ञस्य प्रायश्चित्तिः'' इति। अस्यार्थः, यस्य यज्ञस्य आग्नेयाग्नीषोमीयपुरोडाशावतिपाकेन श्यामीभवतस्तं यज्ञं वरुणो गृह्णाति। यजमानस्य फलमयं यज्ञो न सम्पादयति। तादृशहविष्को यज्ञ आसमाप्तेरनुष्ठीयते तदा तद्दोषपरिहाराय पुनस्तदेव हविर्निरूप्य यजमानो यज्ञमनुतिष्ठेदिति। भाष्ये वरुणो गृह्णातीति पाठेपि **शास्त्रदीपिकायां** निऋतिर्गृह्णातीति पठितम्। तत्र पुरोडाशक्षामनिमित्तः पुनःप्रयोगः किं कृत्स्नैकदेशरूपोभयदाहे, किं वा सर्वदाह इति **सन्देहे**, पूर्वोक्तभेदनन्यायेनाल्पदाहकृत्स्नदाहयोर्द्वयोरपि कर्तव्य इति **प्राप्ते**,

सिद्धान्तः, तप्तेषु कपालेषु पुरोडाशमवस्थाप्य अङ्गारैरधिवासने कृते सति सूक्ष्मांशदाहस्यावर्जनीयत्वेन नित्यत्वात्पुनर्यागस्यांशदाहो न निमित्तम्। सर्वदाहस्तु कादाचित्कत्वाद्भवति निमित्तमिति सर्वदाह एवेयं पुनःप्रयोगरूपप्रायश्चित्तिरिति।

तदाह, क्षामे तु विहितं प्रायश्चित्तं **सर्वदाह एव स्यात्** । **एकदेशस्यावर्जनीयत्वादिति** । **फलन्तु** व्यक्तम् ।

इति पञ्चमं क्षामे सर्वदाहे प्रायश्चित्तानुष्ठानाधिकरणम् (सूत्राणि १७-२१)क्षामेष्टिन्यायः

अथ षष्ठमेकहविरार्तावपि पञ्चशरावनिर्वापाधिकरणम् (सूत्रे २२-२३)

यथाश्रुतीति चेत् ॥ २२ ॥

(न तल्लक्षणत्वादुपपातो हि कारणम् ॥ २३ ॥)

अत्रापि पूर्वन्यायेन शङ्कनात्सङ्गतिः । दर्शपूर्णमासयोः ''यस्य सायं दुग्धं हविरार्तिमार्च्छेत'' इत्यादिना दोहार्तिं प्रकृत्य श्रूयते ''यस्योभयं हविरार्तिमार्च्छेदैन्द्रं पञ्चशरावमोदनं निर्वपेत्'' इति । तत्र किमुभयहविरार्ताविययमिष्टिरुत अन्यतरहविरार्तावपीति **सन्देहः** ।

पूर्वपक्षस्तु, पूर्वत्र यथा कृत्स्नपुरोडाशक्षाम एव निमित्तं तथात्राप्युभयहविर्नाश एव निमित्तम् । नान्यतरार्तिमात्रम् । तथा हि, आर्तिमात्रं वा हविर्मात्रं वा न निमित्तम् । अतिप्रसङ्गात् । निमेषाद्यार्तेर्नित्यत्वाद्धविषोऽपि तथात्वात् । किन्तु हविरार्तिः । द्वयोरपि श्रुतत्वात् । तथोभयत्वस्यापि श्रुतत्वादुभयहविरार्तिरेव निमित्तम् । तृतीये ग्रहैकत्वनये उद्देश्यविशेषणस्याविवक्षोक्तावप्युद्देश्यस्वरूपसम्पादकं तु विवक्षितमेवेति चमसाधिकरणेऽभिधानादिह श्रुतोभयत्वस्योद्देश्यस्वरूपसम्पादकत्वेन विवक्षितत्वादिति । **तदाह, यथाश्रुति** श्रवणमनतिक्रम्योभयार्तिरेव **निमित्तमिति चेत्** इति ।

सिद्धान्तस्तु, सत्यमुद्देश्यस्वरूपान्तर्गतं विवक्षितमिति । अत्र तु प्रत्येकं हविरार्त्योरुक्तदिशा निमित्तत्वायोगेपि हविरार्तिमात्रेप्युभयत्वेन विना निमित्तत्वपर्यवसानासम्भवात् ''अन्यतरहविरार्तौ वा पञ्चशरावौदनयागः कार्यः'' इति । हविरार्तिमात्रस्य निमित्तत्वे चोभयहविरार्तेरपि निमित्तत्वप्राप्तेरुभयशब्दोऽनुवाद इति । **फलन्तु** व्यक्तम् ।

इति षष्ठमेकहविरार्तावपि पञ्चशरावनिर्वापाधिकरणम् (सूत्रे २२-२३)

अथ सप्तमं होमाभिषवोभयकर्तुरेव भक्षणाधिकरणम् (सूत्रे २४-२५)

होमाभिषवभक्षणञ्च तद्वत् ॥ २४ ॥

(उभाभ्यां वा न हि तयोर्धर्मशास्त्रम् ॥ २५ ॥)

पूर्वन्यायेन शङ्कनात्**सङ्गतिः**। ज्योतिष्टोमे श्रूयते, "हविर्धाने ग्रावभिरभिषुत्याऽहवनीये हुत्वा प्रत्यञ्चः संहताः परेत्य सदसि भक्षान् भक्षयन्ति" इति। तत्र किं होमोऽभिषवश्च प्रत्येकं भक्षनिमित्तमुत संहत्येति **सन्देहे,**

पूर्वत्र यथा हि हविष उभयत्वसाहित्यमविवक्षितमेवं होमाभिषवयोरपि न विवक्षितं साहित्यम्। होमाभिषवोद्देशेन भक्षणनिमित्तताविधिपरे वाक्ये साहित्यस्यापि विधौ "अभिषवहोमौ भक्षणहेतू। तौ च सहितौ" इति वाक्यभेदप्रसङ्गेन साहित्यस्योद्देश्यविशेषणत्वेन अविवक्षौचित्यात्। तस्मादभिषवहोमयोः प्रत्येकमेव निमित्तत्वमिति **प्राप्तम्।**

तदुक्तम्, होमाभिषवसमानकर्तृकं भक्षणमपि तद्वत् पञ्चशराववत् प्रत्येकनिमित्तम्। न मिलितनिमित्तमिति।

सिद्धान्तस्तु, स्यादेवं यदीदं वाक्यं निमित्तताविधायकं तदा साहित्यस्यापि विधौ वाक्यभेदः। न चैवम्। निमित्तत्वज्ञापकयच्छब्दयोगाद्यभावात्। किन्तु होमाभिषवकर्तुर्भक्षणं प्रत्यप्राप्ताङ्गत्वविधायकम्। एवञ्च द्वितीयानिर्दिष्टसोमसंस्कारार्थभक्षं प्रत्यभिषवहोमकर्ता गुणत्वेनोपादीयमानो विवक्षितविशेषगुणो भवति। तत्र होमाभिषवयोर्यन्निमित्तत्वं प्रतीयते तदार्थिकमेव। न शास्त्रीयमिति न वाक्यभेददोषः। अभिषवहोमसमानकर्तृकत्वं तु शाब्दमित्यभिषवसमानकर्तृकत्वं होमसमानकर्तृकत्वं द्वयमपि विवक्षितसाहित्यं भक्षणाङ्गं सत् अर्थाद्भक्षणनिमित्तमिति।

फलन्तु, होमाभिषवोभयकर्तुरेव भक्षणम्। न त्वभिषवमात्रकर्तुरुन्नेत्रादेर्होममात्रकर्तुचमसाध्वर्यूणां भक्षणमिति।

इति सप्तमं होमाभिषवोभयकर्तुरेव भक्षणाधिकरणम् (सूत्रे २४-२५)

अथाष्टमं पुनराधानं प्रति वह्न्यनुगमनद्वयस्य निमित्तताधिकरणम् (सूत्रे २६-२७)

पुनराधेयमोदनवत् ॥ २६ ॥

(द्रव्योत्पत्तेर्वोऽभयोः स्यात् ॥ २७ ॥)

पूर्ववैषम्येणात्र शङ्कनात्सङ्गतिः । अग्निहोत्रे श्रूयते ''यस्योभावग्नी अनुगतावभिनिम्लोचेदभ्युदियाद्वा पुनराधेयं तस्य प्रायश्चित्तिः'' इति । आहवनीयगार्हपत्यावनुगतौ नष्टौ यदा तदा यदि सूर्यस्यास्तमय उदयो वा भवेत् , तदा पुनराधेयं आधानं कर्तव्यमित्यर्थः । तत्र किमुभयानुगतिः पुनराधाने निमित्तमुतान्यतरानुगम इति **सन्देहे,**

भक्षणगतनैमित्तिकत्वस्याशाब्दत्वेपीह यस्येति यद्वृत्तयोगेन पुनराधानस्य नैमित्तिकत्वं शाब्दमेवेति पञ्चशरावावाक्ये निमित्तविशेषणभूतोभयत्वमिवाग्न्यनुगतद्वित्वमप्यविवक्षितम् । अन्यथा द्वित्वस्यापि विधौ वाक्यभेदापत्तेरित्येकस्याप्यनुगमे पुनराधेयमिति **प्राप्तम् ।**

तदाह, पुनराधेयमन्यतरानुगमेपि स्यात् । **ओदनवद्यथा** पञ्चशरावौदनमन्यतर-हविरार्तिमात्रे तद्वदिति ।

सिद्धान्तस्तु, ''अग्नी आदधीत'' इति द्वित्वविशिष्टयोरग्न्योरुत्पादनाय पुनराधेयं हि चोद्यते शतपथब्राह्मणे । न त्वेकस्योत्पादनाय । न ह्येकस्मिन्ननुगते द्वयोरुत्पादनं सम्भवति । न च वाक्यान्तरमग्निद्वयनाशनिमित्ताग्न्युत्पादनपरम् । इदन्त्वेकनाशनिमित्तैकाग्न्युत्पादनक्षमम् । अन्यदेवाधानांतरविधिपरमिति वाच्यम् । पुनःशब्दवाशब्दाभ्यामन्यशब्देन च तस्यैव प्रत्यभिज्ञानात् । तस्यैव पुनरभ्यासे लाघवाच्च । तस्मान्नैमित्तिकद्वित्वोपपत्तये निमित्तयोरप्यग्न्यनुगमयोर्द्वित्वं विवक्षितमित्यस्तमयकाले उदयकाले वा वह्निद्वयनाशः पुनराधेयहेतुः ।

फलन्तु, वह्निद्वयनाशे पुनराधानम् ।

इत्यष्टमं पुनराधानं प्रत्यग्न्यनुगमनद्वयस्य निमित्तताधिकरणम् (सूत्रे २६-२७)

अथ नवमं पञ्चशरावनिर्वापस्य कर्मान्तरताधिकरणम् (सूत्रे २८-२९)

पञ्चशरावस्तु द्रव्यश्रुतेः प्रतिनिधिः स्यात् ॥ २८ ॥

(चोदना वा द्रव्यदेवताविधिरवाच्ये हि ॥ २९ ॥)

पूर्वन्यायेन शङ्कनात्सङ्गतिः । योऽयं पञ्चशराव ओदनः पूर्वमुदाहृतः स किमार्तदोहप्रतिनिधित्वेन दर्शकर्मण्येव साधनं विधीयते, अथ कर्मान्तरं हविरार्तौ निमित्ते चोद्यत इति **सन्देहे,**

दर्शयागे दोहद्वयरूपद्रव्यस्य नष्टत्वेन द्रव्यान्तरस्यापेक्षितत्वाद्विशिष्टकर्मान्तरविधितो द्रव्यमात्रविधौ लाघवाच्च दर्श एव प्रतिनिधिरूपसाधनद्रव्यविधिरिति, यथा "पुनराधेयमेव" इति वाक्यं नाधानान्तरपरमेवमिदमपि न कर्मान्तरपरमिति **प्राप्तम्** ।

तदाह, **पञ्चशरावस्तु** सान्नाय्यस्य **प्रतिनिधिः स्यात्** । कुतः ? **द्रव्यश्रुतेः** द्रव्यमात्रश्रवणात् । ऐन्द्रमित्यस्य विशिष्टविधिगौरवभीत्या सान्नाय्यस्थानापत्त्या तद्देवतेन्द्रस्य प्राप्तेश्चानुवादत्वेन द्रव्यदेवतासम्बन्धाश्रवणेनापूर्वकर्मविध्यभावादिति ।

सिद्धान्तस्तु, सान्नाय्ये महेन्द्रस्यापि देवतात्वेन नियमेनेन्द्रस्य तत्स्थानापत्त्यापि पञ्चशरावौदने प्राप्तेरभावेन, प्राप्तदर्शानुवादेन द्रव्यदेवतयोर्द्वयोर्विधौ वाक्यभेदापत्त्या द्रव्यदेवताविशिष्टं कर्मान्तरमेव पञ्चशराववाक्ये विधीयते इति ।

फलन्तु, पूर्वपक्षे प्रक्रान्तस्य कर्मणो नैमित्तिकेनौदनरूपद्रव्यान्तरेण समापनम् । **सिद्धान्ते तु,** हविरार्तौ प्रायश्चितरूपमिदं कर्म कृत्वा हविरन्तरोत्पादनेन प्रक्रान्तं कर्म समापनीयमिति ।

इति नवमं पञ्चशरावनिर्वापस्य कर्मान्तरताधिकरणम् (सूत्रे २८-२९)

अथ दशमं पञ्चशरावयागस्य नैमित्तिकदर्शयागाङ्गताधिकरणम् (सूत्रे ३०-३१)

स प्रत्यामेनतस्थानात् ॥ ३० ॥

(अङ्गविधिर्वा निमित्तसंयोगात् ॥ ३१ ॥)

पूर्वनयफलाक्षेपेण शङ्कनात्सङ्गतिः । पञ्चशरावद्रव्यकमिन्द्रदेवताकं यत्कर्मान्तरं कथितं तदेतद्दर्शयागस्य प्रतिनिधित्वेन विधीयते, अथ तस्येदमङ्गमिति **सन्देहे**, पञ्चशरावद्रव्यकं कर्मानतरं हि स्वसाध्यं कार्यमपेक्षते । दोहयोर्दधिपयसोरार्तत्वेन दर्शयागे निवृत्ते सति तज्जन्यं यदपूर्वरूपं कार्यं तत्साधनमपेक्षत इत्यन्योन्याकाङ्क्षावशाद्दर्शकार्यकारितया तत्प्रतिनिधिरिदं कर्मेति ''द्रव्यान्तरोत्पादनेन प्रक्रान्तं कर्म समापनीयम्'' इति प्रागुक्तमयुक्तमिति **प्राप्तम्** । तदाह, स पञ्चशरावः दर्शे प्रत्यामनेत् प्रतिनिधिर्भवेत् । कुतः ? तत्स्थाने विधानादिति ।

सिद्धान्तस्तु, दर्शयागनिवृत्तौ स्यादेवमन्योन्याकाङ्क्षयोक्तः प्रतिनिधिरूपः सम्बन्धः । न चैवम् । पूर्वद्रव्यनाशेपि पयोन्तरस्य दध्यन्तरस्य च सम्भवात् । दध्नो द्व्यहसाध्यत्वात्कथं दध्यन्तरसम्भव इति वाच्यम् । प्रक्रान्तकर्मणोऽवश्यसमाप्यत्वेन लौकिकस्याप्युपादानात् । अतो द्रव्यान्तरेणानुष्ठीयमानदर्शस्य हविरार्तिकृतवैगुण्यसमाधानरूपमपेक्षितमुपकारं कुर्वन्नयं पञ्चशरावो दर्शाङ्गमित्येव युक्तमिति ।

तदाह **सूत्रकारः**, **अङ्गविधिर्वा निमित्तसंयोगादिति** । **फलन्तु**, दर्शाङ्गतयाऽनुष्ठानं नैमित्तिकपञ्चशरावस्येति ।

इति दशमं पञ्चशरावयागस्य नैमित्तिकदर्शयागाङ्गताधिकरणम् (सूत्रे ३०-३१)

अथैकादशं सत्रायाऽऽगूर्याप्रवृत्तस्य विश्वजिदावश्यकताधिकरणम् (सूत्रे ३२-३३)

विश्वजित्त्वप्रवृत्ते भावः कर्मणि स्यात् ॥ ३२ ॥

(**निष्क्रयवादाच्च** ॥ ३३ ॥)

पूर्वन्यायेन शंङ्कनात्सङ्गतिः । ''यस्सत्रायाऽगुरते स विश्वजिता यजेत'' इति श्रूयते । आगुरते सङ्कल्पयतीत्यर्थः । तत्र किमागुर्यप्रवृत्तस्य विश्वविजिदनुष्ठानमुताप्रवृत्तस्य, किं वोऽभयोरपीति **सन्देहः** ।

पूर्वपक्षस्तु ''सत्रायाऽगुरते'' इति वाक्ये प्रवृत्तस्येत्यप्रवृत्तस्येति वा विशेषाश्रवणादुद्वयोरप्ययं विश्वजिदित्येकः। सत्रे प्रवृत्तस्य विश्वजिदनुष्ठाने सत्राङ्गत्वं विश्वजितो लभ्यत इति तत्फलेनैव फलवत्त्वेनाप्रवृत्तस्येव न फलान्तरकल्पनेति लाघवात्प्रवृत्तस्यैवेति **द्वितीयः** पक्षः।

सिद्धान्तस्तु, ''आगुरते'' इत्यागुरणस्य य इति यच्छब्दयोगेन निमित्तत्वमवगम्यमानमाद्यपक्षे व्यर्थमापद्यते। क्रत्वर्थत्वपुरुषार्थत्वरूपवैरूप्यञ्चापद्यते। **द्वितीयेऽपि** निमित्तत्वश्रवणवैयर्थ्यमेवेति ''यः सत्रायाऽगुर्यं नानुतिष्ठेत्तदा प्रायश्चित्तार्थमिमं विश्वजिद्यागं कुर्यात्'' इति नैमित्तिकमिदं कर्मेति।

तदुक्तम्, अप्रवृत्त एव विश्वजित्। अतः सत्रकरणाप्रवृत्तेः तस्य **भावः स्यात्** इति। **फलन्तु,** प्रायश्चित्तत्वेनानुष्ठानम्।

इत्येकादशं सत्रायाऽगूर्याप्रवृत्तस्य विश्वजिदावश्यकताधिकरणम् (सूत्रे ३२-३३)

अथ द्वादशं बर्हिषेत्यादिश्रुतेर्व्रतकालविधानार्थताधिकरणम् (सूत्राणि ३४-४०)

वत्ससंयोगे व्रतचोदना स्यात् ॥ ३४ ॥

(कालो वोत्पन्नसंयोगाद्यथोक्तस्य ॥ ३५ ॥ अर्थापरिमाणाच्च ॥ ३६ ॥ वत्सस्तु श्रुतिसंयोगात्तदंगं स्यत् ॥ ३७ ॥ कालस्तु स्यादचोदना ॥ ३८ ॥ अनर्थकश्च कर्मसंयोगे ॥ ३९ ॥ अवचनाच्च स्वशब्दस्य ॥ ४० ॥)

सत्रे प्रवृत्तस्य वा अप्रवृत्तस्य वा विश्वजिदिति चिन्ताप्रसङ्गाद्वत्सापाकरणलक्षितः कालः किं सान्नाय्ध्ये प्रवृत्तस्याप्रवृत्तस्येति चिन्तोत्तरनये प्रस्तोष्यत इति तदुपोद्घातत्वेनेदमत्रारभ्यत इति **सङ्गतिर्ज्ञेया**। दर्शपूर्णमासयोः श्रूयते ''बर्हिषा पूर्णमासे व्रतमुपैति, वत्सैरमावास्यायां'' इति। व्रतमुपैतीत्यनुषज्यते। व्रतशब्दश्च ''माषममांसं बहुसर्पिष्कं व्रतयति'' इति वचनाद्भोजनपरः। तत्र किं वत्सविशिष्टव्रतविधिः, उत व्रतानुवादेन वत्सविधिः, अथ वत्सापाकरणं व्रतकालोपलक्षणमिति **सन्देहः**।

पूर्वपक्षस्तु, वत्सैरिति तृतीयया प्रतीतेर्वत्सविशिष्टव्रतविधिरित्येकः। भोजनस्य रागप्राप्ततया विधेयत्वायोगाद्व्रतानुवादेन वत्सविधिरिति **द्वितीयः** ।

तदाह **सूत्रे, व्रतस्य** वत्सैरिति वाक्ये **वत्ससंयोगे** श्रुते वत्सविशिष्ट**चोदना** व्रतानुवादेन वत्सचोदना वा **स्यादिति** ।

सिद्धान्तस्तु, व्रतानुवादेन वत्सस्य पाण्यादिवत्करणत्वेन कर्मत्वेन वा न विधिः सम्भवति । अशक्यत्वात्। विशसनेन व्रतकर्मत्वविधौ वत्सताव्याघातः। अमांसमिति प्रागुक्तश्रुतिविरोधश्च । अतो दर्शे वत्सानामपाकरणेन काल उपलक्ष्यते ''तस्मिन् काले व्रतमुपेयात्'' इति । एवं पौर्णमासेऽपि ''बर्हिःसम्पादनकाले व्रतमुपेयात्'' इति **सिद्धान्तः पूर्वपक्षद्वयश्च** ध्येयम् ।

फलन्तु, बर्हिस्सम्पादनकाले वत्सापाकरणकाले भोजनमिति व्यक्तम् ।

इति द्वादशं बर्हिषेत्यादिश्रुतेर्व्रतकालविधानार्थताधिकरणम् (सूत्राणि ३४-४०)

अथ त्रयोदशं बर्हिषेत्याद्युक्तकालस्य सन्नयदसन्नयदुभयसाधारणताधिकरणम् (सूत्रे ४४२)

कालः सन्नयत्पक्षे तल्लिङ्गसंयोगात् ॥ ४१ ॥

(कालार्थत्वाद्वोभयोः प्रतीयेत ॥ ४२ ॥)

एवं कालोपलक्षणे स्तिथे स कालः किं सान्नाय्ययाजिनो व्रतस्याङ्गं, उतासान्नाय्ययाजिनोऽपीति चिन्त्यत इति **सङ्गतिसन्देहौ** ।

पूर्वपक्षस्तु, यस्त्वमावास्यायां सान्नय्यमकुर्वन् ऐन्द्राग्नपुरोडाशं करोति तस्यासान्नाय्ययाजिनो वत्सापाकरणाभावान्न तल्लक्षितः कालस्तद्व्रत्तस्याङ्गं भवतीति सान्नाय्ययाजिन एवेति । तदाह, **सन्नयत्पक्ष** एव **कालो** वत्सापाकरणकालो लक्ष्येत । **तल्लिङ्गसयोगात्** तस्मिन्नेव पक्षे लिङ्गस्य लक्षकस्य वत्सापाकरणस्य सम्बन्धादिति ।

सिद्धान्तस्तु, लोके शंखवेलायामागन्तव्यमित्युक्ते कदाचिच्छङ्खध्वनेरभावेपि तत्कालोपलक्षकत्ववदिहाप्यसतो वत्सापाकरणस्य कदाचित्सत्तामात्रेणोपलक्षकत्वसम्भवाद्यो वत्सापाकरणकालस्ततः पूर्वकाले व्रतमित्यसोमयाजिनोपि स एव व्रतकाल इति।

फलन्तु द्वयोरपि वत्सापाकरणकाल एव व्रताधिकार इति।

इति त्रयोदशं बर्हिषेत्याद्युक्तकालस्य सन्नयदसन्नयदुभयसाधारणताधिकरणम् (सूत्रे ४१-४२)

अत चतुर्दशं सह शाखयेत्यस्य कालविधानार्थताधिकरणम् (सूत्राणि ४३-४७)

प्रस्तरे शाखा श्रयणवत् ॥ ४३ ॥

(कालविधिर्वा स्यादुभयोर्विद्यमानत्वात् ॥ ४४ ॥ अतत्संस्कारार्थत्वाच्च ॥ ४५ ॥ तस्माच्च विप्रयोगे स्यात् ॥ ४६ ॥ उपवेषश्च पक्षे स्यात् ॥ ४७ ॥)

पूर्ववैषम्येणात्र शङ्कनात्सङ्गतिः। दर्शपूर्णमासयोः ''सह शाखया प्रस्तरं प्रहरति'' इति श्रुतम्। तत्र प्रस्तरप्रहरणस्य शाखासहभावोऽङ्गत्वेन विधीयते, किं वा शाखाप्रहरणस्य प्रस्तरप्रहरणकालो विधीयत इति **सन्देहः**।

पूर्वपक्षस्तु, ''यत्प्रस्तरं प्रहरति तच्छारवया सह नान्यथा'' इति वाक्यार्थप्रतीत्या शाखासंसर्गस्य प्रस्तरप्रहरणेऽङ्गत्वमवगम्यत इति मैत्रावरुणग्रहे पयःसंसर्गस्येवाङ्गताविधिरेव। न पूर्वत्रेव कालविधिः। तथात्वे ''प्रस्तरेण सह शाखां प्रहरेत्'' इति वाक्यविन्यासापत्तेरिति। **तदुक्तं, प्रस्तरे** प्रस्तरप्रहरणे **शाखा**साहित्यमङ्गम्। मैत्रावरुणग्रहे पयः**श्रयणवदिति।**

सिद्धान्तस्तु, शाखा हि वत्सापाकरणादौ विनियुक्ता नान्याङ्गत्वेन विधानयोग्या। विनियुक्तविनियोगायोगात्। उपयुक्तत्वादेव च प्रतिपत्तिमेवापेक्षते। नोपयोगान्तरम्। प्रस्तरं प्रहरेदित्यस्य च प्रस्तरं प्रहरणेन प्रतिपादयेत्सह शाखयेत्यर्थः। यदि न शाखापि प्रतिपाद्येत तर्हि शाखया सह प्रस्तरः प्रतिपादितो भवति। नान्यथेति शब्दतः स्वरसत एव शाखायाः प्रहरणरूप-प्रतिपत्तिर्गम्यते। तर्हि शाखां प्रहरेदिति वक्तव्येऽपि प्रस्तरं प्रहरेदित्युक्तिः कालोपलक्षणार्था

''प्रस्तरप्रहरणकाले शाखां प्रहरेत्'' इति । तथा च सूत्रम् ,कालविधिर्वा स्यादुभयोर्विद्यमानत्वात् इति ।

फलन्तु, पूर्वपक्षे सान्नाय्यहीनस्यापि प्रस्तरप्रहरणाङ्गतया शाखाप्रहरणम् । सिद्धान्ते सान्नाय्यवत एवेति । चतुर्थद्धितीयपादे प्रहरणे तु जुहोतिरिति नये शखायाः प्रहरणप्रतिपाद्यत्वोक्तावपीह तदाक्षेपेणाङ्गत्वशङ्कनात्पूर्वपक्षोत्थितिरत्रेत्याहुः ।

इति चतुर्दशं सह शाखयेत्यस्य कालविधानार्थताधिकरणम् (सूत्राणि ४२-४७)

इति श्रीभाट्टसंग्रहे सर्वतन्त्रस्वतन्त्रश्रीसुधीन्द्रतीर्थगुरुपादशिष्य
श्रीराघवेन्द्रतीर्थयतिसार्वभौमकृते षष्ठाध्यायस्य चतुर्थः पादः

अस्मिन् पादे	अधिकरणानि	१४	सूत्राणि	४७
आदितः	अधिकरणानि	४२१	सूत्राणि	१११५

अथ षष्ठाध्यायस्य पञ्चमः पादः

अथ प्रथमं दर्शेऽभ्युदयेष्टौ नैमित्तिकदेवतापनयाधिकरणम् (सूत्राणि १-९)

पूर्वपादे द्रव्यदेवताख्यरूपवतो यागस्यान्तरङ्गभूतद्रव्यापचारनिमित्तकः प्रायश्चित्ताधिकारश्चिन्तितः। अत्र तु पादे बहिरङ्गकालाद्यपराधहेतुकः सञ्चिन्त्यत इति **पादभेदः पूर्वानन्तर्यश्चास्य** ध्येयम्।

अभ्युदये कालापराधादिज्याचोदना स्याद्यथा पञ्चशरावे ॥ १ ॥

(अपनयो वा विद्यमानत्वात् ॥ २ ॥ तद्रूपत्वाच्च शब्दानाम ॥ ३ ॥ आतश्चानभ्यासस्य दर्शनात् ॥ ४ ॥ अपूर्वत्वाद्विधानं स्यात् ॥ ५ ॥ पयोदोषात्पञ्चशरावेऽदुष्टं हीतरत् ॥ ६ ॥ सान्नाय्येऽपि तथेति चेत् ॥७ ॥ न तस्यादुष्टत्वादविशिष्टं हि कारणम् ॥ ८ ॥ लक्षणार्था शृतश्रतिः ॥ ९ ॥)

दर्शपूर्णमासयोः श्रूयते "यस्य हविर्निरूप्तं पुरस्ताच्चन्द्रमा अभ्युदेति। त्रेधा तण्डुलान्विभजेत्। ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्यात्। ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुम्। येऽणिष्ठास्तान्विष्णवे शिपिविष्टाय शृते चरुम्" इति।

अस्यार्थः, अमावास्याभ्रान्त्या चतुर्दश्यां हविर्निरुप्य स्थितः पुमान् प्रत्यूषे पूर्वस्यां दिश्यभ्युदितचन्द्रं पश्यति चेत्तदा निरुप्तांस्तण्डुलांस्त्रेधा विभज्याखण्डितेऽषत्खण्डिता-तिसूक्ष्मरूपांस्त्रिविधान् क्रमाद्दात्रादिगुणविशिष्टेभ्योऽग्न्यादिदेवेभ्योऽष्टाकपालपुरोडाशं, दधनि चरुं, पयसि चरुं कृत्वा दद्यादिति। तदियमकाले प्रकान्तदर्शप्रायश्चित्तिरूपाभ्युदयेष्टिः किं कर्मान्तरमुतोपक्रान्तस्यैव दर्शप्रयोगस्य पूर्वदेवताभ्योऽपनयनेन देवतान्तरसंयुक्ततया चोद्यत इति **सन्देहे**,

कर्मान्तरमिति **प्राप्तम्**। कुतः ? अग्न्यादयो देवतास्तद्गुणाश्च दातृत्वादयः दधिशृतयोश्चाधिकरणत्वं स्थविष्ठाणिष्ठानां चरुत्वमित्यनेकगुणविधानात्प्राप्तकर्मा-

नुवादेनानेकगुणविधाने वाक्यभेदापातेन अनेकगुणविशिष्टैककर्मविधौवाक्यभेदात्। "प्राप्ते कर्मणि नानेको गुणः" इत्याद्युक्तेः।

तदाह सूत्रे, अभ्युदये सति कालापराधात् इज्याचोदना कर्मान्तरविधिरेव मध्यमादिवाक्येषु। यथा पूर्वपादोक्तदिशा "यस्योभयं" इत्यादिपञ्चशरावावाक्ये कर्मान्तरविधिस्तद्वदिति।

सिद्धान्तस्तु, कर्मान्तरपक्षे प्रक्रान्तप्रकृतकर्मत्यागाप्रकृतकर्मकल्पनाविशिष्टविधाना-पूर्वान्तरकल्पनाप्रसङ्गात्तस्मिन्नेव प्रकृते कर्मणि निरुप्तस्य हविषः पूर्वदेवताभ्यो दर्शसंबन्धिनीभ्योऽग्न्यादिभ्योऽपनयेन देवतान्तरसंयोगोऽपेक्षितो मध्यमादिश्रवणैर्विधीयते। तत्र विभजेदित्यस्य विभक्तान् कुर्यादिति नार्थः। ये मध्यमा इति मध्यामादिविनियोगवशेन तण्डुलविभागस्यार्थसिद्धत्वात्। किन्तु त्रेधा स्थितांस्तदुपलक्षितदधिपयोरूपञ्च हविः विभजेत् पूर्वदर्शदेवतातोऽग्नेरिन्द्राच्च विभजेत् अपनयेदित्यर्थः। अपनीतस्य देवतान्तरसम्बन्धोऽपेक्षित इति मध्यमादिवाक्येन तद्विधानमुपपद्यते "मध्यमानां तण्डुलानामग्निर्दाता देवता। स्थविष्ठानां दध्नश्चेन्द्रः प्रदाता, अणिष्ठानां शृतस्य च विष्णुः शिपिविष्टः" इति। अतो दर्शस्यैवायं नैमित्तिकः प्रयोग इति तं कृत्वा पश्चाद्धविरन्तरमुत्पाद्य नित्योऽपि दर्शः स्वकाले कार्य इति। एवं हि द्विरातञ्चनोक्तिपरा "यदि नो बिभियादभि मोऽदेष्यतीति महारात्रे हवींषि निर्वपेत्। फलीकृतैस्तण्डुलैरुपासीत। अर्धं दधि हविरातञ्चनार्थं निदध्यात्। अर्धं न। यद्यभ्युदियादनेनातञ्च्य चरेत्। यदि न, ब्राह्मणं भोजयेत्" इति श्रुतिरुपपद्यते। अत्र हि "भ्रान्त्या दर्शोयमिति निश्चितवान् चन्द्रोभ्युदेतीति भयं प्राप्नुयात्स महत्यामेव रात्रौ व्रीहीन्निरुप्यावहत्य फलीकृत्योदीक्षमाण आसीत। सायंदोहसम्पादितञ्च दधि द्विधा कृत्वा तत्रार्धं मुख्यकाले करिष्यमाणदर्शोपयुक्तदध्यर्थातञ्चनार्थं निदध्यात्। एवं कृते यद्युदियाच्चन्द्रस्तदाऽऽतञ्चनार्थं स्थापितादन्येन नैमित्तिकं समाप्य स्थापितेन दध्यर्थेन सायं दुग्धे पयसि आतञ्चनं कृत्वा दध्युत्पाद्य परेद्युर्दधियागं निर्वर्तयेत्। यदि नाभ्युदियात्तदाऽऽतञ्चनार्थादन्येनार्धेन ब्राह्मणं भोजयेत्" इत्यर्थस्य प्रतीतेः। एतेन प्रतिपदि प्राप्तो निर्वापो न दर्शभ्रान्त्या चतुर्दश्यां प्राप्त इति कथं निर्वापादूर्ध्वं

चन्द्रोदयप्राप्तिरिति निरस्तम् । दध्नो द्व्यहकालीनत्वेन दोहनातञ्चनयोः पूर्वेद्युरनुष्ठानस्यार्थ-सिद्धत्वात् । व्रीहिनिर्वापस्यापि पूर्वेद्युर्महारात्र एव श्रुतावुक्तत्वाच्चेति ।

फलन्तु, कर्मान्तरमिति पूर्वपक्षे पुनरातञ्चनं न कार्यमिति, सिद्धान्ते तु कार्यमिति ।

इति प्रथमं दर्शेऽभ्युदयेष्टौ नैमित्तिकदेवतापनयाधिकरणम् (सूत्राणि १-९)

अथ द्वितीयमुपांशुयाजेपि देवतापनयाधिकरणम् (सूत्रे १०-११)

उपांशुयाजेऽवचनाद्यथाप्रकृति ॥ १० ॥

(अपनयो वा प्रवृत्त्या यथेतरेषाम् ॥ ११ ॥)

पूर्ववैषम्येणात्र शङ्कनात्सङ्गतिः । ''यस्य हविर्निरुप्तम्'' इति पूर्वोदाहृतवाक्ये पुरोडाशे सान्नाय्ये च हविषि पूर्वदेवताभ्योऽपनयस्तथोपांशुयाजहविष आज्यस्य पूर्वदेवताभ्योऽपनयोऽस्त्युत नेति **सन्देहे,**

युक्तः पूर्वत्र पुरोडाशसान्नाय्ययोः पूर्वदेवताभ्योऽपनयः । देवतान्तरसंयोगश्रवणात् । उपांशुयाजद्रव्याज्यस्य तु स न युक्तः । देवतान्तरसंयोगाश्रवणादिति **प्राप्तम् ।**

तदाह **सूत्रे,** उपांशुयाजे देवतान्तरसम्बन्धावचनान्न पूर्वदेवतातोऽपनयः । किन्तु **यथाप्रकृत्यनुष्ठानमिति ।**

सिद्धान्तस्तु, प्राकृतहविर्मात्रोपलक्षकत्वेन तण्डुलग्रहणेन गृहीतस्याज्यस्यापि विभजे-दित्यनेन पूर्वदेवतातो विभागशब्दितापनयस्य श्रवणात्, प्रथमतः श्रुतस्य चापनयस्योत्तरवाक्ये देवतासंयोगाश्रवणमात्रेण त्यागायोगादस्त्यपनयः । देवतान्तरसयोगश्च अपनीतस्य न श्रुत इत्युपांशुयाजस्य तत्र परिलोप एवेति । दर्शे उपांशुयाजप्रसक्तेरभावेऽपि कृत्वाचिन्तयाऽयं विचारः कृत इत्याहुः ।

इति द्वितीयमुपांशुयाजेपि देवतापनयाधिकरणम् (सूत्रे १०-११)

अथ तृतीयमनिरुप्तेप्यभ्युदयेष्ट्यधिकरणम् (सूत्रामि १२-१५)

निरुप्ते स्यात्तत्सयोगात् ॥ १२ ॥

(प्रवृत्ते वा प्रापणान्निमित्तस्य ॥ १३ ॥ लक्षणमात्रमितरत् ॥ १४ ॥ तथा चान्यार्थदर्शनम् ॥ १५ ॥)

प्रासङ्गिकी **सङ्गतिः**। पूर्वोक्ताभ्युदयेष्टिः किं हविर्निर्वापादूर्ध्वं चन्द्रोदये सति कार्या, किं वा कर्मोपक्रममात्र इति **सन्देहे**

"यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति" इति श्रवणाद्धविर्निर्वापविशिष्टचन्द्रोदयस्य निमित्ततावगमान्निर्वापादूर्ध्वं चन्द्रोदये कर्तव्येष्टिरिति **प्राप्तम्**।

तदाह, **निरूप्ते** हविष्यभ्युदयज्ञान एव नैमित्तिकं **स्यात्**। **तत्सयोगा**न्निरुप्तमिति निर्वापतोयागादिति।

सिद्धान्तस्तु, हविरभ्युदय इत्येतावतैवाऽप्रवृत्तस्य हविषोऽभ्युदयविशेषणत्वायोगेन प्रवृत्तमेव हविर्निमित्तभूतोदयविशेषणमिति हविरुभयत्ववन्निर्वापस्याप्यविवक्षितत्वान्निर्वापात्प्रागपि कर्मारम्भमात्र एवाभ्युदये ज्ञाते सति कर्तव्येयमिष्टिरिति। **फलं** व्यक्तम्।

इति तृतीयमनिरुप्तेप्यभ्युदयेष्ट्यधिकरणम् (सूत्राणि १२-१५)

अथ चतुर्थमनिरुप्तेऽभ्युदये वैकृतीभ्यो निर्वापाधिकरणम् (सूत्रे १६-१७)

अनिरुप्तेऽभ्युदिते प्राकृतीभ्यो निर्वपेदित्याश्मरथ्यस्तण्डुलभूतेष्वपनयात् ॥ १६ ॥

(व्यूर्ध्वभाग्भ्यस्त्वालेखनस्तत्कारित्वाद्देवतापनयस्य ॥ १७ ॥)

पूर्ववैषम्येण शङ्कनात्**सङ्गतिः**। निर्वापात्प्राक्कर्मोपक्रममात्र एव ज्ञातेऽभ्युदये सतीयमिष्टिः कार्येत्युक्तम्। सा किं पूर्वदेवतापनयदेवतान्तरसंयोगरूपेष्टिः निर्वापोत्तरकालं तण्डुलावस्थे हविषि कार्या। निर्वापस्तु प्राकृतीभ्यो देवताभ्य एवोत नैमित्तिकदेवताभ्य इति **सन्देहे**,

''तण्डुलान् विभजेत्'' इत्यादिना तण्डुलावस्थस्यैव हविषः पूर्वदेवतापनयान्य-देवतासंयोगयोः श्रवणात्, पूर्वत्र निर्वापस्याविवक्षायामपीह श्रुततण्डुलीभावताविवक्षा युक्तेति निर्वापस्यापनयादेरश्रवणात्प्राकृतदेवताभ्य एव निर्वाप इति प्राप्तम् ।

तदाह सूत्रे, अनिरुप्ते हविष्यभ्युदयज्ञाने प्राकृतीभ्य एव निर्वाप इत्याश्मरथ्यो मन्यते । कुतः ? तण्डुलेष्वेवापनयश्रवणादिति ।

सिद्धान्तस्तु, ''तण्डुलान् विभजेत्'' इत्यत्र न तण्डुला विवक्षिताः । तथात्वे दधिशृतयोरपनयेनान्यदेवतासंयोगवचनमयुक्तं स्यात् । किन्तु प्राकृतहविर्मात्रोपलक्षणं ''पुरोडाश-सान्नाय्यरूपहविर्विभजेत'' इति । तस्मान्निर्वापात्प्रागभ्युदये तन्निमित्तकदेवताभ्य एव निर्वाप इति ।

इति चतुर्थमनिरुप्तेऽभ्युदये वैकृतीभ्यो निर्वापाधिकरणम् (सूत्रे १६-१७)

अथ पञ्चमं किञ्चिन्निरुप्तेऽभ्युदयेऽवशिष्टस्य तूष्णीं निर्वापाधिकरणम् (सूत्राणि १८-२०)

विनिरुप्ते न मुष्टीनामनपनयस्तद्गुणत्वात् ॥ १८ ॥

(अप्रकृतेन हि संयोगस्तत्स्थानीयत्वात् ॥ १९ ॥ अभावाच्चेतरस्य ॥ २० ॥)

पूर्वाक्षेपेणेह शङ्कनात्सङ्गतिः । यदा प्राकृतदेवतार्थमेकस्य द्वयोर्वा मुष्ट्योर्निर्वापे चन्द्रोदयो ज्ञातस्तदा शेषं प्राकृतीभ्य एव निर्वप्तव्यमुत वैकृतीभ्योऽथ तूष्णीं निर्वप्तव्यमिति सन्देहे,

प्राकृतदेवताभ्यो निर्वापस्य प्रवृत्तत्वाच्छिष्टमपि ताभ्य एव । एवञ्च निमित्ते ज्ञात एव पूर्वदेवतापनयान्यदेवतासंयोगाविति प्रागुक्तमयुक्तमिति वा, निमित्तानन्तरं नैमित्तिकोऽप-नयोऽन्यदेवतासंयोगश्च कार्य इति शिष्टं वैकृतदेवताभ्यो निर्वप्तव्यमिति वा प्राप्तम् ।

तत्राद्ये सूत्रम्, विनिरुप्तेऽर्धनिरुप्ते सति चतुर्मुष्टीनां पूर्वदेवतानपनयः । कुतः ? तद्गुणत्वात् चतुर्मुष्टिविशिष्टनिर्वापगुणत्ववद्देवताया इति । द्वितीये तु अप्रकृतेन हि

संयोगस्तत्स्थानीयत्वादिति **सूत्रम्**। प्रकृतेन देवताविशेषेण संयोगश्रवणात्तदर्थमेव शिष्टं निर्वप्तव्यम्। प्राकृतदेवतास्थानीयत्वात् वैकृतदेवतानामिति।

सिद्धान्तस्तु, चतुर्मुष्टिविशिष्टो निर्वाप एकः पदार्थो, न त्वेकैकमुष्टिविशिष्ट, इति पञ्चमस्य द्वितीयपादे **मुष्टिकपालाज्ञ्नेति** नयेऽभिहितम्। प्राकृतदेवताश्च पदार्थेनैव संयोजिताः। न तु तदेकदेशेन । तेन तत्स्थानापन्ना वैकृतदेवता अपि पदार्थेनैव संयोजनीयाः। निर्वापशेषश्च पदर्थैकदेश इति न तेन संयोगमर्हन्तीति प्राकृतीभ्योऽपनयाद्वैकृतीभिरसंयोगाच्च तूष्णीमेव शिष्टं निर्वप्तव्यम्। न देवतोद्देशेनेति।

तदाह **सूत्रे, अभावाच्चेतरस्येति**। इतरस्यार्थस्याभावात् न देवतान्तरसंयोग इत्यर्थः। **फलन्तु**, तूष्णीमेव निर्वापानुष्ठानं शेषस्येति।

इति पञ्चमं किञ्चिन्निरुप्तेऽभ्युदयेऽवशिष्टस्य तूष्णीं निर्वापाधिकरणम् (सूत्राणि १८-२०)

अथ षष्ठं संनयदसंनयदुभयस्यैवाभ्युदये प्रायश्चित्ताधिकरणम् (सूत्राणि २१-२४)

सान्नाय्यसंयोगान्नासन्नयतः स्यत्॥ २१॥

(औषधसंयोगाद्वोभयोः॥ २२॥ वैगुण्यान्नेति चेत्॥ २३॥ नातत्संस्कारत्वात्॥ २४॥)

पूर्वन्यायोनात्र शङ्कनात्सङ्गतिः। किमियमभ्युदयेष्टिः सान्नाय्ययाजिनोऽथासंनयतोपीति **सन्देहे**, "शृते चरुं दधनि चरुं" इति श्रवणादसंनयतश्च दधिशृतयोरभावान्नास्ति नैमित्तिकेष्ट्यनुमाने शक्तिः। एवञ्च पूर्वत्र यथाऽवशिष्टनिर्वापे देवतोद्देशनिवृत्तिरेवमसन्नयतोऽभ्युदयेष्टिनिवृत्तिरिति **प्राप्तम्**। तदाह **सूत्रे, सान्नाय्ये देवतासंयोगात् असंनयतश्च** तदनुष्ठानाशक्तेर्नाभ्युदयेष्टिः **स्यादिति**।

सिद्धान्तस्तु, दधिशृतयोश्चरुं प्रत्यधिकरणतया विधाने हि "ये स्थविष्ठास्तण्डुलास्ते प्रदातृत्वगुणविशिष्टेन्द्राय देयाः, दधनि चरुश्च कार्यः" इति तण्डुलोद्देशेन देवतासम्बन्ध-

दध्यधिकरणत्वयोर्द्वयोर्विधेयतया वाक्यभेदप्रसङ्गेन तण्डुलान् दधिशृते चोदिश्येन्द्रादिदेवतासंनय-तोगमात्रं विधीयत इत्युपेयम् । उद्देश्ये च साहित्यमविवक्षितमित्यसंयतो दधिशृतयोरभावेपि तण्डुलानामुदके चरुश्रपणसम्भवाद्दधिशृताभ्यां श्रपणस्यापि निवृत्तौ तण्डुलमात्रस्य वा देवतान्तरसंयोगः कर्तुं शक्य इत्यसंनयतोप्यस्तीष्टावधिकार इति ।

फलं व्यक्तम् ।

इति षष्ठं संनयदसंनयदुभयस्यैवाभ्युदये प्रायश्चित्ताधिकरणम् (सूत्राणि २१-२४)

अथ सप्तमं सत्राय प्रवृत्तमात्रस्य विश्वजिदधिकरणम् (सूत्राणि २५-२७)

साम्युत्थाने विश्वजित्क्रीते विभागसंयोगात् ॥ २५ ॥

(प्रवृत्ते वा प्रापणान्निमित्तस्य ॥ २६ ॥ आदेशार्थेतरा श्रुतिः ॥ २७ ॥)

पूर्ववैषम्येणात्र शङ्कनात्सङ्गतिः । ''यदि सत्राय दीक्षितानां साम्युतिष्ठासेत्सोमं विभज्य विश्वजिता यजेत'' इति श्रूयते ।

तदर्थः, सत्रिणां मध्ये यः कोऽपि सामि अव्ययमेतत्; सत्रैकदेशं कृत्वा सत्रं त्यक्त्वा गन्तुमिच्छेत् स्वकीयं सोमं विभज्य तेन सोमेन विश्वजिद्यागं कुर्यात् इति । सोयं विश्वजिद्यागः क्रीतसोमस्य पुंसोऽथाक्रीतसोमस्यापीति **सन्देहे,**

पूर्वत्र विशेषाश्रवणेनासन्नयतोप्यस्त्वधिकारः । इह तु ''सोमं विभज्य'' इति सोमविभागरूपविशेषश्रवणात्क्रीतसोमस्यैव सत्रात्साम्युत्थानेच्छायां नैमित्तिको विश्वजिदधिकारः । नाक्रीतसोमस्य । तस्य सोमाभावादिति **प्राप्तम्** ।

तदाह, **क्रीते** सोमे **साम्युत्थाने विश्वजित्**कार्यः । कुतः ? **विभागसंयोगात्** सोमविभागश्रवणादिति ।

सिद्धान्तस्तु, नात्र सोमविभागो विश्वजिदङ्गत्वेन विधीयते। येनाक्रीतसोमस्य विश्वजिन्न स्यात्। किन्तु क्रीतसोमस्योत्तिष्ठासोः प्राक्संसृष्टस्वकीयद्रव्यान्तरविभगवद्रागप्राप्तः सोमविभागोऽनूद्यते। अक्रीतसोमस्याप्युत्तिष्ठासोः सोमाभावेनाशक्यत्वात्तद्विभागो न विधेय इति द्वयोरपि सोमोपलक्षितद्रव्यमात्रविभागं रागप्राप्तमनूद्य विश्वजिन्मात्रं विधीयत इत्यक्रीतसोमस्यप्यस्तीष्ट्यधिकार इति। **फलं व्यक्तम्।**

इति सप्तमं सत्राय प्रवृत्तमात्रस्य विश्वजिदधिकरणम् (सूत्राणि २५-२७)

अथाष्टमं ज्योतिष्टोमे दीक्षापरिमाणानां वैकल्पिकत्वाधिकरणम्

दीक्षापरिमाणे यथाकाम्यमविशेषात्॥ २८॥

नैमित्तिकप्रसङ्गाद्दीक्षानिमित्ता धर्माः कियत्कालमनुवर्तन्त इति **दीक्षा कालस्येत्यारभ्य** चतुर्भिर्नयैश्चिन्तयिष्यते। तदर्थं दीक्षापरिमाणं ततः प्राक्तनैस्त्रिभिर्नयैश्चिन्त्यत इति **सङ्गतिर्ज्ञेया।** ज्योतिष्टोमप्रकरणे दीक्षापक्षाः श्रुताः। तान् **कल्पसूत्रकृदुदाहरत्** ''एका दीक्षा, तिस्र उपसदः, पञ्चमी प्रसुतः। तिस्रो वा दीक्षाः, तिस्र उपसदः, सप्तमी प्रसुतः। चतस्रो वा दीक्षाः, तिस्र उपसदः, अष्टमी प्रसुतः'' इति। तथाऽन्यदपि श्रुतम् ''द्वादश दीक्षाः'' इति। दीक्षणीयेष्ट्या सम्पन्नः संस्कारो दीक्षा। सा चैकस्मिन् दिनेऽनुष्ठानादेका भवति। तत ऊर्ध्वं त्रिषु दिनेषूपसन्नामका होमाः। पञ्चमे दिने सोमयागः। एवं त्रिषु चतुर्षु द्वादशसु वा दिनेषु दीक्षाधर्मा वाङ्नियमनादयोऽनुवर्तनीया इत्यर्थः। तत्रैकादिदीक्षाणां सर्वासामपि विकल्पेन ज्योतिष्टोमे निवेशः, उत द्वादशदीक्षाणामेवेति **सन्देहे,**

एका**दिदीक्षापरिमाणानां यथाकाम्यम्। अविशेषात्** विशेषाश्रवणात् इति **दीक्षेति सूत्रेण** विकल्पेन सर्वासां निवेशं पूर्वपक्षयित्वा ''द्वादशरात्रीर्दीक्षितो भृतिं वन्वीत'' इति द्वादशरात्रीर्दीक्षितस्य नित्यवत्परिक्रियार्थं याञ्चया द्रव्यसम्पादनशब्दितभृतिवननाम्नानसामर्थ्य-रूपाल्लिङ्गाद्द्वादशाहपरिमाणैव दीक्षा। एकादिदीक्षाणान्तु विकृतिषु श्रुतकल्पान्तरासु निवेश इति **''द्वादशाहस्तु लिङ्गदर्शनात्स्यादिति''** सूत्रेण सिद्धान्तितवान् **भाष्यकारः।**

वार्तिककारस्तु, सूत्रद्वयमधिकरणद्वयम्। सिद्धान्तसूत्रे एव द्वे। पूर्वपक्षौ तूत्सूत्रौ। तथा हि भाष्यकारीयसिद्धान्तं पूर्वपक्षीकृत्य तदीयं पूर्वपक्षमेव सिद्धान्तितवान्। भृतिवनननसामर्थ्य-रूपलिङ्गदर्शनन्तु द्वादशाहपक्षे नेयमित्याद्यमधिकरणम्। द्वितीयन्तु,?

इत्यष्टमं ज्योतिष्टोमे दीक्षापरिमाणानां वैकल्पिकत्वाधिकरणम्

अथ नमवं द्वादशाहे दीक्षापरिमाणनियमाधिकरणम्

द्वादशाहस्तु लिङ्गदर्शनात्स्यात्॥ २९॥ इति॥

ज्योदिष्टोमविकृतिभूते द्वादशाहे पूर्वसिद्धान्तन्यायेन प्रकृतौ ज्योतिष्टोम इव तद्विकृतावप्येकादिदीक्षाणां विकल्प इति प्राप्ते, ''षट्त्रिंशदहो वा एष यद्द्वादशाहः'' इति वाक्ये षट्त्रिंशदहत्वस्य द्वादशाहे श्रवणलिङ्गादुपसदां सुत्यानां प्रत्येकं द्वादशत्वे विवादाभावादीक्षाहानां द्वादशत्वेन षट्त्रिंशदहत्वस्य वाच्यत्वात्। तथा ''अभीन्धत एव दीक्षभिः'' इति बहुत्वश्रवणबलाच्च द्वादशदीक्षावत्त्वमेव द्वादशाहस्येति। न च बहुत्वं दीक्षाणां वैकल्पिकत्वेऽपि युक्तमिति शंक्यम्। तद्वाक्यशेषे ''द्वाभ्यां लोमावद्यति, द्वाभ्यां त्वचं, द्वाभ्यामसृक्, द्वाभ्यां मांसं, द्वभ्यामस्थि, द्वाभ्यां मज्जानम्'' इति षण्णां द्विकानामनुक्रमेण द्वादशत्वेनैव बहुत्वव्यवस्थापनादिति।

व्यक्तः सूत्रार्थः। फलं व्यक्तम्।

इति नवमं द्वादशाहे दीक्षापरिमाणनियमाधिकरणम्

अथ दशमं गवामयने माघपौर्णमास्याः पुरस्ताद्दीक्षाधिकरणम् (सूत्राणि ३०-३७)

पौर्णमास्यामनियमोऽविशेषात्॥ ३०॥

(आनन्तर्यात्तु चैत्री स्यात्॥ ३१॥ माघी वैकाष्टकाश्रुतेः॥ ३२॥ अनया अपीति चेत्॥ ३३॥ न भक्तित्वादेषा हि लोके॥ ३४॥ दीक्षापराधे चानुग्रहात्॥ ३५॥ उत्थाने चानुप्ररोहात्॥ ३६॥ अस्यश्च सर्वलिङ्गानि॥ ३७॥)

दीक्षाप्रसङ्गात्सत्रगतदीक्षाचिन्तनात्प्रासङ्गिकी **सङ्गतिः** । गवामनयाख्ये सत्रे श्रूयते '' चतुरहे पुरस्तात्पौर्णमास्या दीक्षेरन् । तेषामेकाष्टकायां क्रयः सम्पद्यते'' इति । पौर्णमास्याः पूर्वस्मिंश्चतुरहे एकादश्यां दीक्षामारभेरन् । तथा सति पौर्णमास्या उपरितने सप्तमीदिने द्वादशदीक्षाः पूर्यन्ते । तत उपरितन्यामष्टम्यां सोमक्रय इत्यर्थः । तत्रैषा पौर्णमासी या काचित्, किं वा चैत्री, यद्वा माघीति **सन्देहः** ।

पूर्वपक्षस्तु, विशेषाश्रवणात् या काचिदित्येकः । तदाह, विशेषाश्रवणात्पौर्णमास्यामनियमो या काचित्पौर्णमासी स्यादिति । ''चित्रापौर्णमासे दीक्षेरन् । मुखं वा एतत्संवत्सरस्य यश्चित्रापौर्णमासः'' इति चैत्र्याः पूर्ववाक्ये प्रशंसनाच्चैत्री पौर्णमासीति द्वितीयः । तदाह **सूत्रे, आनन्तर्यात्तु चैत्री स्यादिति** ।

सिद्धान्तस्तु, याज्ञिकसमाख्यया माघकृष्णाष्टम्या एकाष्टकात्वप्रसिद्धेस्तत्र सोमक्रयसम्पत्तये माघ्याः पौर्णमास्याः पूर्वस्यामेकादश्यां दीक्षाऽरब्धव्येति । **फलं व्यक्तम्** ।

इति दशमं गवामयने माघपौर्णमास्याः पुरस्ताद्दीक्षाधिकरणम् (सूत्राणि ३०-३७)

अथैकादशं दीक्षोत्कर्षे तन्नियमानामप्युत्कर्षाधिकरणम् (सूत्रे ३८-३९)

दीक्षाकालस्य शिष्टत्वादतिक्रमे नियतानामनुत्कर्षः प्राप्तकालत्वात् ॥ ३८ ॥

(उत्कर्षो वा दीक्षितत्वादविशिष्टं हि कारणम् ॥ ३९ ॥)

यदर्थं दीक्षापरिमाणं चिन्तितं तदिदानीं चिन्त्यते । ज्योतिष्टोमे सुत्यादिने त्रिषु सवनेष्वानुष्ठितेष्ववभृथः कार्यः । तस्मिन् कृते दीक्षानियमा निवर्तन्ते । केनचित्कारणेनावभृथोत्कर्षे सति ततः पूर्वदिनेषु दीक्षितनियमा अनुष्ठेयाः, उत नेति **सन्देहे**,

दीक्षितो न ददाति न जुहोति, न च पचते'' इत्यादिनोक्ता अग्निहोत्राद्यकरणनियमाः । यावत्कालं दीक्षानुवृत्तिस्तावत्कालं दीक्षितो न जुहोतीति शास्त्रप्रवृत्तेः । अवभृथे च शास्त्रेण

लौकिकेन केनचित्कारणेनोऽत्कृष्टे सति न तावत्पर्यन्तं दीक्षानुवृत्तिरिति कर्तव्यं मध्येऽग्निहोत्रादिकमिति प्राप्तम् ।

तदाह, **दीक्षाकालस्यैव** होमाद्यकरणनिमित्तत्वेन **शिष्टत्वात् तदतिक्रमे नियतानां** नित्यानां दानादीनां **प्राप्तकालत्वादनुत्कर्षः** । कर्तव्यं दानादिकमिति यावत् ।

सिद्धान्तस्तु, दीक्षोन्मोचनस्य साधनमवभृथः । अतोवभृथोत्कर्षे यावदवभृथं दीक्षाऽनुवर्तत इति तावत्पर्यन्तं दीक्षितधर्माणां निषेधानामुवृत्तेरवभृथात्प्राग्दानाग्निहोत्रादिकं न कार्यमिति । **फलं** व्यक्तम् ।

इत्येकादशं दीक्षोत्कर्षे तन्नियमानामप्युत्कर्षाधिकरणम् (सूत्रे ३८-३९)

अथ द्वादशं ज्योतिष्टोमोत्कर्षे प्रतिहोमाननुष्ठानाधिकरणम् (सूत्रे ४०-४१)

तत्र प्रतिहोमो न विद्यते यथा पूर्वेषाम् ॥ ४०॥

(कालप्राधान्याच्च ॥ ४१ ॥)

प्रासङ्गिकी **सङ्गतिः** । अवभृथोत्कर्षे तावत्कालं दीक्षानुवृत्तेरवभृथात्प्रागग्निहोत्रादि न कार्यमित्युक्तम् । तर्हि तदकरणनिमित्तः प्रतिहोमः कार्यः, उत नेति **सन्देहे**,

कार्य इति **प्राप्तम्** । अवभृथोत्कर्षस्य लौकिक हेतुकत्वेनाशास्त्रीयतया तावत्कालं दीक्षानुवृत्तेरपि तथात्वेनाग्निहोत्राद्यननुष्ठानस्य पुरुषापराधकृतत्वेनापराधपरिहारार्थत्वादिति ।

सिद्धान्तस्तु, कर्तव्याकरणे हि तद्दोषपरिहाराय प्रतिहोमः कार्यः । येन केनापि हेतुनाऽवभृथोत्कर्षवशात्प्राप्तदीक्षानुवृत्तावस्याग्निहोत्रादिकरणे ''दीक्षितो न जुहोति'' इति निषेधेन तदकरणेनाग्निहोत्रादेः कर्तव्यत्वाप्राप्तेर्न कार्यः प्रतिहोम इति ।

तदाह सूत्रे, **तत्र** अवभृथोत्कर्षस्थले **पूर्वेषां** दीक्षाकालीनानामिव अवभृथोत्कर्ष-कालीनानामपि **प्रतिहोमः** कालान्तरे होमो **न विद्यत** इति ।

फलन्तु, पूर्वमकृतस्य पुनः कालान्तरेऽनुष्ठानम् ।

इति द्वादशं ज्योतिष्टोमोत्कर्षे प्रतिहोमाननुष्ठानाधिकरणम् (सूत्रे ४०-४१)

अथ त्रयोदशमुदरसनीयोत्कर्षेपि प्रतिहोमाननुष्ठानाधिकरणम्

प्रतिषेधाच्चोर्ध्वमवभृथादेष्टेः ॥ ४२ ॥

पूर्वैषम्येणात्र शङ्कनात्सङ्गतिः । अवभृथानन्तरं विहितोदवसानीयेष्टिरवभृथे कृते पश्चाद्दैवात्केनापि हेतुनोत्कृष्टा तदा ततः प्राक्किमग्निहोत्रं कर्तव्यतया प्राप्तमुत नेति सन्देहे,

अवभृथोत्कर्षे दीक्षाया अप्युत्कर्षेण ततः प्रागग्निहोत्राकरणेप्यवभृथस्य दीक्षोन्मोचनहेतुत्वात्तदुत्तरकालं कर्तव्यतया प्राप्तमग्निहोत्रमवश्यं कर्तव्यमिति प्राप्ते,

सिद्धान्तः, अवभृथानन्तरं दीक्षानिवृत्तावपि ''एतया पुनराधेयसंमितयेष्ट्वा अग्निहोत्रं जुहुयात्'' इति वचनेनोदवसानीयेष्टौ कृतायामेव पश्चादग्निहोत्राधिकारोक्तेस्तदुत्कर्षे ततः प्रागनधिकारान्न कार्यमग्निहोत्रमिति ।

तदाह सूत्रकारः, अवभृथादूर्ध्वं एष्टेः, आ इष्टेः, इष्टेः प्राक् प्रतिषेधादनधिकरप्रतिपादनान्न कार्यमग्निहोत्रादिकमिति ।

फलन्तु, पूर्वपक्षे अवश्यकर्तव्यतया प्राप्तत्वेन तदकरणे प्रतिहोमकर्तव्यता । सिद्धान्ते तु, अनधिकारादेव तदकरणे प्रतिहोमो न कर्तव्य इति ।

इति त्रयोदशमुदवसानीयोत्कर्षेपि प्रतिहोमाननुष्ठानाधिकरणम्

अथ चतर्दशं प्रतिहोमे सायंप्रातरग्निहोत्रप्रभृत्यारम्भाधिकरणम् (सूत्रे ४३-४४)

प्रतिहोमाश्चेत्सायमग्निहोत्रप्रभृति हूयेरन् ॥ ४३ ॥

(प्रातस्तु षोडशिनि ॥ ४४ ॥)

प्रासङ्गिकी **सङ्गतिः**। पूर्वत्रावभृथोदवसानीययोरुत्कर्षे ततः प्रागग्निहोत्रादि न कार्यम्। तदकरणनिमित्तप्रतिहोमाश्च न कार्या इत्युक्तम्। कर्तव्या इति पक्षे कथमिति कृत्वाचिन्तयेदमारभ्यते। अवभृथेष्ट्युदवसानीयेष्ट्योरुत्कृष्टयोरनुष्ठितयोः सतोः पूर्वमतिपन्ना होमा युगपद्बहवः प्राप्ताः। तेषामनुष्ठाने किं क्रमोऽस्त्युत नेति **सन्देहे,**

नियामकाभावान्नास्ति क्रमनियम इति **प्राप्ते,**

अतिपातक्रमस्य बुद्धिस्थस्य त्यागे हेत्वभावात्प्रतिहोमेष्वपि स एव क्रम इत्याग्निष्टोमस्यापराह्ण एवावभृथसमाप्तेः सायमग्निहोत्रप्रभृत्यतिपातात्सायमग्निहोत्रप्रभृतिहोमाः कार्याः। षोडश्यादौ तु रात्रावेवावभृथसमाप्तेः प्रातरग्निहोत्रप्रभृति हूयेरन् इति **सिद्धान्तः**।

तदाह **सूत्राकारः , प्रतिहोमाश्चेदित्यादि**। तथा **प्रातस्तु षोडशिनीति** च। व्यक्तः सूत्रार्थः। **फलन्तु,** अतिपातक्रमेण होमानुष्ठानम्।

इति चतुर्दशं षोडशीसंस्थे प्रातरग्निहोत्रप्रभृत्यनुष्ठानाधिकरणम् (सूत्रे ४३-४४)

अथ पञ्चदशं भेदनादिनिमित्तकहोमस्य दर्शपूर्णमासाङ्गताधिकरणम् (सूत्राणि ४५-४७)

प्रायश्चित्तमधिकारे सर्वत्र दोषसामान्यात् ॥ ४५ ॥

(प्रकरणे वा शब्दहेतुत्वात् ॥ ४६ ॥ अतधिकारश्च ॥ ४७ ॥)

एवं **दीक्षापरिमाण** इत्यारभ्य सप्तभिर्नयैः प्रासङ्गिकं विचार्याधुना प्रक्रान्तप्रायश्चित्ताधिकार एव चिन्त्यत इति **सङ्गतिः**। दर्शपूर्णमासयोः श्रूयते ''भिन्ने जुहोति'' इत्यादिना पात्रभेदनस्कन्दननिमित्तो होमः। स किं यत्र यत्र भेदस्तत्र तत्र सर्वत्र स्यादुत प्राकरणिकपात्रभेद एवेति **सन्देहे,**

वाक्यप्रमाणेन यावन्निमित्तं नैमित्तिकहोमोऽवगम्यमानः प्रकरणेन प्रकृते स्थापयितुं न शक्य इति क्रत्वन्तरेषु लोके वा यत्र यत्र पात्रभेदादि निमित्तं तत्र सर्वत्राप्ययं होम इति प्राप्तम्।

तदाह, अधिकारे दर्शपूर्णमासप्रकरणे श्रुतं प्रायश्चित्तं सर्वत्र स्यात्। दोषस्य भेदनादिरूपस्य सर्वत्र समानत्वादिति।

सिद्धान्तस्तु, ''भिन्ने जुहोति'' इत्युक्तनैमित्तिकहोमस्य चेतनप्रवर्तनारूपविध्यन्यथा-नुपपत्त्या फलवत्त्वेन भाव्यत्वात्, अप्राकरणिकेपि लोकभेदादौ प्रवेशे फलकल्पनाप्रसङ्गात्, प्रकरणेन प्रकृतकर्मणैकवाक्यतायां क्रतुफलेनैव फलवत्त्वसिद्धेः, प्राकरणिकभेदादिनिमित्तक एवायं होम इति दर्शपूर्णमासाङ्गमेव। न तु गृहदाहेष्टिवत् स्वतन्त्रकर्मेति।

फलन्तु, दर्शपूर्णमासविकारेष्वग्निहोत्रादिषु भेदने तु नैतत्प्रायश्चित्तमिति।

इति पञ्चदशं भेदनादिनिमित्तकहोमस्य दर्शपूर्णमासाङ्गताधिकरणम् (सूत्राणि ४५-४७)

अथ षोडशं व्यापन्नशब्दार्थनिर्णयाधिकरणम्

व्यापन्नस्याप्सु गतौ यदभोज्यमार्याणां तत्प्रतीयेत ॥ ४८ ॥

प्रायश्चित्तप्रसङ्गात् ''व्यापन्नमप्सु प्रहरति'' इति वाक्यं बुद्धिस्थमासीदिति तत्रत्यव्यापन्नशब्दार्थप्रश्नस्योत्तरमिदं सूत्रम्, व्यापन्नस्याप्सु गतौ प्रहरणे श्रूयमाणे व्यापन्नशब्देन यदार्याणामभोज्यं केशकीटादिदूषितं तत्प्रतीयेतेत्यर्थः।

इति षोडशं व्यापन्नशब्दार्थनिर्णयाधिकरणम्

अथ सप्तदशमपच्छेदयौगपद्येपि प्रायश्चित्ताधिकरणम् (सूत्रे ४९-५०)

विभागश्रुतेः प्रायिश्चित्तं यौगपद्ये न विद्यते ॥ ४९ ॥

(स्याद्वा प्राप्तनिमित्तत्वात्कालमात्रमेकम् ॥ ५० ॥)

व्यापन्नरूपनिमित्तप्रसङ्गादपच्छेदरूपनिमित्तविषयचिन्ता आपादसमाप्ति पञ्चभिर्नयैः क्रियत इति **सङ्गतिः**। ज्योतिष्टोमे प्रातस्सवने बहिष्पवमानेन स्तोष्यमाणा ऋत्विजः स्वस्य स्वस्य पुरतो गन्तुः कच्छं गृहीत्वा पिपीलिकापंक्त्याकारेण शालाया बहिः प्रसर्पन्ति। तत्र यदि पुरोगन्तुः कच्छं पृष्ठतो गन्ता प्रमादात् मुञ्चेत्तदा प्रायश्चित्तं श्रूयते "प्रतिहर्ताऽपच्छिन्द्यात्सर्ववेतसं दद्यात्। यद्युद्गाताऽपच्छिन्द्याददक्षिणं तं यज्ञमिष्ट्वा तेन पुनर्यजेत। तत्र तद्दद्याद्यत्पूर्वस्मिन् दास्यन् स्यात्" इति। अपच्छिन्द्यात् मुञ्चेत्। सर्ववेतसं सर्वस्वमित्यर्थः। यदोद्गातृप्रतिहत्रोर्युगपदपच्छेदस्तदा किं प्रायश्चित्तं कार्यमुत नेति **सन्देहे,**

एकैककर्तृको ह्यपच्छेदो निमित्तत्वेन श्रुतः। अयन्तूभयकर्तृको नैकेन व्यपदेष्टुं शक्यते। अतो यौगपद्येन निमित्ताविधानान्न कार्यं प्रायाश्चित्तमिति **प्राप्तम्**।

तदाह, **यौगपद्ये** अपच्छेदे कत्रोर्यौगपद्ये **प्रायश्चित्तं न विद्यते**। कुतः ? **विभागश्रुतेः** एकैककर्तृक एवापच्छेदे प्रायश्चित्तश्रुतेरिति।

सिद्धान्तस्तु, उभयकर्तृकापच्छेदस्यैकत्वे स्यादेवम्। द्वावत्रापच्छेदौ। तत्रैकैकस्यैकैक एवान्योन्यनिरपेक्षः कर्तेति नास्ति निमित्तविघातः। कालमात्रैक्यादेकापच्छेदभ्रान्तिः। अतो निमित्तसत्त्वादस्ति प्रायश्चित्तमिति।

इति सप्तदशमपच्छेदयौगपद्येपि प्रायश्चित्ताधिकरणम् (सूत्रे ४९-५०)

अथाष्टादशं यौगपद्येऽदाक्षिण्यसर्वस्वदाक्षिण्यविकल्पाधिकरणम् (सूत्राणि ५१-५३)

तत्र विप्रतिषेधाद्विकल्पः स्यात् ॥ ५१ ॥

(प्रयोगान्तरे वोभयानुग्रहः स्यात् ॥ ५२ ॥ न चैकसंयोगात् ॥ ५३ ॥)

पूर्वत्र सामान्यतः प्रायश्चित्तमस्तीति सिद्धाविह समुच्चयविकल्परूपविशेषचिन्तनात्सङ्गतिः।

अदक्षिणतया प्रक्रान्तप्रयोगसमाप्तिपूर्वकं पूर्वक्लृप्तदक्षिणायुक्तपुनःप्रयोगरूपं सर्वस्वदानरूपञ्च यत्प्रायश्चित्तद्वयमुद्गातृप्रतिहर्तृकर्तृकापच्छेदरूपनिमित्तभेदेन श्रुतं तद्यौगपद्यस्थले किं समुचीयते, अथ विकल्प्यते इति **सन्देहे,**

अदक्षिणत्वसर्वस्वदानयोर्विरोधेऽपि पुनर्यजेतेति प्रयोगद्वयश्रवणात्पूर्वस्मिन्नदाक्षिण्यस्य उत्तरस्मिन् प्रयोगे सर्वस्वदानस्य निवेशसम्भवात्समुच्चयः प्रायश्चित्तद्वयस्येति **प्राप्ते,**

सिद्धान्तः, यत्र हि प्रयोगेऽपच्छेदरूपं निमित्तं तस्यैव हि नैमित्तिकभूतं प्रायश्चित्तमङ्गम्। न हि प्रयोगान्तरेऽपच्छेदरूपनिमित्तहीने क्रियमाणेन प्रायश्चित्तेन निमित्तवतः प्रयोगस्य साद्गुण्यं भवति। तस्मादेकप्रयोगे समाविष्टयोरदक्षिणत्वसर्वस्वदानयोर्विरुद्धयोः समुच्चयो न शक्य इति विकल्प एव युक्त इति।

तदाह **सूत्रे**, तत्र अपच्छेदद्वयसमावेशस्थले **प्रतिषेधादन्योन्यं** नैमित्तिकियोर्विरोधा**द्विकल्पः स्यादिति**।

फलन्तु, निमित्तद्वयसमावेशे विरुद्धनैमित्तिकयोरसमावेशेन विकल्पेनानुष्ठानम्।

इत्यष्टादशं यौगपद्येऽदाक्षिण्यसर्वस्वदाक्षिण्यविकल्पाधिकरणम् (सूत्राणि ५१-५३)

अथैकोनविंशमानुपूर्व्येणापच्छेदे उत्तरापच्छेदनिमित्तप्रायश्चित्तानुष्ठानाधिकरणम्

पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत् ॥ ५४ ॥

समावेशे विकल्प उक्ते पौर्वापर्ये कथमिति चिन्तनात्सङ्गतिः। यत्र प्रयोगे उद्गातृप्रतिहर्त्रोरानुपूर्व्येणापच्छेदो भवति तत्र किं पूर्वोत्पन्नापच्छेदनिमित्तं प्रायश्चित्तं कार्यमुत विकल्पोऽथोत्तरनिमित्तमिति **सन्देहे,**

पूर्वापच्छेदनिमित्तकप्रायश्चित्तस्यासञ्जातविरोधित्वेन बलीयस्त्वात्तदेव कार्यमिति वा द्वयोरपि नैमित्तिकिशास्त्रयोः प्रामाण्याद्विकल्पो वेति **प्राप्ते,**

सिद्धान्तः, पूर्वेण नैमित्तिकविषयकज्ञानेनौत्तरतद्विषयकज्ञानस्योत्पत्तिर्न प्रतिबद्धुं शक्यते। शास्त्रेण तदुत्पत्तेरनुभवसिद्धत्वात्। तच्चोत्तरं ज्ञानमुत्पद्यमानं स्वविरुद्धस्य पूर्वज्ञानस्य बाधेनैवोत्पद्यते। अतः पूर्वं प्रायश्चित्तज्ञानं मिथ्या भवति। उत्तरस्य तु ज्ञानस्य न किञ्चिदस्ति बाधकम्। न च पूर्वज्ञानमेव विरोधित्वात्तस्य बाधकमिति शङ्क्यम्। तदोत्तरज्ञानस्यानुत्पत्तेरनुपस्थितेश्च। तस्मात्पूर्वदौर्बल्येनोत्तरस्यैवानुष्ठानमिति।

तदाह, निमित्तद्वयस्य **पौर्वापर्ये पूर्वस्य दौर्बल्यमुत्तरेण** बाधः। **प्रकृतिवत्** यथा प्रकृतावाम्नातानां कुशादीनां ''शरमयं बर्हिर्भवति'' इति विशेषवचनोक्तैः शरादिभिर्बाधस्तथेति। **फलं** व्यक्तम्।

इत्येकोनविंशमानुपूर्व्येणापच्छेदे उत्तरापच्छेदनिमित्तकप्रायश्चित्तानुष्ठानाधिकरणम्

अथ विंशमुद्गातुरुत्तरापच्छेदेपि सर्वस्वदक्षिणादानाधिकरणम्

यद्युद्गाता जघन्यः स्यात्पुनर्यज्ञे सर्ववेतसं दद्याद्यथेतरस्मिन्॥ ५९॥

पूर्वत्र परप्राबल्यस्थितावत्रोद्गात्रवच्छेदस्य परत्वपक्षे चिन्तेति **सङ्गतिः**। यद्युद्गात्रपच्छेदः पश्चात्तनस्तदा किं पुनःप्रयोगे द्वादशशतं देयमुत द्वादशशतसर्ववेतसदानयोर्विकल्पोऽथ सर्वस्वदानमिति **सन्देहः**।

पूर्वपक्षस्तु ''तत्र तद्दद्यात् यत्पूर्वस्मिन् दास्यन् स्यात्'' इति श्रुतौ यदेव क्रतुस्वभावतो देयं तदेव गवां द्वादशाधिकशतं प्रतीयते इति तदेव पुनःप्रयोगे देयमित्येकः। यद्वोद्वादशशतं दास्यन्नासीत्तदा प्रतिहर्त्रपच्छेदे च प्राप्ते सर्ववेतसदानं पश्चात्प्राप्तमित्युभयमपि पूर्वस्मिन् दास्यन्नित्यनेन गृहीतुं शक्यत इति पुनःप्रयोगे दक्षिणाद्वयस्य विकल्प इति **द्वितीयः**।

सिद्धान्तस्तु, प्रथमप्रयोगे प्रतिहर्तुः प्रथममपच्छेदे तन्निमित्तकं सवस्वदानरूपं प्रायश्चित्तं प्रथमप्रयोगे प्राप्तम्। तेन च क्रतुस्वभावप्रयुक्तस्य द्वादशशतस्य बाधान्न तद्दास्यन् भवति। किन्तु सर्ववेतसमेवेति तस्यैव पुनःप्रयोगे 'पूर्वस्मिन् दास्यन्' इत्यनेन ग्रहणात्सर्ववेतसदानमेव पुनःप्रयोग इति।

तदाह, यद्युद्गाता प्रतिहर्तुरनन्तरमपच्छिद्येत तदा पुनर्यज्ञे सर्ववेतसमेव दद्यात् । न द्वादशशतम् । यथा इतरस्मिन् प्रतिहर्तृमात्रापच्छेदनिमित्तके प्रयोगे तद्वदिति । फलन्तु व्यक्तम् ।

इति विंशमुद्गातुरुत्तरापच्छेदेपि सर्वस्वदक्षिणादानाधिकरणम्

अथैकविंशमहर्गणेऽपच्छेदे सर्वावृत्तिनिराकरणाधिकरणम्

अहर्गणे यस्मिन्नपच्छेदस्तदावर्तेत कर्मपृथक्त्वात् ॥ ५६ ॥

प्रसङ्गिकी सङ्गतिः । द्वादशाहाद्यहर्गणे यदि कस्मिंश्चिदहन्युद्गाताऽपच्छिन्द्यात्तदा किं कृत्स्नस्याहर्गणस्यावृत्तिरुत तस्यैवाह्न इति सन्देहे, धर्माणां फलसाधनकर्मनिवेशित्वादहर्गणस्यैव फलसाधनत्वात्तस्यैव पूर्वप्रयोगमदक्षिणं समाप्य पुनःप्रयोगः प्राक्सङ्कल्पितदक्षिणायुक्तः कार्य इति प्राप्ते,

सिद्धान्तः, ''द्वादशाहेन प्रजाकामो यजेत'' इति फलं प्रति यागस्यैव विधानेन तत्समूहस्याशाब्दत्वात्, यागानां चान्योन्यं भिन्नत्वात्, परस्परनिरपेक्षा एव यागाः स्वस्वाङ्गसमन्विताः संहत्य स्वस्वापूर्वद्वारा फलं जनयन्तीति यस्मिन्नहन्यपच्छेदस्तस्यैवावृत्तिर्न गणस्येति ।

तदाह सूत्रकारः, अहर्गण इत्यादि । व्यक्तः सूत्रार्थः । दक्षिणादानन्तु नास्त्येव । पूर्वदिने दित्सितस्याभावात् । द्वादशाहदक्षिणातन्त्रत्वेन सैव पूर्वदिने दित्सितेति सैव देयेत्याहुः।

इत्येकविंशमहर्गणेऽपच्छेदे सर्वावृत्तिनिराकरणाधिकरणम्

इति श्रीभाट्टसंग्रहे सर्वतन्त्रस्वतन्त्रश्रीसुधीन्द्रतीर्थगुरुपादशिष्य
श्रीराघवेन्द्रतीर्थयतिसार्वभौमकृते षष्ठाध्यायस्य पञ्चमः पादः

अस्मिन् पादे	अधिकरणानि	२१	सूत्राणि	५६
आदितः	अधिकरणानि	४४२	सूत्राणि	११७१

अथ षष्ठाध्यायस्य षष्ठः पादः

अथ प्रथमं सत्रे समानकल्पानां सहाधिकाराधिकरणम् (सूत्राणि १-११)

सन्निपातेऽवैगुण्यात्प्रकृतिवत्तुल्यकल्पा यजेरन् ॥ १ ॥

वचनाद्वा शिरोवत्स्यात् ॥ २ ॥ न वाऽनारभ्यवादत्वात् ॥ ३ ॥ स्याद्वा यज्ञार्थत्वादौदुम्बरीवत् ॥ ४ ॥ न तत्प्रधानत्वात् ॥ ५ ॥ औदुम्बर्याः परार्थत्वात्कपालवत् ॥ ६ ॥ अन्येनापीति चेत् ॥ ७ ॥ नैकत्वात्तस्य चानधिकाराच्छब्दस्य चाविभक्तत्वात् ॥ ८ ॥ संनिपातात्तु निमित्तविघातः स्याद्बृहद्रथन्तरवद्विभक्तशिष्टत्वाद्वसिष्ठनिर्वर्त्ये ॥ ९ ॥ अपि वा कृत्स्नसंयोगादविघातः प्रतीयते स्वामित्वेनाभिसम्बन्धात् ॥ १० ॥ साम्नोः कर्मवृद्ध्यैकदेशेन संयोगे गुणत्वेनाभिसम्बन्धस्तस्मात्तत्र विघातः स्यात् ॥ ११ ॥

ॐ पूर्वत्र प्रायश्चित्ताधिकारश्चिन्तितः। अत्र पादे सत्राधिकारश्चिन्त्यत इति पादभेदः। पूर्वाधिकरणेऽहर्गणप्रसङ्गादहर्गणयुतसत्रादेर्बुद्धिस्थत्वात्पूर्वानन्तर्यञ्चास्य ज्ञेयम्।

दर्शपूर्णमासयोः ''राजन्यवसिष्ठादीनां नाराशंसो द्वितीयः प्रयाजः। तनूनपादन्येषां'' इति पुरुषभेदेन प्रयाजेषु कल्पभेदः श्रुतः। स दीक्षणीयादीष्टिष्वतिदिष्टः ''सप्तदशावराः सत्रमासीरन्'' इत्यनेककर्तृकतया श्रुतसत्राङ्गभूतदीक्षणीयादिषु चोदकतः प्राप्तः। तत्र किं भिन्नकल्पा अपि मिलित्वा सत्राङ्गदीक्षणीयादि कुर्युरुत तुल्यकल्पा एवेति **सन्देहः**।

पूर्वपक्षस्तु, प्राकरणिकक्रत्वङ्गनाराशंसोद्देशेन वसिष्ठशुनककण्वकश्यपसंकृतिगोत्रजा वसिष्ठादिशब्दोक्तास्तदङ्गत्वेन विधीयन्ते। न तु वसिष्ठाद्युद्देशेन तदङ्गतया नाराशंसविधानम्। तथात्वे पृथक्फलकल्पनाप्रकरणबाधयोरापत्तेः। तथा च वसिष्ठावसिष्ठैः क्रियमाणमपि कर्म वसिष्ठसम्बन्धायेवेति वसिष्ठादीनां नाराशंस इति व्यपदेशो न विरुद्ध्यते। पूर्वत्र द्वितीयपादीयाद्यनयोक्तदिशा कर्तृत्वस्याव्यासक्ततया प्रत्येकमेव कर्तृत्वात्। अतो ये नाराशंसप्रयाजवन्तः ये च तनूनपात्प्रयाजवन्तः वसिष्ठादितदन्यरूपाः भिन्नकल्पा अप्यधिकारिणः सत्रेष्विति।

सिद्धान्तस्तु ''नाराशंसो द्वितीयः प्रयाजः'' इत्यस्य ''द्वितीयतया नाराशंसेन जुहुयात्'' इत्यर्थः। तत्र राजन्यवसिष्ठादीन् यजमानानुद्दिश्य नाराशंसहोमविधौ सति सन्निकृष्टधात्वर्थविधिः। तदुद्देशेन वसिष्ठादिविधौ परपदार्थो विप्रकृष्टो विधेयः स्यात्। अतो वसिष्ठाद्युद्देशेन तदङ्गतया नाराशंसविधिः । न चैवं फलकल्पनाप्रकरणबाधयोः प्रसङ्गः । तदीयक्रतूपकारद्वारेण तादर्थ्ये सत्युक्तदोषाप्रसङ्गात् । तस्मान्नाराशंसाद्यनुष्ठाने वसिष्ठादीनां क्रतुसाद्गुण्यम् । नान्येषाम् । तनूनपादनुष्ठानेऽन्येषां क्रतुसाद्गुण्यम्। न वसिष्ठादीनामित्यतः सर्वसाद्गुण्याय तुल्यकल्पानामेव सत्रेष्वधिकार इति।

तदाह सूत्रे, बहूनां यजमानानां सन्निपाते तुल्यकल्पा एव संहत्य यजेरन् । तथात्व एव हि प्रकृतिवदवैगुण्यात्फलं भवतीति । फलं व्यक्तम् ।

इति प्रथमं सत्रे समानकल्पानां सहाधिकाराधिकरणम् (सूत्राणि १-११)

अथ द्वितीयं भिन्नकल्पयोरपि राजपुरोहितयोः कुलाययज्ञे सहाधिकाराधिकरणम् (सूत्राणि १२-१५)

वचनात्तु द्विसंयोगस्तस्मादेकस्य पाणिवत् ॥ १२ ॥

(अर्थाभावात्तु नैवं स्यात् ॥ १३ ॥ अर्थानाश्च विभक्तत्वान्न तच्छ्रुतेन सम्बन्धः ॥ १४ ॥ पाणेः प्रत्यङ्गभावादसम्बन्धः प्रतीयेत ॥ १५ ॥)

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः । कुलाययज्ञं प्रकृत्य श्रूयते ''एतेन राजपुरोहितौ सायुज्यकामौ यजेयातां'' इति । तत्र चतुर्था सन्देहः, ''राजपुरोहितश्च राजपुरोहितश्च राजपुरोहितौ'' इति विग्रहेण राजद्वयसम्बन्धिनोः पुरोहितयोरधिकार इति, किं वा ''राज्ञः पुरौहितौ राजपुरोहितौ'' इति विग्रहेण राजसम्बन्धिनोः पुरोहितयोरधिकार इति, यद्वा कर्मधारयेण राजात्मकपुरोहितयोरिति, अथ वा राजा च पुरोहितश्चेति द्वन्द्वेन राज्ञः पुरोहितस्य चाधिकार इति।

पूर्वपक्षस्तु राज्ञः पुरोहितस्य च भिन्नकल्पत्वाद्भिन्नकल्पयोश्च पूर्वन्यायेनानधिकाराद्द्वन्द्वो न युक्तः। किन्तु कल्पत्वाय समुदायद्वन्द्वैकशेषेण राजद्वयसम्बन्धिनः पुरोहितद्वयस्याधिकार इत्येकः पक्षः।

राज्ञोः पुरोहितावित्युक्त्यपेक्षया राज्ञः पुरोहितावित्युक्तेर्लाघवादेकराजसम्बन्धिनोस्तुल्य-कल्पयोः पुरोहितयोरधिकार इति **द्वितीयः पक्षः**।

तदाह **सूत्रे**, ''राजपुरोहितौ यजेयाताम्'' इति **वचनादेकस्यापि राज्ञः पुरोहित-द्विकसंयोगः। तस्मात्पाणिवत्** ''दक्षिणाचारेण कर्तव्यम्'' इति वचनेन पर्युदस्तस्यापि सव्यस्य पाणेः ''अञ्जलिना जुहोति'' इति वचनेन होमे प्राप्तिस्तथा पुरोहितद्वयस्य वचनात्प्राप्ति-रिति। नैवं युक्तम्। पूर्वपक्षद्वये षष्ठीतत्पुरुषपक्षे च राजसम्बन्धिनि राजपदस्य लक्षणाप्रसङ्गात् पुरोहितस्य राजाव्यभिचारेण राजविशेषणवैयर्थ्यात्। द्वितीयपक्षे ''पुरोहितं वृणीते'' इत्युपादेयपुरोहितगतैकत्वस्य विवक्षितत्वेनैकस्य राज्ञः पुरोहितद्वयासम्भवाच्च। कर्मधारयाश्रयणे राजात्मकयोः पुरोहितयोः कुलाययज्ञेऽधिकार इत्युक्तावुक्तदोषस्य कस्याप्यभावादिति।

सिद्धान्तस्तु, ब्राह्मणस्यैव पुरोहितत्वेन वरितव्यत्वश्रवणेन राज्ञः पुरोहितत्वा-सम्भवाद्द्वन्द्वाश्रयेण राज्ञः पुरोहितस्य चेति द्वयोर्विभिन्नकल्पयोरपि वचनबलादधिकार इति।

फलन्तु व्यक्तम्।

इति भिन्नकल्पयोरपि राजपुरोहितयोः कुलाययज्ञेऽधिकाराधिकरणम् (सूत्राणि १२-१५)

अथ तृतीयं सत्रे ब्राह्मणमात्रस्याधिकाराधिकरणम् (सूत्राणि १६-२३)

सत्राणि सर्ववर्णानामविशेषात्॥ १६॥

(लिङ्गदर्शनाच्च॥ १७॥ ब्राह्मणानां वेतरयोरार्त्विज्याभावात्॥ १८॥ वचनादिति चेत्॥ १९॥ न स्वामित्वं हि विधीयते॥ २०॥ गार्हपते वा स्यातामविप्रतिषेधात्॥ २१॥ न वा

कल्पविरोधात् ॥ २२ ॥ स्वामित्वादितरेषामहीने लिङ्गदर्शनम् ॥ २३ ॥

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः । ''ऋद्धिकामाः सत्रमासीरन्'' इति श्रुतसत्रे वर्णत्रयस्याप्यधिकारः, उत ब्राह्मणानामेवेति **सन्देहे**, ऋद्धिकामवाक्ये विशेषाश्रवणात्पूर्वत्रेव भिन्नकल्पस्यापि वर्णत्रयस्य सत्राधिकारः । एवञ्च ''ये यजमाना'' इति त्रैवर्णिकानेव सत्राधिकारितया प्राप्तानुद्दिश्य तेषामेव संस्कारतयाऽऽर्त्विज्यविधानमिति त्रैवर्णिका एव ऋत्विजोपीति **प्राप्तम्** । तदाह, ऋद्धिकामवाक्ये विप्रा इति **विशेषाश्रवणात्सर्ववर्णानां** त्रैवर्णिकानां **सत्राणि** स्युरिति ।

सिद्धान्तस्तु, यजमानोद्देशेनार्विज्यविधौ त्रैवर्णिकानामप्यार्त्विज्यप्राप्त्या प्राकृतकार्यमप्यार्त्विज्यं प्रसज्यत इति यच्छब्दव्यत्यासेन ''ये ऋत्विजस्ते यजमानाः'' इत्यार्त्विज्योद्देशेन यजमानविधिरित्युपेयम् । प्रकृतौ **प्रभुत्वादार्त्विज्यं सर्ववर्णानामिति** द्वादशान्ते वक्ष्यमाणदिशा ब्राह्मणानामेवाऽऽर्त्विज्यं दृष्टं भिन्नकर्तृकत्वञ्च दृष्टमिति प्रकृतितश्चोदकेन सत्रेष्वपि विप्रकतृकत्वं यजमानभिन्नकर्तृकत्वञ्च **प्राप्तम्** । तत्र भिन्नकर्तृकत्वस्य ''ये यजमानाः'' इति वचनेन बाधेपि विप्रकर्तृकताया न बाधोस्तीति ''ऋद्धिकामाः'' इति पदस्य विप्रेष्वपि सम्भवात्प्रकृतितः प्राप्तं ब्राह्मणकर्तृकत्वं वाचनिकं यजमानकर्तृकत्वञ्च द्वयं सम्पादयितुं ब्राह्मणानामेव सत्रेऽधिकार इति । तदाह **सूत्रे, ब्राह्मणानां वेतरयोरार्त्विज्याभावादिति । इतरयोः** राजवैश्ययोः । **फलं** व्यक्तम् ।

इति तृतीयं सत्रे ब्राह्मणमात्रस्याधिकाराधिकरणम् (सूत्राणि १६-२३)

अथ चतुर्थं सत्रे विश्वामित्रतत्समकल्पानामेवाधिकरणम् (सूत्राणि २४-२६)

वासिष्ठानां वा ब्रह्मत्वस्य नियमात् ॥ २४ ॥

(सर्वेषां वा प्रतिप्रसवात् ॥ २५ ॥ विश्वामित्रस्य हौत्रनियमाद्भृगुशुनकवसिष्ठानामनधिकारः ॥ २६ ॥

सत्रे विप्राणामेवाधिकार इति सामान्यतः स्थितावत्र विशेषचिन्तनात्सङ्गतिः। ''ऋद्धिकामाः'' इति वाक्योक्तेऽनेककर्तृके सत्रे विप्राणां सर्वेषामधिकारः, उत वासिष्ठानां तत्समकल्पानाञ्च, किं वा वैश्वामित्राणां तत्समकल्पानाञ्चेति त्रेधा **सन्देहः**।

पूर्वपक्षस्तु, सर्वेषां ऋद्धिकामत्वाविशेषात्सर्वविप्राणामित्येकः। ''वासिष्ठो ब्रह्मा भवति'' इति वचनाद्ब्रह्मत्वस्यावैगुण्याय वासिष्ठेऽवश्यम्भाविनि तत्तुल्यकल्पानामधिकार इति द्वितीयः। तदाह, **वासिष्ठानामेव** सत्राणि ''वासिष्ठो ब्रह्मा'' इति ब्रह्मत्वस्य **नियमादिति**।

सिद्धान्तस्तु, ''वासिष्ठो ब्रह्मा'' इति वाक्यं न वासिष्ठस्य ब्रह्मत्वापादकम्। ''रश्मिरसि क्षयाय त्वा'' इत्यादिमन्त्रान् स्तोमभागशब्दितानधीयानस्यावासिष्ठस्यापि ''य एव कश्चित्स्तोमभागानधीते स एव वासिष्ठः'' इति स्तोमभागप्रशंसापरार्थवादवाक्ये ''वासिष्ठो ब्रह्मा'' इति ब्रह्मत्वानुज्ञानान्नावश्यम्भावी वासिष्ठः। किन्तु ''वैश्वामित्रो होता'' इति वचनाद्धोतृत्वार्थं वैश्वामित्रेऽवश्यंभाविनि भिन्नकल्पानां नाधिकार इत्याद्यनयेऽभिधानाद्वैश्वामित्रस्य तत्समानकल्पानाञ्च सत्रेऽधिकार इति।

इति चतुर्थं सत्रे विश्वामित्रतत्समानकल्पानमेवाधिकाराधिकरणम् (सूत्राणि २४-२६)

अथ पञ्चमं सत्रे आहिताग्नेरेवाधिकाराधिकरणम् (सूत्राणि २७-३२)

विहारस्य प्रभुत्वादननग्नीनामपि स्यात्॥ २७॥

(सारस्वते च दर्शनात्॥ २८॥ प्रायश्चित्तविधानाच्च॥ २९॥ साग्नीनां वेष्टिपूर्वत्वात्॥ ३०॥ स्वार्थेन च प्रयुक्तत्वात्॥ ३१॥ सन्निवापश्च दर्शयति॥ ३२॥

पूर्ववैषम्येणात्र शङ्कनात्सङ्गतिः। सत्रे किमाहिताग्नीनामेवाधिकारः, किं वा अनाहिताग्नीनामपीति **सन्देहे,** आहिताग्नीनां होमार्थत्वात्परकीयाग्निषु कृतमपि कर्म फलदं स्यादिति, पूर्वत्र भिन्नकल्पानामनिधिकारेऽपीहानाहिताग्नीनामापि येन केनचिदाहिताग्निना संहतानामधिकारः सत्रे स्यादिति प्राप्तम्। तदाह **सूत्रे, विहारस्याग्नेः** परान्प्रत्युपकर्तुं **प्रभुत्वादनग्नीनामपि** सत्रं स्यादिति।

सिद्धान्तस्तु, वचनादिष्टिपूर्वत्वमिति पञ्चमान्त्यपादीयनयोक्तदिशा दर्शपूर्णमासेष्टिपूर्वकत्वं सोमाङ्गमिति सोमविकारसत्रस्यापीष्टिपूर्वकत्वनियमादिष्टौ चाऽहिताग्नीनामेवाधिकारः। **किञ्च** ''आदधीत'' इत्यात्मनेपदादाधातुरेवाधानफलेन भाव्यम्। अग्नीनां कर्मयोग्यतैवाधानफलम्। अतोऽन्येन साधिताग्नयो नान्यस्य कर्म साधयन्तीत्यनग्नीनां सत्रे नाधिकार इति।

इति पञ्चमं सत्रे आहिताग्नेरेवाधिकरणम् (सूत्राणि २७-३२)

अथ षष्ठं सत्रे जुह्वादीनां साधारण्याधिकरणम् (सूत्राणि ३३-३५)

जुह्वादीनामप्रयुक्तत्वाद्यथाकाम्यं प्रतीयेत॥ ३३॥

(अपि वाऽन्यानि पात्राणि साधारणानि कुर्वीरन्। विप्रतिषेधाच्छास्त्रकृतत्वात्॥ ३४॥ प्रायश्चित्तमापदि स्यात्॥ ३५॥)

अत्रापि पूर्ववैषम्येण शङ्कनात्सङ्गतिः। यस्य कस्यचिज्जुह्वादिपात्रैः सत्रं प्रयोज्य, उतान्यानि साधारणानि सम्पाद्यानीति **सन्देहे**, पूर्वत्रेवात्राऽत्मनेपदविरोधाभावाद्यस्य कस्यचिज्जुह्वादिपात्रैः प्रयोज्यमिति **प्राप्तम्**। तदाह, **जुह्वादीना**मात्मनेपदेनाग्नीनामिव स्वार्थमेवा**प्रयुक्तत्वा**द्यस्य कस्यचित्पात्रै**र्यथाकाम्यं प्रतीयेत** प्रयुञ्जीतेति।

सिद्धान्तस्तु, पूर्वत्रेवात्रोपसङ्ग्रहविरोधाभावेपि दाहासादनविरोधस्तु स्यात्। ''आहिताग्निमग्निभिर्दहति यज्ञपात्रैश्च'' इति, तथा ''दक्षिणे हस्ते जुहूमासादयति'' इत्यादिवचनैः पात्राणां दाहे गुणभावस्याऽसाधनरूपप्रतिपत्तेश्च श्रवणेन सत्रमध्ये कस्यचिन्मृतौ तेन सह पात्राणामदाहे तदीयपात्राणां प्रतिपत्तिसंस्कारो हीयेत। दाहे च क्रतुप्रयोगो विगुणः स्यात्। अतः साधारणान्युत्पाद्यानीति।

इति षष्ठं सत्रे जुह्वादीनां साधारण्याधिकरणम् (सूत्राणि ३३-३५)

अथ सप्तमं विकृतसप्तदशसामिधेनीषु वर्णत्रयादिकाराधिकरणम् (सूत्राणि ३६-३९)

पुरुषकल्पेन वा विकृतौ कर्तृनियमः स्याद्यज्ञस्य तद्गुणत्वात्तदभावादितरान् प्रत्येकस्मिन् विधिकात्स्न्यार्दधिकारः स्यात् ॥ ३६ ॥

(लिङ्गाच्चेज्याविशेषवत् ॥ ३७ ॥ न वा संयोगपृथक्त्वाद्गुणस्येज्याप्रधानत्वादसंयुक्ता हि चोदना ॥ ३८ ॥ इज्यायां तद्गुणत्वाद्विशेषेण नियनम्येत ॥ ३९ ॥)

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः । अध्वरकल्पादीष्टिषु दर्शपूर्णमासविकृतिषु ''सप्तदश सामिधेनीरनुब्रूयात्'' इति श्रूयते । तत्र किं वैश्यस्यैवाधिकारः, अथ त्रयाणामपीति सन्देहः ।

पूर्वपक्षस्तु, प्रकृतौ हि ''पञ्चदश सामिधेनीरनुब्रूयात्सप्तदश वैश्यस्य'' इति वाक्येनाध्वरकल्पादौ विहितसाप्तदश्यानुवादेनायं वैश्यः कर्ताऽङ्गत्वेन विधीयते । तथा च पूर्वत्र यथाऽऽर्त्विज्यानुरोधेन विप्राणामेवाधिकारस्तथाऽत्राध्वरकल्पादेः साप्तदश्याङ्गकत्वात्साप्तदश्यस्य च वैश्यकर्तृकत्वादध्वरकल्पाङ्गसाप्तदश्यानुरोधेन तत्कर्तृतया तदङ्गभूतवैश्यस्यापि तत्र निवेश इत्यध्वरकल्पादिषु वैश्यस्यैवाधिकार इति । तदाह सूत्रे, **विकृतावध्वरकल्पादौ पुरुषकल्पेन** ''सप्तदश वैश्यस्य'' इत्यादिना **कर्तृनियमः स्यात्** । कुतः ? **यज्ञस्याध्वरकल्पादेः तद्गुणत्वात्** साप्तदश्यगुणकत्वात् । **इतरान्** ब्राह्मणान् प्रति **तदभावात्** साप्तदश्यस्याभावादविहितत्वात् । **एतस्मिन्** वैश्ये **विधिकात्स्न्यार्त्** विकृतिविधेः साकल्यात्''सप्तदशो वैश्यः'' इति **लिङ्गाच्च**, वैश्यस्तोमरूपे**ज्याविशेष इवा**ध्वरकल्पादावपि वैश्यस्यैवाधिकार इति ।

सिद्धान्तस्तु, अध्वरकल्पादौ विहितसाप्तदश्यानुवादेन वैश्यविधित्वेऽस्य वाक्यस्य दर्शपूर्णमासप्रकरणादुत्कर्षः स्यात् । स चायुक्तः । अतो वैश्यानुवादेन साप्तदश्यविधिरुपेयः । तच्च साप्तदश्यं नैमित्तिकत्वान्नित्यप्राप्तपाञ्चदश्यबाधेन वैश्यकर्तृकप्रकृतियाग एव निविशते । विकृतिगतवचनेन तु साप्तदश्यं क्रत्वङ्गत्वेनैव विधीयते इत्यनैमित्तिकित्वात् त्रयाणामपि साधारणमित्यध्वरकल्पादौ त्रयाणामधिकार इति ।

फलं व्यक्तम् ।

इति सप्तमं विकृतसप्तदशसामिधेनीषु वर्णत्रयाधिकाराधिकरणम् (सूत्राणि ३६-३९)

इति श्रीभाट्टसंग्रहे सर्वतन्त्रस्वतन्त्रश्रीसुधीन्द्रतीर्थगुरुपादशिष्य
श्रीराघवेन्द्रतीर्थयतिसार्वभौमकृते षष्ठाध्यायस्य षष्ठः पादः

अस्मिन् पादे	अधिकरणानि	७	सूत्राणि	३९
आदितः	अधिकरणानि	४४९	सूत्राणि	१२१०

अथ पष्ठाध्यायस्य सप्तमः पादः

अथ प्रथमं विश्वजिति पित्रादीनामदेयत्वाधिकरणम् (सूत्रे १-२)

एवं पूर्वत्र सविस्तरमधिकारे निरूपितेऽत्र पादे तदपवादचिन्ता क्रियत इति पादन्तरता पूर्वानन्तर्यश्चास्य ध्येयम्।

स्वदाने सर्वमविशेषात् ॥ १ ॥

(यस्य वा प्रभुः स्यादितरस्याशक्यत्वात् ॥ २ ॥)

इदं श्रूयते ''विश्वजिति सर्वस्वं ददाति'' इति। तत्र स्वशब्दस्यात्मात्मीयज्ञातिधनवाचितया तस्य सर्वस्य दानमिति वा धनस्यैवेति वा सन्देहे,

आत्मनि स्वक्रियाविरोधेन आत्मदानायोगेप्यात्मीयादीनां पित्रादीनां स्वशब्दार्थत्वाविशेषात्परविधेयत्वकरणसम्भवाच्च परस्वत्वापादनरूपं दानं सर्वेषां स्वशब्दवाच्यानामिति प्राप्तम्।

तदाह सूत्रे, **स्वदाने** स्वशब्दवाच्यस्य दाने चोदिते ज्ञात्यादिकं **सर्वमपि** देयम्। स्वशब्दवाच्यत्वा**विशेषात्** इति।

सिद्धान्तस्तु, स्वत्वत्यागपूर्वं परस्वत्वापादनं हि दानम्। न हि दीयमाने पित्रादौ स्वकीयपितृत्वत्यागः परकीयपितृत्वापादनं वा युज्यते। अतो यत्र यथेष्टविनियोगार्हत्वेन स्वशब्दो वर्तते तदेव दातुं शक्यम्। तत्र स्वत्वत्यागपरस्वत्वापादनयोः सम्भवाद्धनस्यैव दानम्। नान्यस्येति।

इति प्रथमं विश्वजिति पित्रादीनामदेयत्वाधिकरणम् (१-२)

अथ द्वितीयं विश्वजिति पृथिव्या अदेयत्वाधिकरणम्

न भूमिः स्यात्सर्वान् प्रत्यविशिष्टत्वात् ॥ ३ ॥

पूर्ववैषम्येणात्र शङ्कनात्सङ्गतिः । यदा सार्वभौमो राजा विश्वजिति सर्वस्वं ददाति तदा किं सर्वापि पृथिवी देयोत नेति **सन्देहे**, पित्रादौ स्वामित्वाभावेन तस्यादानेपि सार्वभौमस्य सर्वभूमिस्वामित्वसम्भवात्सर्वापि पृथ्वी राज्ञा देयेति **प्राप्ते**,

सिद्धान्तः, दुष्टशिक्षा शिष्टरक्षा कण्टकोद्धरणं कर्षकादिदत्तकरादानमित्येतावतैव राज्ञः स्वामित्वम् । अतो न भूमिस्तस्य धनम् । किन्तु तस्यां भूमौ स्वकर्मफलं भुञ्जानानां सर्वप्राणिनां साधारणं धनम् । अतो न सार्वभौमो भूमिं दद्यात् । मण्डलेशश्च न मण्डलमिति । खण्डभूदानन्त्वनुमतमिति वदन्ति । तदाह, **न भूमिर्देया स्यात्** । **तस्याः सर्वान्प्रत्यविशिष्टत्वादिति** ।

इति द्वितीयं विश्वजिति पृथिव्या अदेयत्वाधिकरणम्

अथ तृतीयं विश्वजित्यश्वादीनामदेयताधिकरणम्

अकार्यत्वाच्च ततः पुनर्विशेषः स्यात् ॥ ४ ॥

अत्रापि पूर्ववैषम्येण शङ्कनात्सङ्गतिः । विश्वजित्येव ''न केसरिणो ददाति'' इति श्रूयते । केसराः सटास्तद्वन्तोऽश्वप्रभृतयः । किन्ते विश्वजिति देया वेति विकल्पः, किं वा न देया एवेति **सन्देहे**, पूर्वत्र महाभूमेरदानेपीह ''सर्वस्वं ददाति'' इति सामान्यतः सर्वस्वदानवचनेन केसरिदानस्यापि प्राप्तेः, न ददातीति निषेधश्रवणाच्च विहितप्रतिषेधबलाद्विकल्प इति **प्राप्ते**,

सिद्धान्तः, विकल्पस्याष्टदोषदुष्टत्वात्पर्युदासाश्रयणेनैकवाक्यत्वे सम्भवति नञः प्रतिषेधार्थत्वोपगमेन वाक्यभेदाश्रयणायोगाच्च दशमान्त्यपादे ''यजतिषु येयजामहं करोति । नानूयाजेषु'' इत्यादावनुयाजभिन्नेषु यजतिष्विति वक्ष्यमाणदिशा अत्रापि ''केसरिभिन्न सर्वस्वं ददाति'' इति नञः पर्युदासत्वोपपत्तेर्न देयाः केसरिण इति । तदाह **सूत्रे**, **अकार्यत्वात्** ''न केसरिणो ददाति'' इत्यकर्तव्यतयाऽभिदानादश्वदानस्य **ततः** इतरधनतो **विशेषः स्यादिति** । दशमोक्तस्यायं प्रपञ्च इति ततोस्यागतत्वमाहुः ।

इति तृतीयं विश्वजित्यश्वादीनामदेयताधिकरणम्

अथ चतुर्थं विश्वजिति विद्यमानानामेव सर्वस्वानां दानाधिकरणम्

नित्यत्वाच्चानित्यैर्नास्ति सम्बन्धः ॥ ५ ॥

अत्रापि पूर्ववैषम्येण शङ्कनात्सङ्गतिः । पूर्वोक्तसर्वस्वदान एव चिन्ता । किं पुरुषस्य यद्यदुपभोग्यं शाय्यासनभवनादि तत्सर्वं स्वस्याविद्यमानमपि सम्पाद्य देयमुत यद्यदस्ति तन्मात्रमेव देयमिति सन्देहे, पुरुषोपभोग्यस्य सर्वस्यापि सर्वस्वशब्दार्थतया तत्सर्वदानस्य ''सर्वस्वं दद्यात्'' इति शास्त्रर्थत्वादश्वदानस्येवापर्युदस्तत्वात्स्वस्याभावेपि तत्तेन सम्पाद्य देयमिति प्राप्ते, ''यत्सर्वस्वं तद्दद्यात्'' इति वचनार्थत्वेऽपि परकीयस्य दानासम्भवाद्यदात्मीयं सर्वस्वमिति वाच्यम् । तथा च सिद्धेनात्मीयेनोपपन्नो दानविधिर्नाविद्यमानमार्जयितुं शक्नोतीति विद्यमानस्यैव सर्वस्वस्य दानमिति सिद्धान्तः ।

तदाह सूत्रे, सर्वस्वदानविधेर्नित्यत्वात्कदाचिद्याश्चादिभिरप्यलभ्यमानैः शय्यासनभवनादिभिरनित्यैर्नास्ति सम्बन्ध इति । फलन्तु विद्यमानस्यैव दानम् ।

इति चतुर्थं विश्वजिति विद्यमानानामेव सर्वस्वानां दानाधिकरणम्

अथपञ्चमं विश्वजिति धर्मार्थसेवकशूद्रस्यादेयताधिकरणम्

शूद्रश्च धर्मशास्तृत्वात् ॥ ६ ॥

पूर्ववैषम्येण शङ्नकात्सङ्गतिः । यस्तु शूद्रो विहितं स्वधर्मं विज्ञातुं यजमानं सेवते स किं देयो न वेति सन्देहे,

पूर्वत्राविद्यमानस्यादानेऽपि शूद्रस्य विद्यमानसर्वस्वमध्यपतितत्वाद्दासवत्परविधेयत्व-करणसम्भवाच्च स देय इति प्राप्ते,

जीविकाद्यदानेन तस्मिन् स्वत्वाभावात्स्वेच्छाचारित्वेन परविधेयत्वकरणासम्भवाच्च न

देय इति सिद्धान्तः । तदाह, धर्मशिक्षार्थमुपगतः शूद्रश्च न देयः । तं प्रति यजमानस्य धर्मशास्तृत्वात् धर्मोपदेशकत्वात्स्वामित्वाभावादिति ।

इति पञ्चमं विश्वजिति धर्मार्थसेवकशूद्रस्यादेयताधिकरणम्

अथ षष्ठं विश्वजिति दक्षिणाकाले विद्यमानानामेव सर्वस्वानां देयताधिकरणम्

दक्षिणाकाले यत्स्वं तत्प्रतीयेत तद्दानसंयोगात् ॥ ७ ॥

अत्रापि पूर्ववैषम्येण शङ्कनात्सङ्गतिः । ''विश्वजिद्यागो मया कार्यः'' इति निश्चयादूर्ध्वं दक्षिणाकालात्पूर्वं यत्स्वेन भोग्यत्वेन स्थितं तद्भूतम् । यच्च दक्षिणाकालादूर्ध्वं भोगार्हतया भविष्यत्त्वेन निर्णीतं तद्भावि । तदुभयविधमपि भूतभाविधनं भोगेऽनुपयुज्य देयं, उत यदेव दक्षिणाकाले स्थितं तद्देयमिति सन्देहे,

शूद्रस्यास्वत्वेनादेयत्वेऽपि भोगार्हस्य स्वत्वात् सर्वस्वमित्यत्रत्यसर्वशब्दानुग्रहाय भूतभाविनोरपि दानमिति प्राप्ते,

सिद्धान्तः, ''स्वं दद्यादिति यत्तत्सर्वम्'' इति स्वस्य दानमनूद्य सर्वत्वं विधीयते । दक्षिणाकालीनमेव च स्वं देयत्वेन प्राप्तम् । तत्कालीनधनसाकल्य एव सर्वशब्दोपपत्तेर्न भूतस्य दानम् । भाविनश्च तदानीमसत्त्वादसतश्च दानमशक्यमिति न भूतभाविनोर्दानम् । किन्तु दक्षिणाकालीनस्यैव सर्वस्वस्येति ।

तदाह सूत्रे, दक्षिणाकाले यत्स्वं तदेव सर्वं देयत्वेन प्रतीयेत । तस्यैव चोदकप्राप्तदानसंयोगादिति । फलं व्यक्तम् ।

इति षष्ठं विश्वजिति दक्षिणाकाले विद्यमानानामेव सर्वस्वानां देयताधिकरणम्

अथ सप्तमं विश्वजिति दक्षिणादानोत्तराङ्गनामनुष्ठानाधिकरणम् (सूत्राणि ८-१३)

अशेषत्वात्तदन्तः स्यात्कर्मणो द्रव्यसिद्धित्वात् ॥ ८ ॥

(अपि वा कर्मशेषः स्यात्क्रतोः प्रत्यक्षशिष्टत्वात् ॥ ९ ॥ तथा चान्यार्थदर्शनम् ॥ १० ॥ अशेषं तु समञ्जसादानेन शेषकर्म स्यात् ॥ ११ ॥ नादानस्य नित्यत्वात् ॥ १२ ॥ दीक्षासु तु विनिर्देशादक्रत्वर्थत्वेन संयोगस्तस्मादविरोधः स्यात् ॥ १३ ॥)

दक्षिणाकालीनसर्वस्वदाने सिद्धे, कर्मार्थेऽपि धने प्रसक्तं दानमाशंक्यात्र निरस्यत इति **सङ्गतिः** । प्रकृतौ कर्मारम्भ एव यजमानेनाऽत्मीयं धनं वचनबलात् त्रेधा व्यवस्थापितं इदं मे भुक्त्यर्थं, इदं कर्मार्थं, इदं दक्षिणार्थमिति । तत्र यद्दक्षिणार्थं तन्मध्ये द्वादशशतं दत्तम् । विकृतिभूतविश्वजिति तु त्रिविधमपि देयम् । कर्मशेषस्तु द्रव्याभावात्त्याज्यः, किं वा क्रतुशेषोपयुक्तमात्रमवशेष्यान्यत्सर्वं देयं, उत यद्दक्षिणार्थं निहितं तदेव सर्वं देयमिति त्रेधा **सन्देहः**।

पूर्वपक्षस्तु, त्रितयस्यापि सर्वस्वशब्देन ग्रहणात् त्रिविधमपि देयम् । न चैवं दक्षिणादानस्य मध्यन्दिनकालीनत्वात्तत ऊर्ध्वं तृतीयं सवनमरभ्योदवसानीयान्तः क्रतुशेषो द्रव्याभावाल्लुप्येतेति वाच्यम् । सर्वस्वदानपरप्रत्यक्षवचनविरोधाद्दुर्बलचोदकप्राप्तकर्मशेषस्य त्यागेप्यदोषादित्येकः ।

तदाह सूत्रकारः ''द्रव्यस्याशेषत्वात् शेषरहितत्वात्तदन्तं दक्षिणान्तमेव कर्म स्यात् । कुतः ? **कर्मणो द्रव्याधीनसिद्धित्वादिति** । चोदकप्राप्तोऽपि कर्मशेषः फलहेतुतया क्रतोः प्राधान्यात्प्रबलः । प्रत्यक्षवचनशिष्टमपि दक्षिणादानमङ्गत्वाद्दुर्बलम् । एवञ्च

दुर्बलस्य प्रमाणस्य बलवानाश्रयो यदा ।
तदापि विपरीतत्वं शिष्टाकोपे यथोदितम् ॥

इत्युक्तन्यायेन प्रधानक्रतुशेषार्थमवशेष्यान्यत्सर्वं देयमिति **द्वितीयः** । तदाह, **अपि वा कर्मशेषः स्याक्रतोः प्रत्यक्षशिष्टत्वादिति** ।

सिद्धान्तस्तु, त्रेधा विभक्तद्रव्यमध्ये यद्दक्षिणार्थं निर्दिष्टं द्रव्यं तद्दानमनूद्य सर्वता विधीयते

''स्वं ददातीति यत्तत्सर्वम्'' इति। विधिलाघवात्। अतः क्रत्वर्थस्यादेयत्वात्तेन क्रतुः समापनीय इति। **फलं** तु व्यक्तम्।

इति सप्तमं विश्वजिति दक्षिणादानोत्तराङ्गानामनुष्ठानाधिकरणम् (सूत्राणि ८-१३)

अथाष्टममहर्गणस्थेपि त्रिश्वजिति सर्वस्वदानाधिकरणम् (सूत्राणि १४-१७)

अहर्गणे च तद्धर्मः स्यात्सर्वेषामविशेषात् ॥ १४ ॥

(द्वादशशतं वा प्रकृतिवत् ॥ १५ ॥ अतद्गुणत्वात्तु नैवं स्यात् ॥ १६ ॥ लिङ्गदर्शनाच्च ॥ १७ ॥)

स्वतन्त्रैकाहविश्वजिति सर्वस्वदाने सति नामातिदेशस्थलेऽपि तत्साध्यत इति **सङ्गतिः**। एवं श्रूयते ''अथैतस्याष्टरात्रस्य विश्वजिदभिजितावेकाहावभितः, उभयतोज्योतिर्मध्ये षडहः, पशुकामो ह्येतेन यजेत'' इति।

अयमर्थः, आद्यन्तावहनी क्रमाद्विश्वजिदभिजिन्नामके। ज्योतिर्गौरायुरित्येतैस्त्रिभिर्नामभिवाच्यानां त्रयाणां यागानामारोहणावरोहणमुभयतोज्योतिर्मध्ये षडहो भवति। सोयं मध्ये प्रयोज्य इति। तत्राष्टरात्रनामकेऽहर्गणे विश्वजिन्नामकं यत्प्रथममहस्तत्र किं द्वादशशतं दक्षिणा, किं वा सर्वस्वमिति **सन्देहः**।

पूर्वपक्षस्तु, **गणेषु द्वादशाहस्ये**त्यष्टमाद्यपादे वक्ष्यमाणदिशाऽहर्गणस्य द्वादशाहविकृतित्वाद्द्वादशाहस्य च **अव्यक्तासु तु सोमस्ये**ति तत्पूर्वनयोक्तदिशा ज्योतिष्टोमविकृतित्वात्परम्परया द्वादशशतदक्षिणाऽष्टरात्रे प्राप्ता। ततः प्रथमस्याह्नोपि सैव दक्षिणेति।

सिद्धान्तस्तु, प्रथमदिने विश्वजिन्नामनिर्देशान्यथानुपपत्त्याऽन्यविश्वजिदङ्गानामिव दक्षिणारूपाङ्गस्यापि नामातिदेशेन सामान्यचोदकादपि प्रबलेन प्राप्तसर्वस्वदानमेव तत्रापीति। तदाह **सूत्रे**, **अहर्गणे च** विश्वजिति **तद्धर्मः** एकाहविश्वजिद्दक्षिणैव **स्यात्**। **सर्वेषां** तदीयाङ्गानां दक्षिणायाश्च **अविशेषात्**। नाम्नाऽङ्गान्तरमिव दक्षिणापि सैव स्यादिति। एतच्च भाष्यकारीयं मतम्।

वार्तिककारस्तु, विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात्सधर्मत्वम् इति द्वादशे द्वितीयपादे वक्ष्यमाणदिशा भूयोनुग्रहाय विश्वजिदन्येषु सप्तस्वहस्सु चोदकप्राप्तदक्षिणाया अबाधाय विश्वजिन्नामातिदेशप्राप्तसर्वस्वदक्षिणा प्रथमाहमात्रविषयिण्येव बाधनीयेति सर्वत्र द्वादशशतमेव दक्षिणा। न चाऽद्येहनि सर्वस्वदक्षिणा। अन्येषु सप्तसु द्वादशशतमित्यविरोध इति शंक्यम् । सर्वेषामेकप्रयोगवर्तिनामह्नामेकैव दक्षिणा । न पृथग्दक्षिणास्तीति द्वयोस्तत्र निर्देशायोगादन्यतरपरिग्रहेऽवश्यम्भविनि भूयोनुग्रहाय बहुदिनप्राप्तद्वादशशतदक्षिणैव सर्वार्थं ग्राह्येति सिद्धान्तितवान्।

इत्यष्टममहर्गणस्थेपि विश्वजिति सर्वस्वदानाधिकरणम् (सूत्राणि १४-१७)

अथ नवमं विश्वजिति द्वादशशतधनन्न्यूनधनस्यानधिकाराधिकरणम् (सूत्राणि १८-२०)

विकारः सन्नुभयतोऽविशेषात् ॥ १८ ॥

(अधिकं वा प्रतिप्रसवात् ॥ १९ ॥ अनुग्रहाच्च पादवत् ॥ २० ॥)

विश्वजिति सर्वस्वदानोक्तावत्र विशेषचिन्तनात्सङ्गतिः। द्वादशशतादूनशतस्याप्यस्ति विश्वजित्यधिकारः, किं वा ततोऽधिकधनस्यैवेति **सन्देहे,** प्रकृतितः प्राप्तद्वादशशतादधिकधन इव न्यूनधनेऽपि सर्वस्वशब्दप्रवृत्तिसम्भवात्ततो न्यूनाधिकधनवतोर्द्वयोरप्यधिकार इति **प्राप्तम्।** तदाह **सूत्रे, उभयतः** उभयथाप्यधिके न्यूने वा धने सर्वस्वविधे**रविशेषात्** न्यूनधनस्यापि विकारो ज्योतिष्टोमविकारो **विश्वजित्सन्** अविकल इति ।

सिद्धान्तस्तु, ज्योतिष्टोमे प्रकृतं द्वादशशतं विधाय पश्चादुक्तम् ''यद्येतावता नावमेयुपरि सर्वस्वेन'' इति। तत्राधिकस्यैव सर्वशब्दार्थत्वादिहापि तदेव चोदकप्राप्तमपि पाक्षिकत्वनिरासाय नियम्यत इति ऋत्विजां वशीकरणायाधिकधन एव सर्वस्वतेत्यधिकधनवत एवाधिकारो नान्यास्येति।

इति नवमं विश्वजिति द्वादशशतधनन्न्यूनधनस्यानधिकाराधिकरणम् (सूत्राणि १८-२०)

अथ दशममाधानेऽपरिमितं देयमित्यनेन संख्यान्तरविधानाधिकरणम् (सूत्रे २१-२२)

अपरिमाणशिष्टस्य संख्याप्रतिषेधस्तच्छुतित्वात् ॥ २१ ॥

(कल्पान्तरं वा तुल्यवत्प्रसङ्ख्यानात् ॥ २२ ॥)

उत्तरचिन्तोपोद्धातत्वेनेदमारभ्यते । आधाने श्रूयते ''एका देया ॥ द्वे देये । षड्देयाः । द्वादश देयाः । चतुर्विंशतिर्देयाः । शतं देयम्, सहस्रं देयम् । अपरिमितं देयम्'' इति । तत्रापरिमितशब्देन प्रागुक्तैकादिसख्याप्रतिषेधः क्रियते '' एकद्यादिसख्यापरिच्छिन्नं न देयम् '' इति, किं वा संख्यान्तरविधिरिति **सन्देहे,**

नञ उत्तरपदेनैवान्वयमुपेत्य परिमितं न भवति यत्तदपरिमितमित्याश्रयणे परिमाणशून्यं द्रव्यं देयमिति प्रतीतेस्तादृशद्रव्यस्य निःस्वरूपतया दानायोगादगत्या समर्थ समासेन नञो देयपदान्वयमुपेत्य प्रागुक्तैकद्व्यादिसङ्ख्यापरिमितं न देयमित्यर्थस्य वाच्यत्वात्प्रागुक्तसंख्याप्रतिषेध इत्युपेयम् । एवञ्च विहितप्रतिषिद्धत्वादेकादिगोव्यक्तिदानस्य विकल्प इति **प्राप्तम्** ।

तदाह **सूत्रे**, अपरिमाणे चोद्यमाने **शिष्टस्यैकादेः प्रतिषेधः** स्यात् । कुतः ? **तच्छुतित्वात्** नञः प्रतिषेधवाचित्वात् । परिमितशब्दस्य वा प्रकृतैकादिपरत्वादिति ।

सिद्धान्तस्तु, ''अपरिमितमस्य धनम्'' इत्यादौ बहुत्वयुक्ते धनेऽपरिमितशब्दस्य बहुलप्रयोगदर्शनेन रूढ्या बाहुल्यवाची सन्नयं शब्दः संख्यान्तरविशिष्टविधिपरः । योगाद्रूढेर्बलवत्ताया अत्रैवाद्युपादे स्थितत्वादिति ।

इति दशममाधानेऽपरिमितं देयमित्यनेन सङ्ख्यान्तरविधानाधिकरणम् (सूत्रे २१-२२)

अथैकादशमपरिमितशब्देन सहस्राधिकस्य ग्रहणाधिकरणम् (सूत्राणि २३-२५)

अनियमोऽविशेषात् ॥ २३ ॥

(अधिकं वा स्याद्बह्वर्थत्वादितरेषां सन्निधानात् ॥ २४ ॥ अर्थवादश्च तद्वत् ॥ २५ ॥)

अपरिमितशब्दस्य संख्यान्तरविशिष्टद्रव्यपरत्वसिद्धाविह सा संख्या केति विशेषचिन्तनात्सङ्गतिः। किं सहस्रसंख्याविशिष्टद्रव्यादधिकद्रव्यं ततो न्यूनसंख्याकद्रव्यं वा अपरिमितशब्दर्थ इत्यनियमः, उत ततोऽधिकसख्याकमेव तदर्थ इिति नियम इति **सन्देहे**, बहुत्वविशिष्टवाचिनोऽपरिमितशब्दस्य सहस्रादर्वागपि सत्त्वसम्भवेनानियम इति **प्राप्तम्**। तदाह, सहस्रादधिके न्यूने च बहुत्वस्याविशेषादनियम इति।

सिद्धान्तस्तु, एकादिपक्षेषूत्तरोत्तराभिवृद्धिदृष्टया अत्रापि सहस्रपक्षमुक्त्वा पश्चादुच्यमानं बहुत्वमापेक्षिकं सदनन्तरनिर्दिष्टसहस्रापेक्षया भवेदिति सहस्रापेक्षया अधिकपरोऽपरिमितशब्द इति।

इत्येकादशमपरिमितशब्देन सहस्राधिकस्य ग्रहणाधिकरणम् (सूत्राणि २३-२५)

अथ द्वादशम् ''इति ह स्म'' इत्यादिपरकृतिपुराकल्पानामर्थवादताधिकरणम् (सूत्राणि २६-३०)

परकृतिपुराकल्पञ्च मनुष्यधर्मः स्यादर्थाय ह्यनुकीर्तनम् ॥ २६ ॥

(तद्युक्ते च प्रतिषेधात् ॥ २७ ॥ निर्देशाद्वा तद्धर्मः स्यात्पञ्चावत्तवत् ॥ २८ ॥ विधौ तु वेदसंयोगादुपदेशः स्यात् ॥ २९ ॥ अर्थवादो वा विधिशेषत्वात्तस्मान्नित्यानुवादः स्यात् ॥ ३० ॥)

अधिकारापवादपरे पादे प्रसक्तदक्षिणादानाद्यङ्गापवादे समाप्तेऽत्र प्रधानाधिकारापवादश्चिन्त्यत इति **सङ्गतिः**। दर्शपूर्णमासयोः श्रूयते ''इति ह स्माह बट्कुवार्ष्णिर्माषानेव मह्यं पचत। न वा एतेषां हविर्गृह्णन्ति'' इति ''उल्मुकैर्ह स्म पूर्वे समाजग्मुः। तान् हासुरा रक्षांसि निजघ्नुः'' इत्येकानेककर्तृकचरितानुवादरूपं परकृतिपुराकल्पाख्यं वाक्यद्वयम्। तत्र माषपाकविधिः किं वृष्णिगोत्रजानामेव, उत सर्वमनुष्याणामिति।

सन्देहे, वार्ष्णिरित्युक्तत्वाद्वृष्णिगोत्रोत्पन्नानामेव माषपाकविधिरिति **प्राप्ते**,

अत्र वाक्ये माषपाकक्रियैव केवलं वार्ष्णिकर्तृकत्वेन स्तूयते। न तु वार्ष्णिकर्तृकत्वविशिष्टः पाको विधीयते। विशिष्टस्तावकस्यान्यस्याभावात्स्तुत्यस्य विधेयता कल्प्या। न स्तावकस्य वार्ष्णिकर्तृकत्वस्य। तस्माद्वृष्णिगोत्रजबटुकुनामकसम्बन्धस्य माषपाकस्तावकत्वेन तस्याविदेयत्वात्केवलमाषपाकस्यैव विधेयत्वात्सामान्यविधेः सर्वान् प्रत्यविशिष्टत्वात्सर्व-मनुष्यधर्मोयं माषपाक इति तत्र सर्वेषामधिकारः। एवं पुराकल्पेपि ध्येयम्।

तदाह सूत्रे, परकृतिपुराकल्पम्। द्वन्द्वैकवद्भावः। मनुष्यधर्मोपदेशको विधिस्स्यात्। कुतः ? तथा सति तदनुकीर्तनं अर्थाय प्रयोजनाय भवति। वादमात्रस्यानर्थकत्वादिति सिद्धान्तः।

एतौ पूर्वोत्तरपक्षौ कृत्वाचिन्तयोक्तौ। वस्तुतस्तु माषपाकादिराक्य-स्यौदुम्बराधिकरणन्यायेनार्थवादत्वेन विधित्वाभावात्। तदेतत्कृत्वाचिन्तनमुद्धाटितवान् सूत्रकारः, अर्थवादो वा विधिशेषत्वादिति। ''आरण्यमेवाश्नीयात्'' इत्यादिविधिशेषत्वाद्दर्शपूर्णमासयोरारण्याशनविधिस्तावकतयाऽर्थवाद इत्यर्थः।

इति द्वादशम् ''इति ह स्म'' इत्यादिपरकृतिपुराकल्पानामर्थवादताधिकरणम्

(सूत्राणि २६-३०)

अत त्रयोदशं सहस्रसंवत्सरशब्दस्य सहस्रदिनपरताधिकरणम् (सूत्राणि ३१-४०)

सहस्रसंवत्संर तदायुषामसम्भवान्मनुष्येषु ॥ ३१ ॥

(अपि वा तदधिकारान्मनुष्यधर्मः स्यात् ॥ ३२ ॥ नासामर्थ्यात् ॥ ३३ ॥ सम्बन्धादर्शनात् ॥ ३४ ॥ स कुलकल्पः स्यादिति कार्ष्णाजिनिरेकस्मिन्नसम्भवात् ॥ ३५ ॥ अपि वा कृत्स्नसंयोगादेकस्यैव प्रयोगः स्यात् ॥ ३६ ॥विप्रतिषेधात्तु गुण्यन्तरः स्यादिति लावुकायनः ॥ ३७ ॥ संवत्सरो विचालित्वात् ॥ ३८ ॥ सा प्रकृतिः स्यादधिकारात् ॥ ३९ ॥ अहानि वाऽभिसंख्यत्वात् ॥ ४० ॥)

पूर्ववैषम्येणात्र शङ्कनात्सङ्गतिः। इदं श्रूयते ''पञ्चपञ्चाशतस्त्रिवृतः संवत्सराः। पञ्चपञ्चाशतः पञ्चदशाः। पञ्चपञ्चाशतः सप्तदशाः। पञ्चपञ्चाशत एकविंशाः। विश्वसृजामयनं सहस्रसंवत्सरम्'' इति। किमस्मिन् विश्वसृजामयनाख्ये सत्रे गन्धर्वादीनामधिकारः , किं वा मनुष्याणामेव। यदा मानुषाणां तदा किं रसायनादिसिद्धसहस्रायुषाम्, उत कुलकल्पानां, किं वा सत्रिणां तावदायुष्यं, किं वा पञ्चाशदुत्तरद्विशतसख्याकपुंसामधिकारः, अत मासपरःसंवत्सरशब्दः, अथ वा द्वादशरात्रिपरः, किं वा दिनपर इत्यष्टधा **सन्देहः**।

पूर्वपक्षस्तु, माषपाके मनुष्याधिकारेपि न सत्रे। किन्तु गन्धर्वादीनामेव सहस्रायुष्ट्वसम्भवात्तेषामेवात्राधिकार **इत्येकः**। तदाह **सूत्रे, सहस्रसंवत्सर**मित्यादि। सत्रमिति शेषः। शिष्टं व्यक्तम्।

''ब्राह्मणोऽग्नीनादधीत'' इति विधानान्मनुष्याणामेवाऽहवनीयाद्यग्निसम्भवात्तेषामेव रसयनादिसम्पादितदीर्घायुष्काणामिति **द्वितीयः**।

रसायनादेरारोग्यपुष्ट्यादिहेतुत्वेनैतावदायुःसम्पादनाशक्तेरेकस्मिन् कुले जातानां पितृपुत्रपौत्रादीनां बहूनां सहस्रायुष्ट्वसम्भवात्कुलाधिकार इति **तृतीयः**।

शास्त्रफलं प्रयोक्तरीति न्यायेन कृत्स्नकर्तुरेव फलम्। न च पित्रादिष्वेकोपि कृत्स्नकर्तास्ति। अतो न कुलधर्मः। किन्तु सत्रविधिबलात्सत्रारम्भिणामेव तावदायुष्कत्वं कल्प्यमिति **चतुर्थः**।

सत्रान्तरेषु प्रवृत्तानां मध्ये केषाञ्चित्सत्रमध्य एव मृतिदर्शनेनाऽयुर्वृद्धिकल्पनायोगात् ''पञ्चपञ्चाशतः'' इत्यादिकं यजमानपरं नेयम्। एको हि त्रिवृत्स्तोमकयागयुक्तः संवत्सरः पञ्चपञ्चाशच्छब्दितैः पञ्चाशदुत्तरद्विशतसंख्याकैः प्रत्येकं कर्तृभूतैर्यजमानैः सम्बध्यामानः पञ्चपञ्चाशत्संख्यो भवति। तथा पञ्चदशसप्तदशैकविंशतिस्तोमका अप्येकैकसंवत्सराः पञ्चपञ्चाशत्पुरुषसम्बद्धाः, पञ्चपञ्चाशच्छब्दिता भवन्ति। एवञ्च त्रिवृदादिस्तोमचतुष्टययुक्तैः पञ्चपञ्चाशत्सङ्ख्याकैश्चतुर्गुणैरेकैकसंवत्सरं क्रियमाणैर्यागैर्युक्तं सहस्रसंवत्सरं सत्रमिदं भवतीति शतायुष्कमनुष्याणामेवाधिकार इति **पञ्चमः**।

अयं च पक्षो न युक्तः। ''चतुर्विंशतिपरमाः सत्रमासीरन्'' इति वचनविरुद्धत्वात्॥ ''यो मासः स संवत्सः'' इति वचनात्संवत्सरशब्दो मासपरः। सहस्रमासं सत्रमिति षष्ठः।

अयमपि पक्षो न युक्तः। ''अष्टमे वत्सर उपवीती, द्वादशवर्षाणि वेदमधीत्य, विंशतिवर्षो विवाहं कृत्वा, जातपुत्रोऽग्नीनादधीत'' इति वचनेन आधानादूर्ध्वं सहस्रमासजीवनायोगात्। ''संवत्सरस्य प्रतिमा वै द्वादश रात्रयः'' इति वचनात्संवत्सरशब्दोऽत्र द्वादशरात्रिपर इति सप्तमः।

सिद्धान्तस्तु, वचने संवत्सरशब्दः प्रतिमाविशेषणत्वेन न रात्रिविशेषणमिति न द्वादशरात्रिषु संवत्सरशब्द इति, द्वादशाहे त्रिवृत्पञ्चदशादिस्तोमयुक्ताहस्सु दृष्टप्रयोगत्वेन त्रिवृदादिशब्दस्वारस्याय संवत्सरशब्दोऽहःपरः। ''त्रिवृतः संवत्सराः'' इत्यादेस्त्रिवृत्स्तोमकयागयुक्ताहानीत्यादिरर्थो भवति। तस्माद्विश्वसृजामृषीणामिदं सत्रं सहस्रदिनं कार्यमिति।

इति त्रयोदशं सहस्रसंवत्सरशब्दस्य सहस्रदिनपरताधिकरणम् (सूत्राणि ३१-४०)

इति श्रीभाट्टसंग्रहे सर्वतन्त्रस्वतन्त्रश्रीसुधीन्द्रतीर्थगुरुपादशिष्य
श्रीराघवेन्द्रतीर्थयतिसार्वभौमकृते षष्ठाध्यायस्य सप्तमः पादः

अस्मिन् पादे	अधिकरणानि	१३	सूत्राणि	४०
आदितः	अधिकरणानि	४६२	सूत्राणि	१२५०

अथ षष्ठाध्यायस्याष्टमः पादः

अथ प्रथमं चतुर्होतृहोमेऽनाहिताग्नेरेवाधिकाराधिकरणम् (सूत्राणि १-१०)

ॐ, एवं पूर्वत्राभ्यर्हितश्रौतकर्माधिकारे सापवादेऽभिहिते क्रत्वङ्गकर्माधिकारोऽत्र पादे चिन्त्य इति पूर्वानन्तर्यं पादभेदश्चेति ज्ञेयम् ।

इष्टिपूर्वकत्वादक्रतुशेषो होमः संस्कृतेष्वग्निषु
स्यादपूर्वोप्याधानस्य सर्वशेषत्वात् ॥ १ ॥

(इष्टित्वेन तु संस्तवश्चतुर्होतॄनसंस्कृतेषु दर्शयति ॥ २ ॥ उपदेशस्त्वपूर्वत्वात् ॥ ३ ॥ स सर्वेषामविशेषात् ॥ ४ ॥ अपि वा क्रत्वभावादनाहिताग्नेरशेषभूतनिर्देशः ॥ ५ ॥ जपो वाऽनग्निसंयोगात् ॥ ६ ॥ इष्टित्वेन तु संस्तुते होमः स्यादनारभ्याग्निसंयोगादितरेषामवाच्यत्वात् ॥ ७ ॥ उभयोः पितृयज्ञवत् ॥ ८ ॥ निर्देशो वाऽनाहिताग्नेरनारभ्याग्निसंयोगात् ॥ ९ ॥ पितृयज्ञे संयुक्तस्य पुनर्वचनम् ॥१० ॥)

''प्रजाकामं चतुर्होत्रा याजयेत्'' इति श्रूयते । पृथिवी होता, द्यौरध्वर्युः, रुद्रोऽग्नीत्'' इत्यादिर्मन्त्रश्चतुर्होता । तेन प्रजाकामं याज**येदित्यर्थः ।** स किं होम आहिताग्न्यधिकारः सन्नाहवनीये कार्यः, उत तदन्याधिकारस्सन् लौकिकाग्नौ स्यात् , किं वोऽभयाधिकार इति **सन्देहे,**

अग्निहोत्रादिक्रतुहोमेष्वाहिताग्नेरेवाधिकारदृष्टेरिहापि तस्यैवाधिकारः । न च ''एषा वाऽनाहिताग्नेरिष्टिर्यच्चतुर्होतारः'' इति वचनविरोधः । तत्र विध्यश्रवणेन ''यैषाऽनाहिताग्नेश्चतुहोत्रादिमन्त्रजपादिरूपा क्रिया, सा इष्टिरित्यनुवादत्वेनेतीष्टिपदस्यानाहिताग्निना कृतजपादिक्रियायाः स्तुत्यर्थतया वाक्यजनोपपत्तेरित्येकः **पूर्वः पक्षः ।**

तदाह **सूत्रे,** इष्टिपूर्वकत्वाद्दर्शपूर्णमासप्रकृतिकत्वात् **अक्रतुशेषा होमश्चतुहोत्रादिः संस्कुतेष्वग्निषु स्यात्** दर्वीहोमत्वेनायम**पूर्वोपि** दृष्टप्रतीको न चेदपि, **आधानस्या**ऽहवनीयस्य **सर्वहोमशेष**त्वादिति ।

अपरस्तु, वचनस्य पूर्वोक्तयोजनेव ''यैषा चर्तुातृहोमात्मिकेष्टिः साऽनाहिताग्नेः'' इत्यपि

योजना सम्भवतीत्यनाहिताग्नेरप्यधिकारः। किञ्च चतुर्होतृहोमस्यानारभ्याधीतत्वेन क्रतुप्रवेशाभावात्पुरुषार्थतया विहितोऽयं होम उभयाधिकारिकः स्यादिति।

सिद्धान्तस्तु वचने साक्षाच्छष्ठीश्रुत्याऽनाहिताग्नेरवगम्यमानेष्टिः न क्लेशेनाऽहिताग्नेःकल्पयितुं युक्तेत्यनाहिताग्नेरेवाधिकार इति।

फलन्तु, लौकिकेऽग्नौ चतुर्होतृहोमानुष्ठानम्।

इति प्रथमं चतुर्होतृहोमेऽनाहिताग्नेरेवाधिकाराधिकरणम् (सूत्राणि १-१०)

अथ द्वितीयमनाहिताग्निषूपनयनहोमाधिकाराधिकरणम् (सूत्राणि ११-१९)

उपनयन्नादधीत होमसंयोगात्॥ ११॥

(स्थपतीष्टिवल्लौकिके वा विद्याकर्मानुपूर्वत्वात्॥ १२॥ आधानञ्च भार्यासंयुक्तम्॥ १३॥ अकर्म चोर्ध्वमाधानात्तत्समवायो हि कर्मभिः॥ १४॥ श्राद्धवदिति चेत्॥ १५॥ न श्रुतिविप्रतिषेधात्॥ १६॥ सर्वार्थत्वाच्च पुत्रार्थो न प्रयोजयेत्॥ १७॥ सोमपानात्तु प्रापणं द्वितीयस्य तस्मादुपयच्छेत्॥ १८॥ पितृयज्ञे तु दर्शनात्प्रागाधानात्प्रतीयेत॥ १९॥)

पूर्ववैषम्येणात्र शङ्कना**त्सङ्गतिः**। उपनयनाङ्गभूता माणवककर्तुका आचार्यकर्तृकाश्च होमाः किमाहवनीये स्युः, उत लौकिकेऽग्नाविति **सन्देहे,**

''एषा वाऽनाहिताग्नेः'' इति वचनसत्त्वेन चतुर्होतृहोमस्य लौकिकाग्नौ कार्यत्वेपीह तथा वचनाभावादुपनयनात्प्राग्भार्यामुद्वाह्याऽधानं कृत्वा सम्पादिते आहवनीये ते होमः कार्याः। ''स्नात्वा भार्यामधिगच्छेत्'' इति स्नानोत्तरकालभार्योद्वाहवचनमपत्यार्थं स्यादिति **प्राप्तम्।**

तदाह **सूत्रे, उपनयन्** उपगच्छन् माणवकः प्रागुपनयनात् **आदधीत** आहवनीयस्योपनयनाङ्गभूतैर्होमैः **संयोगादिति।**

सिद्धान्तस्तु, विद्वानेवाऽधानेऽधिकारी। न चानुपनीतस्य विद्यास्ति। अत आहवनीयाभावाल्लौकिकेग्नावुपनयनहोमः कार्य इति।

इति द्वितीयमनाहिताग्निषूपनयनहोमाधिकाराधिकरणम् (सूत्राणि ११-१९)

अथ तृतीयमनाहितेऽग्नौ स्थपतीष्ट्यधिकरणम् (सूत्रे २०-२१)

स्थपतीष्टिः प्रयाजवदग्न्याधेयं प्रयोजयेत्तादर्थ्याच्चापवृज्येत ॥ २० ॥

(अपि वा लौकिकेऽग्नौ स्यादाधानस्यासर्वशेषत्वात् ॥ २१ ॥)

अत्रापि पूर्ववैषम्येण शङ्कना**त्सङ्गतिः**। ''एतया निषादस्थपतिं याजयेत्'' इति श्रुता स्थपतीष्टिः किमाहवनीये स्यात्, उत लौकिकेऽग्नाविति **सन्देहे,** दर्शपूर्णमासरूपप्रकृतितश्चोदकेनाऽहवनीयादेः प्राप्तत्वात्तस्य चाऽधानाधीनस्यासत्यापि स्थपतेराधानविधाविष्टिविधानबलादेवाऽधानाक्षेपेण पूर्वत्रेवाहवनीयाद्यसम्भवाभावादाहवनीये स्यादिति **प्राप्तम्।**

तदाह, **स्थपतीष्टिः प्रयाजादिकमिवाग्निद्वारेमाधानमपि प्रयोजयेत्।** न चैवं स्थपतेरग्निमत्त्वे कर्मान्तरेप्यधिकारः स्यादिति शंक्यम्। **तादर्थ्याच्चापवृज्येत।** इदं ह्याधानं स्थपतीष्ट्यैव प्रयुक्तमिति तदर्थम्। न तु वसन्तादिविहिताधानवदग्निमात्रार्थम्। अतस्तस्यामिष्टौ समाप्तायामाधानमपवृज्येत समाप्येतेति न कर्मान्तराधिकारः। अग्न्यभावादिति।

सिद्धान्तस्तु, प्रकृतित आहवनीयादेः प्राप्तावपि तस्य वसन्तादिवाक्यबलेन ब्राह्मणादिकर्तृकाधानसाध्यत्वावगमात्तत्कर्तृकमेवाधानमग्निद्वारेणापीष्टिविधिः प्रयोजयेत्। न स्थपतिकर्तृकमिति स्थपतीष्टिर्नाहवनीये। किन्त्वाचाराल्लौकिकेऽग्नावेवेति। **फलं** व्यक्तम्।

इति तृतीयमनाहितेऽग्नौ स्थपतीष्ट्यधिकरणम् (सूत्रे २०-२१)

अथ चतुर्थमनाहितेऽग्नाववकीर्णिपश्वनुष्ठानाधिकरणम्

अवकीर्णिपशुश्च तद्वदाधानस्याप्राप्तकालत्वात् ॥ २२ ॥

अत्रापि पूर्ववैषम्येण शङ्कना**त्सङ्गतिः**। ''यो ब्रह्मचार्यवकिरेत् (अवकिरेत् धातुं विसृजेत्) स गर्दभं पशुमालभेत'' इति श्रुतः पशुयागः किमाहवनीये स्याल्लौकिकेऽग्नौ वेति **सन्देहे,** स्थपतीष्टेरध्ययनाप्रयोजकत्वेप्यवकीर्णिनस्त्रैवर्णिकत्वाद्विद्वत्त्वात्स्नातकव्रतभार्योद्वाहाधानानां सम्भवादाहवनीय एव प्रायश्चित्तरूपो गर्दभपशुयागः कार्य इति **प्राप्ते,**

सिद्धान्तः, ''अविच्युतब्रह्मचर्यो गृहस्थाश्रममाविशेत्'' इति वचनादसमाहितब्रह्मचर्यव्रतस्य गार्हस्थ्ये प्रवेशायोगात्, अपत्नीकस्याधानायोगादग्न्यभावेनायं गर्दभपशुयागो लौकिक एवाग्नाविति। तदाह, **अवकीर्णिपशुयागश्च तद्वत्** स्थपतीष्टिवल्लौकिके स्यात्। प्रायश्चित्तमकृत्वा दारपरिग्रहासम्भवेनाऽधानस्य तदानीमप्राप्तकालत्वादिति।

इति चतुर्थमनाहितेऽग्नाववकीर्णिपश्वनुष्ठानाधिकरणम्

अथ पञ्चमं दैवकर्मणामुदगयनादिकालताधिकरणम् (सूत्रे २३-२४)

उदगयनपूर्वपक्षाहःपुण्याहेषु दैवानि स्मृतिरूपान्यार्थदर्शनात् ॥ २३ ॥

(अहनि च कर्मसाकल्यम् ॥ २४ ॥)

प्रासङ्गिकी **सङ्गतिः**। उपनयनचौलादीनि किं सर्वकाले स्युः, उतोदगयनादिष्विति **सन्देहे,** विशेषाश्रवणात्सर्वदेति **प्राप्ते,**

स्मृतिषूदगयनादिष्वेव विहितत्वात्तत्रैव स्युरिति **सिद्धान्तः**। तदाह **सूत्रकारः, दैवानि** देवसम्बन्धिकार्याणि **उदगयनपूर्वपक्षाहःपुण्याहेषु** स्यु, ''अथ कर्माण्याचाराद्यानि गृह्यन्ते। उदगयनपूर्वपक्षाहःपुण्याहेषु कार्याणि'' इति **स्मृतिदर्शनात्**। ''एतद्वै देवानां रूपं यदुदगयनं, पूर्वपक्षोऽहः'' **इत्यन्यार्थदर्शनात् रूपत्वेन** प्रशंसारूपार्थवाददर्शनाच्चेति।

इति पञ्चमं दैवकर्मणामुदगयनादिकालताधिकरणम् (सूत्रे २३-२४)

अथ षष्ठं पित्र्यादिकर्मणामपरपक्षादिकालताधिकरणम्

इतरेषु पित्र्याणि ॥ २५ ॥

प्रासङ्गिकी **सङ्गतिः**। पित्र्याणि श्राद्धादीनि किं यदा कदाचित्, उत कालविशेष इति सन्देहे, विशेषाश्रुतेरनियमे **प्राप्ते,**

स्मृतिबलादपरपक्षेऽपराह्णादौ च काले कार्याणीति **सिद्धान्तः**। **व्यक्तः** सूत्रार्थः।

इति षष्ठं पित्र्यादिकर्मणामपरपक्षादिकालताधिकरणम्

अथ सप्तमं ज्योतिष्टोमाङ्गयाच्ञाक्रयणयोर्नित्यताधिकरणम् (सूत्रे २६-२७)

याच्ञाक्रयणमविद्यमाने लोकवत् ॥ २६ ॥

(नियतं वाऽर्थवत्त्वात्स्यात् ॥ २७ ॥)

उदगयनान्यायेनात्र शङ्कनात्**सङ्गतिः**। ज्योतिष्टोमे द्रव्ययाच्ञा सोमक्रयश्च श्रूयते। ''द्वादशरात्रीर्दीक्षितो भृतिं वन्वीत'' इति याच्ञा। ''अरुणया पिङ्गाक्ष्या क्रीणाति'' इकि क्रयः। तदुभयं यस्य द्रव्यं नास्ति तस्य, उत विद्यमानद्रव्यसोमस्यापीति **सन्देहे,**

यथोपनयनादिकमुदगयनादावेवमविद्यमानद्रव्यस्यैव याच्ञादिकम्। विद्यमानद्रव्यस्य याच्ञासोमक्रययोरानर्थक्यात्। अतोऽविद्यमानद्रव्यसोमस्यैव याच्ञादावधिकार इति **प्राप्तम्।** तदाह, **लोकवत्** लोके यथा **याच्ञाक्रयणं** द्वन्द्वैकवद्भावः। अविद्यमान एव द्रव्ये भवति तथेदमपीति।

सिद्धान्तस्तु, यदीदं याचनादिकं द्रव्यस्वरूपप्रयुक्तं स्यत्तदा सति द्रव्ये तदनर्थकं स्यात्। किन्तु क्रतुप्रकरणे नित्यवदाम्नातं नित्यमङ्गम्। न नैमित्तिकम्। निमित्ताश्रवणात्। अतोङ्गान्तरवदपूर्वप्रयुक्तमेवेदं याच्ञाक्रयणमिति सत्यपि द्रव्यान्तरे याचितद्रव्यमेवापूर्वं साधयतीति कल्पनादनेन विनाऽपूर्वानिष्पत्तेस्तदर्थं याच्ञाक्रयणमावश्यकमिति।

इति सप्तमं ज्योतिष्टोमाङ्गयाच्ञाक्रययोर्नित्यताधिकरणम् (सूत्रे २६-२७)

अथाष्टमं ज्योतिष्टोमादिषु पयोव्रतादीनामपि नित्यताधिकरणम्

तथा भक्षप्रैषाऽऽच्छादनसंज्ञप्तहोमद्वेषम् ॥ २८ ॥

आतिदेशिकी **सङ्गतिः**। ''प्रयोव्रतं ब्राह्मणस्य'' इति पयोभक्षः, तथा ''अग्नीदग्नीन्विहर'' इति प्रैषमन्त्रः, ''अहतं वासः परिधत्ते'' इत्यहतवाससाऽऽच्छादनं, ''यत्पशुर्मायुमकृत'' इत्यादिमन्त्रेण विहितः संज्ञप्तहोमः, ''योऽस्मान् द्वेष्टि यञ्च वयं द्विष्म'' इति मन्त्रः इत्येतत्पयोभक्षादिपञ्चकं किमसति भक्षान्तरे, प्रैषार्थबोधेऽन्यतोऽसति, वासोन्तराभावे, मायुकरणे, द्वेष्यसत्त्वे स्यात् , उत सत्यसति भक्षादाविदं पञ्चकं नित्यं क्रतोरङ्गमिति **सन्देहः**।

पूर्वपक्षस्तु, भक्षादित्रयस्य तुष्ट्याद्यर्थतया अन्यतोपि तत्सिद्धौ तदनुष्ठानवैयर्थ्यादन्यतस्तदसिद्धावेव भक्षादीनामनुष्ठानम् । संज्ञप्तहोमस्य मन्त्रलिङ्गान्मायुकरणजातदोषहानार्थत्वावगमान्मायुकरणे सत्येवानुष्ठानम् । ''योऽस्मान् द्वेष्टि'' इति मन्त्रस्यापि लिङ्गाद्भ्रातृव्योपद्रवार्थत्वावगमात्तस्मिन् सत्येवानुष्ठानमित्येवं सामर्थ्यान्निमित्तसद्भाव एवैषामनुष्ठानमिति ।

सिद्धान्तस्तु, नित्यवच्छ्रुतानां भक्षादीनामनित्यभूतनिमित्तरूपद्वाराश्रयणमयुक्तमित्यन्यस्मिन् सत्यपि मायुकरणादौ नियमादृष्टार्थं नित्यमनुष्ठानमेतेषामिति ।

तदाह **सूत्रे, तथा भक्षे**त्यादि । द्वन्द्वैकवद्भावः । भक्षादिपञ्चकं **तथा** याज्ञादिकं यथाऽदृष्टार्थं तथेदमपीत्यर्थः ।

इत्यष्टमं ज्योतिष्टोमादिषु पयोव्रतादीनामपि नित्यताधिकरणम्

अथ नवममपररात्रे व्रतस्यानित्यताधिकरणम्

अनर्थकन्त्वनित्यं स्यात् ॥ २९ ॥

पयोव्रतस्यादृष्टार्थत्वेऽजरणेपि स्यादिति शङ्कना**त्सङ्गतिः ।** व्रत्यमानं पयो न जीर्यति चेत्तदापि व्रतयितव्यं, न वेति **सन्देहे,** नित्यत्वाद्व्रतयितव्यमिति **प्राप्ते,**

जरणाभावेऽपि व्रतकरणे यजमानस्य रोगोत्पत्त्या क्रतुविलोपप्राप्तेः प्रधानविरोधान्न व्रतयितव्यमिति । तदाह**, अनर्थकन्तु** क्रत्वनर्थपर्यवसायि तु **अनित्यं स्यात्** न कार्यं स्यादिति।

इति नवममपररात्रे व्रतस्यानित्यताधिकरणम्

अथ दशमं छागस्यैवाग्नीषोमीयपशुताधिकरणम् (सूत्राणि ३०-४२)

पशुचोदनायामनियमोऽविशेषात् ॥ ३० ॥

(छागो वा मन्त्रवर्णात् ॥ ३१ ॥ न चोदनाविरोधात् ॥ ३२ ॥ आर्षेयवदिति चेत् ॥ ३३ ॥ न तत्र ह्यचोदितत्वात् ॥ ३४ ॥ नियमो वैकार्थ्यं ह्यर्थभेदाद्भेदः पृथक्त्वेनाभिधानात् ॥ ३५ ॥ अनियमो वाऽर्थान्तरत्वादन्यत्वं व्यतिरेकशब्दभेदाभ्याम् ॥ ३६ ॥ रूपाल्लिङ्गाच्च ॥ ३७ ॥ छागे न कर्माख्यारूपलिङ्गाभ्याम् ॥ ३८ ॥० रूपान्यत्वान्न जातिशब्दः स्यात् ॥ ३९ ॥ विकारो नौत्पत्तिकत्वात् ॥ ४० ॥ स नैमित्तिकः पशोर्गुणस्याचोदितत्वात् ॥ ४१ ॥ जातेर्वा तत्प्रायवचनार्थवत्त्वाभ्याम् ॥ ४२ ॥)

पूर्वन्यायेनात्र शङ्कना**त्सङ्गतिः** । ज्येतिष्टोमे ''अग्नीषोमीयं पशुमालभेत'' इति श्रुतः पशुर्यः कश्चिदालभ्यः, उत छाग इति **सन्देहे,**

प्रधानविधिवाक्ये विशेषाश्रवणात्पशुसामान्यमेवावगम्यते । तथा च प्रधानक्रतुविरोधाद्भक्षस्य पाक्षिकत्ववदिहापि प्रधानभूतविधिवाक्यविरोधात् ''छागस्य वपायाः'' इति मन्त्रस्य प्रधानाविरोधाय पाक्षिकानुवादत्वसम्भवाद्यः कश्चित्पशुरालभ्य इति **प्राप्तम्** ।

तदुक्तम् **पशुचोदनायामित्यादि । व्यक्तोऽर्थः** । न चात्रोक्ताधिकरणन्यायः । विधिस्तुत्योरेकवाक्यत्वात्स्तुतितः पूर्वमपर्यवसितोऽञ्जनविधिरर्थवादगतघृतविषय एव पर्यवस्यति । मन्त्रपशुचोदनयोस्तु वाक्यभेदाद्विधिवाक्यं पशुसामान्य एव पर्यवस्यतीति वैषम्यादित्याहुः ।

सिद्धान्तस्तु, पशुविधाववगतसामान्यस्य प्रतिव्यक्ति समाप्यत्वेन छागेप्यविकलत्वान्मन्त्रस्य प्रकरणपाठेन नित्यत्वावगमान्मन्त्रवर्णोक्तछाग एव पशुरालभ्यत इति । तदाह **सूत्रकारः । च्छागो वा मन्त्रवर्णादिति ।**

इति दशमं छागस्यैवाग्नीषोमीयपशुताधिकरणम् (सूत्राणि ३४२)

इति श्रीभाट्टसंग्रहे सर्वतन्त्रस्वतन्त्रश्रीसुधीन्द्रतीर्थगुरुपादशिष्य
श्रीराघवेन्द्रतीर्थयतिसार्वभौमकृते षष्ठाध्यायस्याष्टमः पादः ।

इति श्रीभाट्टसंग्रहे पूर्वार्धं समाप्तम्

अस्मिन् पादे	अधिकरणानि	सूत्राणि
आदितः	अधिकरणानि	सूत्राणि